**SHASTRI HONOURS - SAHITYA**

**1st Semester, Course-2 (DSC)**

# शिशुपालवधम् (प्रथमसर्गः)

## Śiśupālavadham (Prathamasargaḥ)


लेखिका

डा.मन्जूषा चन्ने



आरादन्तर्जालीयविद्यानिकेतः

**CENTRE FOR DISTANCE & ONLINE EDUCATION**

राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः - ५१७ ५०७

**NATIONAL SANSKRIT UNIVERSITY, TIRUPATI -517 507**

**CHIEF EDITOR**
***Prof.G.S.R.Krishna Murthy***
Vice-Chancellor
National Sanskrit University
Tirupati

**GENERAL EDITOR**
***Prof.C. Ranganathan***
Director
CDOE – N.S.University,
National Sanskrit University
Tirupati.

**Addl.GENERAL EDITOR**
***Dr. Bharat Bhusan Rath***
Deputy Director,
CDOE – N.S.University,
Tirupati.

**PROGRAMME CO-ORDINATOR**
***Dr.Niranjan Mishra***
Associate Professor
& Head of the Department
Dept. of Vedabhashyam NSU, TPT.

**SUBJECT CO-ORDINATOR**
***Prof.G.Sankara Narayanan***
National Sanskrit University
Tirupati.

**COURSE WRITER**

***Dr.Manjusha Channe***
Asst.Professor (Contract)
C.S.U Agarthala Campus.

**SUPERVISING**

Dr.M.K.Suneetha

**PAGE SETTING**

Prasad Naik Dungavath

**2nd Print : 2024**

**©PUBLISHED BY**

**आरादन्तर्जालीयविद्यानिकेतः**
**CENTER OF DISTANCE AND ONLINE EDUCATION**
**राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः - ५१७ ५०७**
**NATIONAL SANSKRIT UNIVERSITY,TIRUPATI – 517 507.**

# विषयसूची

**विषय:** **पुट संख्या**


| विषय: | पुट संख्या |
|---|---|
| उपोद्घातः | 1 - 8 |
| प्रथमखण्डः – *नारदावतरणम्* | *9 - 16* |
| द्वितीयखण्डः –*नारदवर्णनम्* | *17 - 27* |
| तृतीयखण्डः – *नारदस्वागतम्* | *28 - 38* |
| चतुर्थखण्डः – *श्रीकृष्णवर्णनम्* | *39 - 51* |
| पञ्चमखण्डः – *श्रीकृष्णविहिता नारदप्रशंसा* | *52 - 60* |
| षष्ठः खण्डः – *नारदकृता श्रीकृष्णस्तुतिः* | *61 - 74* |
| सप्तमः खण्डः – *नारदागमनप्रयोजनभूमिका* | *75 - 79* |
| अष्टमः खण्डः – *शिशुपालस्य पूर्वजन्मवृत्तान्तः* | *80 - 90* |
| नवमः खण्डः – *शिशुपालस्य पूर्वजन्म-औद्धत्यम्* | *91 - 102* |
| दशमः खण्डः – *रावणस्य लोकोपद्रवः* | *103 - 112* |
| एकादशः खण्डः – *भयभीतदेवानां दुःस्थितिः* | *113 - 127* |
| द्वादशः खण्डः – *शिशुपालस्वरूपम्* | *128 - 135* |
| त्रयोदशः खण्डः – *इन्द्रसन्देशकथनम्* | *136 - 142* |
| चतुर्दशखण्डः – सन्दर्भवाक्यानि | *143 - 151* |

# उपोद्घातः

संस्कृतवाङ्मये पञ्चमहाकाव्यानि सुविख्यातानि। रघुवंशम् , कुमारसम्भवम् , किरातार्जुनीयम् , शिशुपालवधम् , नैषधीयचरितं चेति। तत्र हि कविकुलगुरुकालिदासविरचितं रघुवंशम् , कुमारसम्भवम् मेघदूतञ्च "लघुत्रयी" इत्यभिधीयते। तथा च महाकविभारविरचितं किरातार्जुनीयम् , महाकविमाघप्रणीतं शिशुपालवधम्, महाकविश्रीहर्षग्रथितं नैषधीयचरितं चेति "बृहत्त्रयी" इत्युच्यते।

एवं बृहत्त्रयीसमाविष्टं "शिशुपालवधम्" संस्कृतवाङ्मये अद्वितीयमेवास्ति। "तावद् भा भारवेर्भाति यावन्माघस्य नोदयः" इत्यनेन वचनेनापि शिशुपालवधमहाकाव्यस्य महत्त्वं प्रत्यभिज्ञायते। अत एव "शिशुपालवधम्" इत्यस्य महाकाव्यस्य सामान्यपरिचयः भवतां छात्राणां भवेदिति धिया पाठ्यांशे निर्धारितोऽयम् अंशः। वस्तुतः सम्पूर्णमहाकाव्यस्य अध्ययनं समयाभावात् दुष्करमिति प्रथमसर्ग एव अत्र निरूप्यते।

- तेन हि भवान् /भवती शिशुपालवधमहाकाव्यस्य सामान्यपरिचयं प्राप्नोति।
- महाकविमाघस्य परिचयं वैशिष्ट्यञ्च अवगच्छति।
- सम्पूर्णमहाकाव्यस्य अध्ययनार्थं सामर्थ्यं सम्पादयति।
- अन्यमहाकाव्यस्य अध्ययनं कथं करणीयमित्यस्य मार्गदर्शनमाप्नोति।

**स्वानुशीलनप्रश्नाः**

१. महाकविभारविप्रणीतं किं महाकाव्यम्?

२. "बृहत्त्रयी" इत्यत्र केषां महाकाव्यानां समावेशोऽस्ति?

३. संस्कृतवाङ्मये कानि पञ्चमहाकाव्यानि सुविख्यातानि?

# *शिशुपालवधम्*

## शिशुपालवधस्य महाकाव्यत्वम्

अलङ्कारग्रन्थेषु महाकाव्यस्वरूपं महाकाव्यलक्षणञ्च उपपद्यते। तदनुलक्ष्यैव सम्प्रति शिशुपालवधस्य महाकाव्यत्वमस्माभिः विविच्यते।

महाकाव्ये सर्गोबद्धरचना अपेक्ष्यते। तत्र हि नातिस्वल्पा नातिदीर्घा अष्टाधिका सर्गसङ्ख्या, वृत्तयोजना, सर्गान्ते वृत्तपरिवर्तनं चोक्तम् । काव्यनायकः न केवलम् उच्चकुलोत्पन्नः क्षत्रियः देवता वा भवेदपि तु धीरोदात्तगुणान्वितोऽपि। शृङ्गारवीरशान्तरसेषु कश्चिदेकः अङ्गीरसत्वं प्रधानत्वं वा सम्प्राप्य अन्ये रसाः अत्र अङ्गरूपेण भवेयुः। महाकाव्यस्य इतिवृत्तम् इतिहासप्रसिद्धं सज्जनाश्रितं वा भवेत् । धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयेषु किमप्येकं फलं तत्र दृश्येत। क्वचिदिह खलादीनां निन्दा क्वचित् तु सतां गुणकीर्तनं करणीयम् । आदौ नमस्क्रियाशीर्वा वस्तुनिर्देशः वा मङ्गलाचरणमाचरणीयम्। सन्ध्यासूर्येन्दुरजनीप्रदोषप्रातर्मध्याह्नादि प्रकृतिवर्णनं तथैव पर्वतसागरवनमृगयादि वस्तुवर्णनं महाकाव्ये इष्यते। सर्गान्ते भाविसर्गस्य कथायाः सूचना, सर्गोपादेयकथया सर्गनामनिर्देशस्यात्र आवश्यकं भवति। महाकाव्यस्य नामकरणं मुख्यनायकं कथाप्रसङ्गं वाधिकृत्यैव करणीयम् ।

एवम् उपर्युक्तानि महाकाव्यलक्षणानि महाकाव्येऽस्मिन् समुपलभ्यन्ते। काव्यनायकः अत्र क्षत्रियवंशोत्पन्नः यदुकुलश्रेष्ठः भगवान् श्रीकृष्णोऽस्ति। सः च सर्वगुणसम्पन्नः, कार्यकुशलः, लोकप्रियः, शूरः, तेजस्वी, विनयशीलः तथा च धीरोदात्तः।अत्र अष्टाधिका सर्गसङ्ख्या नानावृत्तेषु विलसति। परं सम्पूर्णे सर्गे एकं वृत्तं सर्गान्ते च वृत्तपरिवर्तनमत्र दृश्यते। सर्गबद्धरचना, अङ्गीरूपेण वीररसः, महाभारतान्तर्भूतं कथावृत्तं,द्वारकानगरी-रैवतकपर्वतादि प्रकृतिवर्णनं युद्धवर्णनञ्चात्र समुपलभ्यते। शिशुपाल अत्र प्रतिनायकः। वस्तुनिर्देशात्मकमङ्गलाचरणेन सह शिशुपालवधात्मकदुष्टनिग्रहरूपफलं चापि विद्यते।

इत्थं प्रायशः सर्वाणि महाकाव्यलक्षणान्यत्र सन्दृश्यन्ते तस्मात् शिशुपालवधस्य महाकाव्यत्वं सिध्यति।

**स्वावलोकनप्रश्नाः -**

१. महाकाव्यलक्षणं कुत्र उपपद्यते?

२. शिशुपालवधमहाकाव्यस्य नायकः कः?

३. काव्यनायकः कीदृशः भवेत्?

४. अस्य महाकाव्यस्य प्रतिनायकः कः?

५. महाकाव्यलक्षणे अङ्गीरसत्वेन के रसाः व्यपदिष्टाः?

## शिशुपालवधम् - परिचयः

संस्कृतसाहित्यजगति महाकविमाघप्रणीतं "शिशुपालवधम्" इत्येदं महाकाव्यं पञ्चमहाकाव्येषु विराजते। शिशुपालवधबीजभूतं कथावस्तु अधिकृत्य विरचितं काव्यं शिशुपालवधमिति। इयं शिशुपालकथा महाभारते उपलभ्यते। तस्मात् कविवर्येण माघेन महाभारतमाधारीकृत्य सुनिर्मितमिदं महाकाव्यमिति तु स्पष्टम् । अत्र हि काव्यारम्भे मङ्गलाचरणरूपेण तथा च सर्गान्तश्लोकेषु मङ्गलान्तरूपेण स्थितः "श्रीशब्दप्रयोगः" निश्चयेन चमत्कारमुत्पादयति। अनुभूयते चास्मिन् महाकवेः लोकशास्त्रकाव्याद्यवेक्षणं पाण्डित्यञ्च।उक्तमेव यथा-

**'माघेन विघ्नहोत्साहा नोत्सहन्ते पदक्रमे**

**स्मरन्तः भा-रवेरेव कवयः कपयः यथा '।।**

अर्थात् माघमासे सूर्यतापेन हतोत्साहाः वानराः अग्रे गन्तुम् असमर्थाः भवन्ति। सूर्यस्य प्रचण्डतापं स्मारं स्मारं बहिर्निर्गमनमेव त्यजन्ति। तादृशमेव कविवरेण्यस्य माघस्य रचनायाः क्लिष्टत्वात् तां रचनां पठितुं सहृदयाः नोत्सहन्ते। ते महाकवेः भारवेः कृतिं स्मारं स्मारं 'शिशुपालवधम्' इत्यस्य संस्पर्शे अनुत्साहाः सन्तिष्ठन्ते। एतादृशः महाकवेः परिचयः अस्माकं कृते आवश्यकः खलु। तेन ह्यधुना कविपरिचयः प्रदीयते अत्र।

## *शिशुपालवधम्*

### कविपरिचयः

शिशुपालवधमहाकाव्यस्य अन्तिमसर्गे पञ्चश्लोकेषु महाकविना निजवंशवर्णनं कृतमस्ति। तदनुसारं कविवर्योऽयं राजस्थानस्थिता "भीनमालनगरी" इत्यत्र जन्म अलभत। श्रीवर्मलाभिधानस्य नृपतेः सर्वाधिकारी महासेनापतिः सुप्रभदेवः इत्यासीत्। अस्य सुप्रभदेवस्य पौत्रः दत्तकतनुजः माघः धनाढ्यब्राह्मणकुले जनिं लेभे। वदान्यश्रेष्ठः दत्तकः इव माघोऽपि उदारोऽऽसीत् । सः महान् पण्डितस्सन् शास्त्रव्युत्पन्नमतिश्चासीत्। वेद-वेदान्तः, उपनिषद्, धर्मशास्त्रं, मन्त्र-तन्त्रज्ञानं, योगशास्त्रं, पुराणम् , इतिहासः, छन्दःशास्त्रं, कामतन्त्रम् , आयुर्वेदः, सङ्गीतम् , सामुद्रिकशास्त्रम् , राजनीतिः, अश्वशास्त्रं, गजशास्त्रमित्यादिषु सः नैपुण्यमाप। तस्य एवं सर्वतोपरिप्रतिभाविलासः शिशुपालवधमहाकाव्ये दृग्गोचरीभवति। वस्तुतः महाकवेरस्य इयमेका एव कृतिः समुपलभ्यते।

कालिदासः, भारविः, दण्डिः, भट्टि इत्येतादृशां प्रभावः माघे परिलक्षितः भवति। माघरचनायाः यदा परिशीलनं क्रियते तदा तत्र उपमालङ्कारस्य आधिक्यम्, अर्थगौरवं पदलालित्यञ्चानुभूयते। तथा हि चोक्तमस्ति –

**उपमा कालिदासस्य भारवेरर्थगौरवम् ।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।**

तात्पर्यं कविवरेण्यस्य माघस्य शिशुपालवधकाव्ये एते त्रयः अपि गुणाः सहोदराः इव सन्तिष्ठन्ते। तस्मात् सा रचना विशेषत्वेन शोभते।

**स्वानुशीलनप्रश्नाः**

१. महाकविमाघस्य जन्मस्थानं किम्?

२. माघे कति गुणाः?

३. माघः कस्य पौत्रः?

४. माघस्य पितुः नाम किम्?

**काव्यपरिचयः**

"शिशुपालवधम्" इत्यस्य प्रणेता महाकविमाघः। महाकाव्यस्यास्य वर्ण्यविषयः "शिशुपालवध" इति शीर्षकादेव ज्ञायते। महाभारतकथामनुसृत्य विरचितेऽस्मिन् काव्ये २० सर्गाः १६५० परिमिताः श्लोकाश्चोपलभ्यन्ते। वीररसात्मकमिदं महाकाव्यम् उपमा, अर्थगौरवं पदलालित्यश्चेति त्रिभिः गुणैः व्यापृतमस्ति। विद्यन्ते ह्यत्र एकशब्दस्य कृते पर्यायवाचकाः शब्दाः। यथा सूर्यशब्दस्य कृते भानुः, सवितृ, दिनकरः, रविः, मित्रः, रुचिभर्तुः, अतुषारकरः, तिग्मरश्मिः, अनूरुसारथिः, अशीतरुचिः, अंशुमत् , अतुहिनरश्मिः, इनः इत्यादयः पर्यायवाचकाः शब्दाः। तेन हि महाकवेः शब्दकोषसामर्थ्यं प्रतीयते। नवसर्गपर्यन्तं प्रभूतं नूतनशब्दज्ञानं प्राप्य इतःपरं नूतनशब्दाः न स्युरिति वाचकमतिः भवति। अतः 'नवसर्गगते माघे नवशब्दो न विद्यते' इत्युच्यते।

वस्तुनिर्देशात्मकं मङ्गलाचरणं महाकाव्यस्यास्य वैशिष्ट्यम्। महाकाव्येऽस्मिन् वंशस्थ-शार्दूलविक्रीडितं शालीनीत्यादीनां २३ छन्दसां प्रयोगः सन्दृश्यते। शब्दार्थालङ्कारैः सह चित्रालङ्काराः अपि प्राचुर्येणात्र प्रयुक्तास्सन्ति। कोमलकान्तपदावल्या सहैव शब्दजालोऽपि विलसति अत्र। अस्य हि महाकाव्यस्य भाषा भावाभिव्यक्तये नितान्तं सक्षमा दृश्यते।

महाकाव्यस्थितसर्गसङ्ख्या तथा च सर्गनामानि सम्प्रति प्रस्तूयन्ते।

| **सर्गसङ्ख्या** | **सर्गनामानि** |
|---|---|
| १. प्रथमसर्गः | कृष्णनारदसम्भाषणम् |
| २. द्वितीयः सर्गः | मन्त्रवर्णनम् |
| ३. तृतीयः सर्गः | पुरीप्रस्थानम् |
| ४. चतुर्थः सर्गः | रैवतकवर्णनम् |
| ५. पञ्चमः सर्गः | सेवानिवेशः |
| ६. षष्ठः सर्गः | ऋतुवर्णनम् |
| ७. सप्तमः सर्गः | वनविहारवर्णनम् |
| ८. अष्टमः सर्गः | जलविहारवर्णनम् |

## *शिशुपालवधम्*

| | |
|---|---|
| ९. नवमः सर्गः | प्रदोषवर्णनम् |
| १०. दशमः सर्गः | सुरतवर्णनम् |
| ११. एकादशः सर्गः | प्रत्यूषवर्णनम् |
| १२. द्वादशः सर्गः | प्रयाणवर्णनम् |
| १३. त्रयोदशः सर्गः | श्रीकृष्णसमागमः |
| १४. चतुर्दशः सर्गः | श्रीकृष्णार्घदानम् |
| १५. पञ्चदशः सर्गः | अपशकुनाविर्भावः |
| १६. षोडशः सर्गः | दूतसंवादः |
| १७. सप्तदशः सर्गः | यदुवंशक्षोभणः |
| १८. अष्टादशः सर्गः | सङ्कुलयुद्धवर्णनम् |
| १९. एकोनविंशः सर्गः | द्वन्द्वयुद्धम् |
| २०. विंशः सर्गः | शिशुपालवधः |

एवं विंशतिसर्गात्मकमिदं महाकाव्यं कविवर्यमाघस्य एका एव कृतिः। या च "माघे सन्ति त्रयो गुणाः" इति भणितिं सार्थकीकरोति।

**स्वावलोकनप्रश्नाः**

१. "शिशुपालवधम्" इत्यस्मिन् महाकाव्ये कति सर्गाः समुपलभ्यन्ते?

२. महाकाव्यस्य अङ्गीरसः कः?

३. महाकाव्यस्य कः वर्ण्यविषयः?

४. माघकवेः विषये का भणितिः प्रसिद्धा?

**प्रथमसर्गस्य इतिवृत्तसारः**

कृष्णनारदसम्भाषणनामकः प्रथमसर्गोऽयम् । नारदमुनेः द्वारकापुरीं प्रति समागमनं तथा च श्रीकृष्णाय इन्द्रसन्देशकथनं सर्गस्यास्य मुख्यमुद्दिष्टम् ।

श्रीशब्दपुरस्सरं वस्तुनिर्देशात्मकं मङ्गलं समाचरन् महाकविमाघः महाकाव्यस्य प्रारम्भं कृतवान् ।

भगवान् श्रीकृष्ण आकाशमार्गात् भूमौ अवतरन्तं देवर्षिनारदम् अपश्यत् । नारदस्य आगमनानन्तरं श्रीकृष्णः अर्घ्यादिकया तं पर्यपूजयत् । सम्मानवचोभिः तम् अभिनन्द्य तस्य शुभागमनकारणञ्च पृष्टवान् । देवर्षिनारदेनापि श्रीकृष्णस्य प्रशंसां कृत्वा स्वस्य आगमनकारणमुक्तम् ।

पृथ्वीं दुष्टजनरहितां कर्तुं श्रीकृष्णः मनुष्येषु अवतीर्णः। अपि च पृथिव्याः संरक्षणमकरोदिति श्रीकृष्णं स्मारितवान् देवर्षिनारदः।

प्राचीनकाले हिरण्यकशिपुः नामा दैत्यः अभवत् । सः देवानां मनस्सु भयमजनयत्। तस्य नाशाय विष्णुः नृसिंहावतारं धृतवान् । द्वितीयजन्मनि सः एव रावणरूपेण भूमौ जन्म स्वीकृत्य निजेन असुरकार्येण जनान् अपीडयत् । तत्समये दाशरथिरामरूपं धृत्वा विष्णुः तस्य वधमकरोत् । स एव रावण अद्यत्वे शिशुपालरूपेण इहतले अवतीर्य जगत् पीडयन्नस्ति। अतः एनमुद्दण्डं भवान् अवश्यमेव यमसदनं प्रेषयत्विति नारद अवोचत् । नारदस्य तत्वचः श्रुत्वा भगवान् श्रीकृष्णः "तथास्तु" इति अवदत् । प्रस्थिते च नारदे शिशुपालं प्रति क्रुद्धस्य भगवतः श्रीकृष्णस्य व्योम्नीव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदम् इत्येषा स्थितिः प्रादुर्भूता।

एवं ७५ परिमितैः श्लोकैः महाकविः माघः प्रथमसर्गं पर्यपूरयत् ।

**स्वावलोकनप्रश्नाः**

१. द्वारकापुरीं प्रति कस्य आगमनम् अभवत्?

२. प्रथमसर्गस्य मुख्यमुद्दिष्टं किम्?

३. श्रीकृष्णः मनुष्येषु किमर्थम् अवतीर्णः?

४. दाशरथिरामः कस्य वधम् अकरोत् ?

५. सर्गेऽस्मिन् कति श्लोकाः सन्ति?

**उपसंहारः**

उपोद्घातेऽस्मिन् शिशुपालवधमहाकाव्यस्य सामान्यपरिचयः कविपरिचयश्च प्रदत्तः। महाकाव्यलक्षणानि प्रदर्श्य काव्यस्यास्य महाकाव्यत्वमपि संसिद्धीकृतम् । तथैव संस्कृतवाङ्मये पञ्चमहाकाव्येषु काव्यस्यास्य स्थानं बोधयित्वा प्रथमसर्गस्य कथासङ्क्षेपश्चात्र उपवर्णितः। इतःपरं पाठ्यांशरूपेण समाहितस्य प्रथमसर्गस्य सविस्तरम् अध्ययनहेतोः त्रयोदशखण्डेषु विषयविभाजनं विधीयते। तेन हि भवन्तः महाकाव्यस्य विषयवस्तु ज्ञात्वा कविवर्यमाघस्य वैशिष्ट्यमवगन्तुं प्रभवन्ति।

**न्यासप्रश्नाः**

१. शिशुपालवधम् इत्यस्य महाकाव्यत्वं स्पष्टयत।

२. महाकवेः माघस्य परिचयं लिखत।

## प्रथमखण्डः

## *नारदावतरणम्*

### संरचना

१.०. प्रस्तावना

१.१. लक्षिताधिगमांशाः

१.२. नारदावतरणम्

१.२.१. द्वारकां प्रति नारदागमनम्

१.२.२. आकाशात् अवतरतः नारदमुनेः दर्शनम्

१.२.३. श्रीकृष्णस्य नारदावबोधः

१.३. उपसंहारः

१.४. प्रश्नाः

### १.०. प्रस्तावना

उपोद्धाते अस्माभिः कविपरिचयः महाकाव्यस्य सामान्यपरिचयश्च सम्प्राप्तः। तथैव प्रथमसर्गसारांशोऽपि अधिगतः। सम्प्रति पाठ्यांशे नियोजितः प्रथमसर्गः अस्माभिः खण्डशः प्रतिपाद्यते।

'नारदावतरणम्' इत्यंशः प्रथमश्लोकादारभ्य तृतीयश्लोकपर्यन्तं शिशुपालवधस्य प्रथमसर्गे अन्तर्भूतोऽस्ति। तत्र हि 'द्वारकां प्रति नारदागमनं, आकाशात् अवतरतः नारदमुनेः दर्शनम् तथा च श्रीकृष्णस्य नारदावबोधः' इत्यादयः विषयाः बोध्यन्ते।

### १.१. लक्षिताधिगमांशाः

* छात्रः महाकाव्यस्य मङ्गलाचरणस्वरूपम् अवगच्छति।
* महापुरुषागमनं विस्मयजनकमिति जानाति।
* श्रीकृष्णं प्रति नारदमुनेः अभ्यागमनमिति विषयज्ञानं प्राप्नोति।
* श्लोकविशेषान् अधिगच्छति।
* श्लोकान्वयं कर्तुं प्रभवति।
* प्रथमसर्गस्य आद्यश्लोकान् अभिजानाति।

## १.२. नारदावतरणम्

इन्द्रसन्देशश्रावणाय नारदमुनिः स्वर्गात् पृथ्वीतलं श्रीकृष्णप्रासादम् उपागत इत्येव नारदावतरणमित्यत्र प्रस्तूयते।

### १.२.१. द्वारकां प्रति नारदागमनम्

**इन्द्रसन्देशकथनाय नारदमुनेः श्रीकृष्णं प्रति आगमनमत्र सूचितम् ।**

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।**
**वसन् ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः।।१।।**

**अन्वयः** – श्रियः पतिः जगन्निवासः जगत् शासितुं श्रीमति वसुदेवसद्मनि वसन् हरिः अम्बरात् अवतरन्तं हिरण्यगर्भाङ्गभुवं मुनिं ददर्श।

**प्रतिपदार्थः** – श्रियः पतिः = लक्ष्म्याः पतिः, रुक्मिणीरूपया श्रिया समेत इति। "राघवत्वे भवेत्सीता रुक्मिणी कृष्णजन्मनि" इति विष्णुपुराणम्। श्रीमति = लक्ष्मीयुक्ते, जगन्निवासः = जगतामाधारभूतः, शासितुम् = दुष्टनिग्रहशिष्टानुग्रहाभ्यां नियन्तुम् , नियन्त्रणं कर्तुम् , वसुदेवसद्मनि = वसुदेववेश्मनि, वसुदेवगृहे, वसन् = तिष्ठन् , निवासं कुर्वन् , अम्बरात् = आकाशात्, गगनात् , अवतरन्तम् = आगच्छन्तम् , आयान्तम् , हिरण्यगर्भ–अङ्गभुवम् = हिरण्यगर्भः = हिरण्यस्य गर्भः ब्रह्मा, तस्य अङ्गभुवम् = तस्य तनुजम् , पुत्रम् , मुनिम् = नारदम् , ददर्श = दृष्टवान्।

**श्लोकार्थः** – रुक्मिणीरूपिण्याः लक्ष्म्याः पतिः सर्वेषां लोकानामाश्रयः भगवान् श्रीकृष्णः विश्वं साधुपरित्राणदुष्टविनाशाभ्यां नियन्तुं सर्वसमृद्धिशालिनि वसुदेवस्य गृहे वसन् आकाशात् अवतरन्तं ब्रह्मणः पुत्रं देवर्षिनारदं दृष्टवान् ।

**भावार्थः** – अत्र हरिः इत्युक्ते विष्णुः। सः दुष्टानां विनाशाय सतां कल्याणाय चास्मिन् जगति निवसति। अपि चाधुना श्रीकृष्णावतारं स्वीकृत्य जगतः संरक्षणाय तिष्ठति। तेन हि शिशुपालवधार्थं प्रार्थयितुं नारदागमनमत्रेति भावः।

**विशेषः** – श्रीशब्दप्रयोगपूर्वकं मङ्गलाचरणमत्र निर्दिशति महाकविमाघः। यतो हि ग्रन्थारम्भे विघ्नविनाशाय इष्टदेवतास्मरणयुक्तं मङ्गलमाचरणीयमिति भारतीयपरम्परा।

अत्रापि अभिलषितसिद्ध्यर्थं मङ्गलादि काव्यं कर्तव्यमिति स्मरणात् कविः “श्री” शब्दमादौ प्रयुङ्क्ते। श्लोकेऽस्मिन् श्रियः, जगन्निवासः वसुदेवः, हिरण्यगर्भाङ्गभुवं, मुनिं, हरिश्च इत्यादयः सर्वे शब्दाः देवतावाचकाः अतः भद्रादिवाचकाः। एवं मङ्गलवाचकशब्दैः महाकाव्यस्य वस्तुनिर्देशात्मकं मङ्गलाचरणं महाकविना विरचितम्।

अत्राल्पीयसि वसुदेवसद्मनि सकलजगदाश्रयतया महीयसो हरेः आधेयत्वकथनादधिकप्रभेदोऽर्थालङ्कारः। जगन्निवासस्य जगदेकदेशनिवासित्वमिति विरोधालङ्कारोऽपि। तथा तकारसकारादेः केवलस्यासकृदावृत्त्या जगज्जगदिति सकृद् व्यञ्जनद्वयसादृश्याच्च वृत्त्यनुप्रासभेदौ शब्दालङ्कारौ। एवम् एषाम् एकत्र समावेशात् संसृष्टिः अलङ्कारोऽत्र। तथैव वंशस्थं वृत्तमत्र विराजते।

सर्गेऽस्मिन् त्रिसप्ततिश्लोपर्यन्तं वंशस्थं वृत्तमेवास्ति।

समासाः – श्रियः – श्रयति हरिं या सा श्रीः तस्याः – बहुव्रीहिसमासः।

जगन्निवासः – जगतां निवासः – षष्ठीतत्पुरुषसमासः।

वसुदेवसद्मनि – वसुदेवस्य सद्म तस्मिन् – षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. हरिं कं ददर्श?

२. हरिः कुत्र निवसति?

### १.२.२. आकाशात् अवतरतः नारदमुनेः दर्शनम्

आकाशात् भूतलं प्रति आगच्छन् नारदमुनिः सर्वप्रथमं भगवता श्रीकृष्णेन अवलोकितः। तदनन्तरं जनाः तं कथमपश्यन्निति श्लोकेऽस्मिन् वर्णयति।

**गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।**
**पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः।।२।।**

अन्वयः – अनूरुसारथेः गतं तिरश्चीनं प्रसिद्धम् ,हविर्भुजः ऊर्ध्वज्वलनं (प्रसिद्धम्)

*शिशुपालवधम्*

सर्वतः विसारि (इदं तु) धाम अधः पतति, एतत् किम् इति जनैः आकुलं (यथा तथा) ईक्षितम्।

प्रतिपदार्थः – गतम् = गतिः, तिरश्चीनम् = तिर्यग्भूतम्, अनूरुसारथेः = सूर्यस्य, प्रसिद्धम् = विख्यातम्, हविर्भुजः = अग्नेः, ऊर्ध्वज्वलनम् = ऊर्ध्वस्फुरणम् , ऊर्ध्वगतिः, धाम = तेजः, पतति अधः = अधः आगच्छति, सर्वतः = सर्वत्र, आकुलम् = व्याकुलम् , ईक्षितम् = दृष्टम्, अवलोकितम् , जनैः = लोकैः, विसारि = प्रसरणशीलम्।

**श्लोकार्थः –** सूर्यस्य तिर्यग् गतिः तथा च अग्नेः ऊर्ध्वगमनं प्रसिद्धम् । परन्तु इदन्तु सर्वतः प्रसरणशीलं तेजोऽधः पतति। किमिदम्? इत्येवं जनैः व्याकुलतापूर्वकं दृष्टम्।

**भावार्थः –** आकाशात् अवतरतः नारदमुनेः तेजः अलौकिकमासीत् । तस्मादेव सूर्याग्निविलक्षणम् अदृष्टपूर्वमिदं तेजः अवलोक्य जनाः विस्मयात् सम्भ्रान्ताः। तेषां मनसि सन्देहः समुत्पन्नः यत् सूर्यः आत्मनः तेजः भागद्वये विभज्य भागमेकम् अधः प्रेषयति किम्? अथवा धूमरहिताग्निः भूमिं प्रति अवतरतीति। किन्तु सन्देहस्य अस्य निवारणमपि स्वयमेव तैः कृतम् यथा – सूर्यस्य गतिस्तु तिर्यग् वर्तते। तथैव अग्नेः सर्वदा ऊर्ध्वगमनं न तु अधः आगमनम् इति। एवं जनानां विस्मयदृष्टिः इति भावः ।

**विशेषः –** अत्रोपमेयस्य मुनिधाम्नः सूर्याग्निभ्याम् उपमानाभ्यां प्रसरणधर्मेण आधिक्यवर्णनात् व्यतिरेकालङ्कारः।

**समासः–** अनूरुसारथेः = अविद्यमानौ उरुः यस्य असौ अनूरुः – नञ् बहुव्रीहिसमासः।

अनूरुः सारथिः यस्य सः अनूरुसारथिः तस्य – बहुव्रीहिसमासः।

हविर्भुजः – हविर्भुङ्क्ते इति हविर्भुक् तस्य – अलुक् समासः।

**स्वावलोकनप्रश्नाः**

१. सूर्यस्य गतिः कथं भवति?

२. कस्य ऊर्ध्वज्वलनं प्रसिद्धम्?

### १.२.३. श्रीकृष्णस्य नारदावबोधः

लोकानां मनस्सु तेजसः विषये समुत्पन्नसन्देहनिवारणं प्रस्तुतश्लोके कृतम्।

**चयस्त्विषामित्यवधारितं पुरस्ततः शरीरीति विभाविताकृतिम् ।**
**विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः।। ३।।**

**अन्वयः** – विभुः सः पुरा त्विषां चय इति अवधारितम् । ततः विभाविताकृतिं शरीरी इति, विभक्तावयवं पुमान् इति, क्रमात् अमुं नारद इति अबोधि।

**प्रतिपदार्थः** – चयः = समूहः, त्विषाम् = तेजसाम्,अवधारितम् = विनिश्चितम् , सः = हरिः, पुरा = आदौ, ततः = तदनन्तरम्, शरीरी = प्राणी, विभाविताकृतिम् = लक्षितमूर्तिम् , विभुः = सर्वव्यापी, वस्तुतत्त्वनिर्धारणसमर्थः, विभक्तावयवम्= स्पष्टविज्ञातमुखाद्यङ्गम् , पुमान् = पुरुषः, क्रमात् = क्रमेण, अमुम् = एतं मुनिम्, अबोधि = ज्ञातवान्।

**श्लोकार्थः** – सर्वसमर्थः सर्वव्यापको भगवान् श्रीकृष्णः आकाशात् अवतरन्तं देवर्षिं नारदं सर्वप्रथमं 'कान्तिपुञ्जोऽयम्' इति ज्ञातवान् । ततः समीपस्थे तस्मिन् आकृतिज्ञानानन्तरं 'देहधारी जीवोऽयम्' इति तम् अवगतवान् । पश्चात् विभक्तहस्तपादाद्यवयवं तम् अवलोक्य 'पुरुषोऽयम्' इति निर्णयं कृतवान् । अन्ते च 'अयं नारदः' इति अवबोधः तस्य जातः।

**भावार्थः** – अत्र हि 'विभुः' इति शब्दप्रयोगः श्रीकृष्णस्य कृते विद्यते। यतो हि पूर्वोक्ते श्लोके आकाशात् आयान्तं तेजःपुञ्जं विलोक्य विस्मितानां जनानां मनसि सम्भ्रमः सञ्जातः। किन्तु भगवान् श्रीकृष्णोऽपि तेजःपुञ्जः, शरीरधारी, पुमान् नारदः इत्यनेन क्रमेण ज्ञातवानिति उल्लेखः। हरिस्तु सर्ववस्तुस्वरूपनिर्धारणसमर्थः चेत् क्रमोऽयं नैव युज्यते। अतः 'संशयनिवारणाय विभुः' इति प्रयोगं विधाय लोकदृष्ट्या एवमुक्तमिति भावार्थः।

**विशेषः** – दूरवर्तिनः ज्ञानं प्रथमं तु स्पष्टं न भवति, किन्तु यथा यथा तद् वस्तु समीपमागच्छति तथा तथा तस्य अवयवयुक्तं ज्ञानं सञ्जायते इति

सामान्यनियमप्रतिपादनं महाकविना अस्य श्लोकस्य माध्यमेन कृतमस्ति। काव्यालिङ्गालङ्कारोऽस्ति अत्र।

**समासः** – विभाविताकृतिम् – विभाविता आकृतिः यस्य सः विभाविताकृतिः तम्– बहुव्रीहिसमासः।

विभक्तावयवम् – विभक्ताः अवयवाः यस्य तम् – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः** – १. श्रीकृष्णः नारदं पुमानिति कदा अबोधि?

२. भगवान् सर्ववस्तुस्वरूपनिर्धारणसमर्थः इति ज्ञापयितुं कः शब्दः श्लोकेऽस्मिन् योजितः?

## १.३. उपसंहारः

खण्डेऽस्मिन् देवर्षिनारदस्य भगवन्तं श्रीकृष्णं प्रति समागमनं सञ्जातमिति ज्ञायते। अवतरन्तं नारदं विलोक्य जनमनस्सु सम्भ्रमः समुत्पन्नः। तस्य सम्भ्रमस्य निवारणं भगवता श्रीकृष्णेन कृतमिति अवगम्यते। नारदसदृशाः महापुरुषाः परमतेजोमयाः भवन्तीति बोधः अस्मात् खण्डात् जायते।

## १.४. प्रश्नाः

१. अवतरन्तं नारदमुनिमवलोक्य जनानां मनस्सु कीदृशः सन्देहः समुत्पन्नः?

२. महाकविना कीदृशं मङ्गलाचरणमत्र निर्दिष्टम्?

३. जनानां सम्भ्रमनिवारणं केन कृतम्?

## खण्डविभाजन वैशिष्ट्यम् -

त्रयोदशखण्डेषु प्रथमसर्गान्तर्गतानां श्लोकानां विवेचनं विद्यते। सर्गेऽस्मिन् ७५ परिमिताः श्लोकास्सन्ति। अत्र विवेचने कश्चित् क्रमः विहितोऽस्ति। प्रतिश्लोकम् अन्वयं, प्रतिपदार्थम् , श्लोकार्थम् , विशेषश्च विलिख्य छात्रदृष्ट्या अवगम्यत्वं सम्पादितम् । कथावस्तु अवलम्ब्य श्लोकविभाजनम् अस्त्यत्र। श्लोकविवेचनान्ते स्वावलोकनप्रश्ना अपि योजिताः। तस्मात् श्लोकार्थः अवगतः वा न वेति छात्रैः स्वयमेव अवबोद्धुं शक्यते। श्लोकस्थितसमासपदानां विग्रहोऽपि अत्र प्रदत्तः। तेन ह्यत्र छात्राः प्रथमसर्गविषयं सविस्तरं जानन्ति।

द्वारकां प्रति इन्द्रसन्देशश्रावणाय जातं नारदागमनं हेतुपुरस्सरमिति अवगत्य यत्किमपि कार्यं निष्प्रयोजनं नास्ति छात्रज्ञानं भवति। आकाशात् भूतलं प्रति आगच्छतः नारदमुनेः अवलोकनं, श्रीकृष्णस्य नारदावबोधः ततः नारदवर्णनं च देवर्षिनारदस्य माहात्म्यं प्रतिपादयति। श्रीकृष्णस्य प्रासादे सञ्जातं नारदातिथ्यम् अस्मान् शिष्टाचारपालनम् अवबोधयति। तथैव श्रीकृष्णनारदयोः आसनस्थदर्शनं दृष्टिसुखप्रदायकम् । ततः नारदस्य आगमनप्रयोजनवर्णने आदौ श्रीकृष्णस्तवनं विधाय विषयोपस्थापनोत्तरं मुख्यविषयप्रतिपादनम् अस्मान् ज्ञापयति यत् कस्मादपि कार्यं कथं कारणीयमिति। मानवजीवनसौकर्याय आवश्यकानि कतिचन तत्त्वानि प्रथमसर्गस्य अध्ययनेन छात्राः निश्चयेन अवगच्छन्ति।

### शिशुपालवधम् -प्रथमखण्डस्य व्यासप्रश्नाः

१. प्रथमसर्गमाश्रित्य नारदवर्णनं कुरुत।

२. श्रीकृष्णविहितं नारदातिथ्यं विवेचयत।

३. शिशुपालस्य पूर्वजन्मवृत्तान्तं निवेदयत।

४. द्वारकां प्रति नारदागमनप्रयोजनं सविस्तरं प्रतिपादयत।

५. नारदस्य इन्द्रसन्देशकथनं निरूपयत।

६. अधोनिर्दिष्टश्लोकान् स्पष्टयत।

*शिशुपालवधम्*

निदाघधामानमिवाधिदीधितिं मुदा विकासं मुनिमभ्युपेयुषी।
विलोचने बिभ्रदधिश्रितश्रिणी स पुण्डरीकाक्ष इति स्फुटोऽभवत् ।।

तदिन्द्रसन्दिष्टमुपेन्द्र! यद्वचः क्षणं मया विश्वजनीनमुच्यते।
समस्तकार्येषु गतेन धुर्यतामहिद्विषस्तद् भवता निशम्यताम् ।।

पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः।।

तिरस्कृतस्तस्य जनाभिभाविना मुहुर्महिम्ना महसां महीयसाम् ।
बभार बाष्पैर्द्विगुणीकृतं तनुस्तनूनपाद्धूमवितानमाधिजैः।।

अथोपपत्तिं छलनापरोऽपरामवाप्य शैलूष इवैष भूमिकाम् ।
तिरोहितात्मा शिशुपालसंज्ञया प्रतीयते सम्प्रति सोऽप्यसः परैः।।

## द्वितीयखण्डः
## *नारदवर्णनम्*

**संरचना**

२.०. प्रस्तावना
२.१. लक्षिताधिगमांशाः
२.२. नारदवर्णनम्
  २.२.१. नारदस्य शिवौपम्यम्
  २.२.२. नारदस्य हिमालयसादृश्यम्
  २.२.३. नारदस्य बलरामेण सह सादृश्यम्
  २.२.४. नारदस्य शरन्मेघसादृश्यम्
  २.२.५. नारदस्य ऐरावतसाम्यम्
  २.२.६. नारदस्य स्फटिकजपमालावर्णनम्
  २.२.७. देवर्षेः वीणायाः लोकोत्तरत्वम्
२.३. उपसंहारः
२.४. प्रश्नाः

### २.०. प्रस्तावना

'नारदवर्णनम्' इत्यंशः 'शिशुपालवधम्' इत्यस्य महाकाव्यस्य प्रथमसर्गे विद्यते। चतुर्थश्लोकादारभ्य दशमश्लोकपर्यन्तमिदं नारदवर्णनं तत्र दृश्यते। आकाशात् अवतरन् नारदः श्रीकृष्णेन कथम् आलोकितः इत्येवात्र विविच्यते। अत्र हि शिवेन, हिमालयेन,शरन्मेघेन, ऐरावतेन तथा च बलरामेण सह नारदमुनेः साम्यम् उपवर्णितम्। तथैव नारदस्य स्फटिकमालावर्णनं वीणायाः लोकोत्तरत्वञ्च महाकविना अंशेऽस्मिन् प्रतिपादतम्। अस्माभिः सम्प्रति ते एव विषयाः बोध्यन्ते अत्र।

*शिशुपालवधम्*

## २.१.लक्षिताधिगमांशाः

* नारदमुनेः विशेषतामत्र ज्ञातुं पारयति छात्रः।
* देवर्षेः मोक्षार्थित्वम् अस्मान् प्रख्यापयति।
* नारदस्य वीणायाः वैशिष्ट्यमधिगच्छति।
* तेन महाकविमाघस्य रचनाशैली अवगम्यते।
* कविवरेण्यस्य कल्पनाशक्तिं वर्णयितुं सः सामर्थ्यमाप्नोति।

## २.२. नारदवर्णनम्

महाकविना माघेन देवर्षिनारदस्य वैशिष्ट्यं ज्ञापयितुं कतिचन श्लोकाः विरचिताः। तेन हि छात्रमनस्सु नारदस्य विशेषप्रतिमा आलिखिता भवति। तेषामेव श्लोकानां विवेचनमधुना अत्र विधीयते।अस्मात् चतुर्थश्लोकात् आरभ्य दशमश्लोकयावत् नारदवर्णनं दृश्यते।

### २.२.१. नारदस्य शिवौपम्यम्

श्लोकेऽस्मिन् देवर्षिनारदस्य शिवेन सादृश्यं प्रदर्शितम्।

**नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम् ।**
**क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना।। ४।।**

**अन्वयः** – नवान् बृहतः पयोधरान् अधोऽधः (स्थितं) समूढकर्पूरपरागपाण्डुरं क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना भूतिसितेन शम्भुना स्फुटोपमम् (अमुं नारद इत्यबोधि।)

**प्रतिपदार्थः** – नवान् = सजलान् , सद्यः सम्भृतसलिलान् , बृहतः =विपुलान् , स्थूलान् पयोधरान् = मेघान्, अधोऽधः = मेघानाम् अधस्तात् , अधःप्रदेशे समूढः =पुञ्जीकृतः, कर्पूरपरागपाण्डुरम् = कर्पूरचूर्णतुल्यधवलम् , स्फुटपमम् = उपमासादृश्यम्, व्यक्तसादृश्यम् , भूतिसितेन = भस्मलेपनेन, शम्भुना = शिवेन, शङ्करेण, गजेन्द्रकृत्तिना = गजचर्मणा, क्षणोत्क्षिप्तः = ताण्डवोत्सवेषु उपरि धारितः।

**श्लोकार्थः** – जलपूर्णत्वात् अतिनीलानां विपुलानां नवीनानां मेघानाम् अधःस्थितः नारदः एकत्रीकृतकर्पूरचूर्णवत् श्वेतवर्णीयः, तथैव मेघसमीपावस्थानक्षणे इत्युक्ते मेघानाम् अत्यन्तसंयोगात् क्षणं ताण्डवनृत्यावसरे शिवेन स्वशरीरे परिधृतेन गजचर्मणा श्वेतभस्मलेपनेन च शिवसदृशः परिलक्षितः।

**भावार्थः** – देवर्षिनारदः कर्पूरचूर्णपुञ्ज इव गौरकान्तिः आसीत् । अत एव सः भगवतः श्रीकृष्णस्य पुरतः यदा आकाशे नवीनघननीलमेघानाम् अधःस्थितः आसीत् तदा अतीव धवलः दृश्यते स्म। अपि च मेघानाम् अत्यधिकनिकटत्वात् क्षणकालं ताण्डवनृत्योत्सवावसरे गजचर्म उत्तरीयरूपेण परिदधानः चर्चितशरीरः शुभ्रवर्णः शङ्कर इव दृग्गोचरः भवति स्म।

**विशेषः** – श्लोकेऽस्मिन् ताण्डवनृत्यावसरे शिवः गजेन्द्रचर्म परिधरतीति उल्लेखोऽस्ति। तस्य सन्दर्भः पुराणे उपलभ्यते। पुरा गजासुरः इति कश्चित् दानवः आसीत् । सः निरन्तरं क्रूरकर्मभिः जनान् पीडयति स्म। तस्मात् जगत् त्रस्तम् । आसीत् तस्य वधोऽपि दुष्करः। यतो हि मृत्योः अनन्तरमपि यदि तस्य चर्म भूमिस्पर्शं करोति तर्हि सः पुनर्जीवितः भवति स्म। देवानां प्रार्थनया भगवता शङ्करेण तस्य वधः कृतः अपि च गजासुरस्य चर्म स्वशरीरे परिधृतं येन तत् भूमिस्पर्शं न कुर्यात् । तस्मात् 'कृत्तिवासस्'इत्यपि शिवस्य सम्बोधनम्।

जलपूर्णाः मेघाः गजाः इव कृष्णवर्णीयाः। शिवश्च भस्मचर्चितशरीरः। तस्मात् गौरवर्णीयः नारदः धृतगजचर्मशिव इव। एवं शम्भुना सह सादृश्यं प्रदर्श्य शिवौपम्यं दर्शितम्। अतः उपमालङ्कारः अत्र।

समासः – पयोधरान् – पयः धरतीति पयोधरः तान् – उपपदतत्पुरुषसमासः

स्फुटोपमम् – स्फुटा उपमा यस्य सः तम् – बहुव्रीहिसमासः।

भूतिसितेन – भूत्या सितः तेन – तृतीया तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. नारदस्य केन सह सादृश्यं प्रदर्शितम् ?

२. कः समूढकर्पूरपरागपाण्डुरः?

## २.२.२. नारदस्य हिमालयसादृश्यम्

श्लोकेऽस्मिन् हिमालयेन सह नारदस्य तुलना कृता वर्तते।

दधानमम्भोरुहकेसरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम्।
विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव।। ५।।

**अन्वयः** - अम्भोरुहकेशरद्युतीः जटाः दधानम् , शरच्चन्द्रमरीचिरोचिषम् (अत एव) विपाकपिङ्गाः तुहिनस्थलीरुहः व्रततीततीः (दधानम्) धराधरेन्द्रम् इव।

**प्रतिपदार्थः** - दधानम् = धारयन्तम्, अम्भोरुहकेसरद्युतीः = कमलकिञ्जल्कप्रभाः, जटाः = सटाः, केशाः, शरच्चन्द्रमरीचिरोचिषम् = शरदिन्दुकान्तिधवलम् , विपाकपिङ्गा = परिणामपिङ्गाः, तुहिनस्थलीरुहः = तुषारभूमिसमुत्पन्नाः, व्रततीततीः = लतासमूहान्, लतापङ्क्तीः, धराधरेन्द्रम् = पर्वतराजं, हिमालयम्।

**श्लोकार्थः** - आकाशात् अवतीर्णमाणः देवर्षिनारदः शरच्चन्द्रधवलः सन् कमलकिञ्जल्कसदृशपिङ्गलवर्णाः जटाः धारयन् हिमभूमौ रूढाः परिपक्वतया पीतवर्णाः लताः बिभ्राणः पर्वतराजो हिमालय इव विद्योतते स्म।

**भावार्थः** - नारदः गौरवर्णीयः तेन हि शरत्कालीनचन्द्रमरीचिरिव रोचिः इति पिङ्गलवर्णाः जटाः इत्यस्मात् धवलहिमालये प्ररूढाः परिपक्वपीतलताः इति प्रतीतिः नारदस्य हिमालयसाम्यं द्योतयति।

**विशेषः** - अत्र हि उपमालङ्कार। विपाकपिङ्गाः जटा इति विशेषणं नारदस्य जीवनानुभवतां प्रतिपादयति।

समासः – विपाकपिङ्गाः = विपाकेन पिङ्गाः – तृतीयातत्पुरुषसमासः।

शरच्चन्द्रमरीचिरोचिषम् – शरच्चन्द्रस्य मरीचय इव रोचिः यस्य सः, तम् – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. नारदस्य जटाद्युतिः कीदृशी?

२. नारदः केन साम्यं वहति?

### २.२.३. नारदस्य बलरामेण सह सादृश्यम्

अस्मिन् श्लोके मुनेः नारदस्य बलभद्रेण सह औपम्यं प्रदर्शितम्।

**पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युतिः।**
**सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम् ।। ६।।**

**अन्वयः** – पिशङ्गमौञ्जीयुजम् अर्जुनच्छविम् अञ्जनद्युति एणाजिनं वसानम् (अत एव) सुवर्णसूत्राकलिताधराम्बरां शितिवाससः तनुं विडम्बयन्तम्।

**प्रतिपदार्थः** –पिशङ्गमौञ्जीयुजम् = पिङ्गलवर्णमुञ्जनिर्मितमेखलाधारणम्, अर्जुनच्छविम् = धवलकान्तिम् , गौरवर्णम् , अञ्जनद्युतिः = कज्जलच्छविः, कृष्णवर्णः, एणाजिनम् = कृष्णमृगचर्म, वसानम् = आच्छादयन्तम् , सुवर्णसूत्रम् = कनकसूत्रम् , आकलितम्= ग्रथितम् , बद्धम् , अधराम्बरम् = कटिवस्त्रम् , तनुम् = शरीरम्, विडम्बयन्तम् = अनुकुर्वन्तम् , शितिवाससः = बलभद्रस्य, नीलाम्बरस्य रामस्य।

**श्लोकार्थः** – पीतवर्णमुञ्जनिर्मितमेखलाधारिणः पुनश्च स्वयं शुभ्रवर्णः, तथा च कृष्णमृगचर्मपरिदधानः देवर्षिनारदः सुवर्णमेखलाबद्धनीलधौतवस्त्रधारिणः बलराम इव प्रतीयते स्म।

**भावार्थः** – मुञ्जतृणविशेषः तन्मयी मेखला मौञ्जीति। तत्तृणं पीतवर्णीयः भवति। बलरामोऽपि कृष्णमृगचर्म परिधरति अपि च सुवर्णमेखलां परिधानं करोति। तेन हि कृष्णवर्णमृगचर्म दधानः नारदः बलरामेण सह साम्यं बिभर्तीति वर्णनम्।

**विशेषः** – उपमालङ्कारोऽस्ति। नारदस्य बलरामेण सह सादृश्यं प्रदर्श्य श्रीकृष्णस्य मनसि बन्धुत्वभावजननं सञ्जातमिति भावः।

समासः – पिशङ्गमौञ्जीयुजम् – पिशङ्ग्या मौञ्ज्या युज्यते इति पिशङ्गमौञ्जीयुक् , तम् –तत्पुरुषसमासः।

अर्जुनच्छविम् – अर्जुना छविः यस्य तम् – बहुव्रीहिसमासः।

सुवर्णसूत्राकलिताधराम्बराम् – सुवर्णसूत्रेण आकलितम् अधराम्बरं यस्याः ताम् – बहुव्रीहिसमासः।

शितिवाससः – शितिवासः यस्य सः शितिवासस् तस्य – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः** –

१. शितिवाससः तनुं कः विडम्बयति?

२. नारदस्य वसानं कीदृशम्?

### २.२.४. नारदस्य शरन्मेघसादृश्यम्

शरत्कालस्य विद्युत्गणैरिव नारदः उपलक्षित इत्येव वर्णनं प्रस्तुते श्लोके उपलभ्यते।

**विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभिः।**
**कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव।। ७।।**

**अन्वयः** – विहङ्गराजाङ्गरुहैः इव आयतैः हिरण्मयोर्वीरुहवल्लितन्तुभिः कृतोपवीतं हिमशुभ्रम् (अत एव) घनान्ते तडितां गणैः (उपलक्षितम्) उच्चकैः घनमिव।

**प्रतिपदार्थः** – विहङ्गराजाङ्गरुहैः = गरुडलोमभिः, आयतैः = दीर्घैः, हिरण्मयोर्वीरुहवल्लितन्तुभिः = सुवर्णमयभूमिसमुत्पन्नलतासूत्रैः, कृतोपवीतम् = विरचितयज्ञसूत्रम्, हिमशुभ्रम् = तुषारधवलम्, घनान्ते = शरदि, तडिताम् = विद्युताम्, गणैः = समूहैः, उच्चकैः = उन्नतम् , घनम् = मेघम्।

**श्लोकार्थः** – पक्षिराजगरुडस्य लोमतुल्यदीर्घैः सुवर्णमयभूमिसमुत्पन्नलतासूत्रैः निर्मितं यज्ञोपवीतं दधानः हिमवदतिशुभ्रवर्णीयः नारदः शरत्काले विद्युत्समूहैर्युक्तं शुभ्रवर्णमेघवत् आलोकितः।

**भावार्थः** – वर्षाकालादनन्तरं शरत्काले मेघाः जलरहिताः भवन्ति। अतः श्वेतवर्णीयाः दृश्यन्ते। नारदस्य यज्ञोपवीतमपि पीतवर्णयुक्तः इत्यस्मात् तडितां गणैस्सह नारदस्य साम्यं महाकविना प्रतिपादितम् ।

**विशेषः** – उत्प्रेक्षालङ्कारः श्लोकेऽस्मिन् वर्तते।

समासः – कृतोपवीतम् – कृतम् उपवीतं येन तम् – बहुव्रीहिसमासः।

घनान्ते – घनानाम् अन्तः – घनान्तः, तस्मिन् – षष्ठीतत्पुरुषसमासः।

हिरण्मयोर्वी – हिरण्यस्य विकारः– षष्ठी तत्पुरुषसमासः ।

हिरण्यमयी उर्वी – कर्मधारयसमासः ।

**स्वावलोकनप्रश्नाः**

१. नारदस्य यज्ञोपवीतं केन निर्मितमासीत् ?

२. घनान्ते घनाः कथं भवन्ति?

## २.२.५. नारदस्य ऐरावतसाम्यम्

अस्मिन् पद्ये नारदः इन्द्रवाहनम् ऐरावतमिव चकासते इति वर्णितम्।

निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसिताङ्गसङ्गिना।
चकासतं चारुचमूरुचर्मणा कुथेन नागेन्द्रमिवेन्द्रवाहनम् ।। ८।।

**अन्वयः** – निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसिताङ्गसङ्गिना चारुचमूरुचर्मणा कुथेन नागेन्द्रम् इन्द्रवाहनम् इव चकासतम्।

**प्रतिपदार्थः**–निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा = स्वाभाविकविविधवर्णभास्वराणुलोम्ना, लसद्बिसच्छेदः = शोभमानमृणालखण्डः, सिताङ्गसङ्गिना = बद्धबलाङ्गसंसक्तेन, चारुणा = मनोहरेण, चमूरुचर्मणा = मृगचर्मणा, कुथेन = पृष्ठास्तरणेन, इन्द्रवाहनम् = महेन्द्रवाहनम् , नागेन्द्रम् = गजराजम्, चकासतम् = शोभमानम् , सिताङ्गम् = शुभ्रशरीरम्।

**श्लोकार्थः** – स्वाभाविकविविधवर्णलोम्ना शोभायमानमृणालखण्डवत् शुभ्रवर्णः नारदः स्वशरीरे मनोहरं मृगचर्म परिधानमकरोत् । तस्मात् पृष्ठास्तरणेन सः इन्द्रवाहनं गजराजः ऐरावतः इव शोभते स्म।

**भावार्थः** – देवर्षिनारदः चित्रविचित्रवर्णम् उज्ज्वलं मृगचर्म उत्तरीयरूपेण परिधृतवान्। अतः इन्द्रवाहनस्य ऐरावतस्य शोभाधारकनारदः श्रीकृष्णेन अवलोकितः इति भावः। नारदऐरावतयोः साम्यमत्र उपवर्णितम् ।

**विशेषः** – उत्प्रेक्षालङ्कारः।

**स्वावलोकनप्रश्नाः**

१. इन्द्रवाहनं किम्?

२. श्लोकेऽस्मिन् कः अलङ्कारः?

### २.२.६. नारदस्य स्फटिकजपमालावर्णनम्

नारदस्य जपमाला कीदृशी आसीत् ? इत्यस्य वर्णनमत्र वर्तते।

**अजस्रमास्फालितवल्लकीगुणक्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया।**
**पुरः प्रवालैरिव पूरितार्धया विभान्तमच्छस्फटिकाक्षमालया।। ९।।**

**अन्वयः** – अजस्रम् आस्फालित वल्लकीगुणक्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया पुरः प्रवालैः पूरितार्धया इव अच्छस्फटिकाक्षमालया विभान्तम्।

**प्रतिपदार्थः** -अजस्रम् = अनवरतम् , निरन्तरम् , आस्फालितः = ताडितः, वल्लकीगुणः = वीणातन्त्री, क्षतोज्ज्वलाङ्गुष्ठनखांशुः = सङ्घर्षेण उज्ज्वलैः अङ्गुष्ठनखकिरणैः, भिन्नया = मिश्रणेन, पुरः = अग्रभागे, प्रवालैः = विद्रुमैः, पूरितार्धया = प्रवेशितार्धभागेन, विभान्तम् = शोभमानम् , अच्छा = निर्मला, स्फटिकाक्षमालया = स्फटिकमणिनिर्मितमालया।

**श्लोकार्थः** - निरन्तरं वीणावादनेन वीणातन्त्रीभिः घर्षणेन नारदस्य उज्ज्वलाङ्गुष्ठः आरक्तवर्णः सञ्जातः। ततः अङ्गुष्ठस्य नखस्य च रक्ताभा सम्मिश्य प्रवालैः पूरितार्धभागः इव निर्मलस्फटिकमाला अग्रभागे भासते स्म।

**भावार्थः** - देवर्षिनारदः स्फटिकजपमालया सततं नामजपमनुतिष्ठति स्म। पाणौ च वीणां गृह्णन् निरन्तरं तस्याः तन्त्रीः आस्फालयति स्म। तासां सङ्घटनेन तस्य अङ्गुष्ठनखः आरक्त अभवत् । तस्य किरणैः रञ्जिता स्वच्छस्फटिकमाला पूर्वार्द्धैः विद्रुमैः पूरिता इव प्रतीयते स्म। यतो हि अङ्गुष्ठस्य रक्ताभा स्फटिकमालायां प्रतिबिम्बिता भूत्वा विद्रुमशोभां धारयति स्म इति भावः।

**विशेषः** -'स्फटिको मोक्षदः परम्' इति विधानेन हस्ते स्फटिकजपमालाग्रहणं नारदस्य मोक्षार्थित्वं ज्ञापयति। अत्र तद्गुणालङ्कारोऽस्ति।

समासः - अच्छस्फटिकाक्षमालया - अच्छा स्फटिकाक्षमाला तया- कर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. अच्छस्फटिकाक्षमाला कथं प्रतीयते स्म?

२. नारदस्य उज्ज्वलाङ्गुष्ठः कस्मात् आरक्तः सञ्जातः?

## २.२.७. देवर्षेः नारदस्य वीणायाः लोकोत्तरत्वम्

देवर्षिनारदः निजवीणायाः वारं वारम् अवलोकनं करोति स्म इति प्रस्तुते श्लोके वर्णितम्।

**रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः।**

**स्फुटीभवद्ग्रामविशेषमूर्च्छनामवेक्षमाणं महतीं मुहुर्मुहुः।। १०।।**

**अन्वयः** – नभस्वतः आघट्टनया पृथक् रणद्भिः विभिन्नश्रुतिमण्डलैः स्वरैः स्फुटीभवद्ग्रामविशेषमूर्च्छनां महतीं मुहुर्मुहुः अवेक्षमाणम्।

**प्रतिपदार्थः** – रणद्भिः = शब्दायमानैः स्वरैः, ध्वनद्भि, नभस्वतः = वायोः, आघट्टनया = आघातेन, मुहुर्मुहुः = पुनः पुनः, भृशम् , अवेक्षमाणम् = पश्यन्तम् , विभिन्नश्रुतिमण्डलैः = प्रतिनियतसङ्ख्यया व्यवस्थितस्वरारम्भकशब्दविशेषसमूहैः, पृथक् = भिन्नः, महतीम् = महतीनाम्नीं वीणाम्, ग्रामविशेषमूर्छना = षड्जाद्यपरनामकानां स्वरसङ्घातभेदानां स्वरारोहावरोहक्रमभेदाः।

**श्लोकार्थः** – वायोः आघातेन वीणातन्त्रीभ्यः श्रूयमाणः ध्वनिः पृथक् पृथक् श्रुतिमण्डलस्वरैः ग्रामविशेषाणां षड्जाद्यपरनामकान् स्वरसङ्घातभेदान् स्फुटीकरोति स्म। अतः तां महतीनाम्नीं निजवीणां पुनः पुनः पश्यन्तं नारदं श्रीकृष्णः दृष्टवान्।

**भावार्थः** – नारदमुनिः महतीनाम्नीं निजवीणाम् आदाय भूतलं प्रति आगच्छन् आसीत् । तदा वायोः आघातेन वीणातन्त्री ध्वनति स्म। अपि च ततः षड्जादयः सप्तस्वराः स्फुटीभवन्तः ग्रामविशेषान् स्वर – आरोह – अवरोहक्रमभेदान् ज्ञापयन्ति स्म। पुरुषप्रयत्नेन विना एवं स्वराणाम् उत्पत्तिं दृष्ट्वा नारदः कौतुकात् स्वकीयवीणां वारं वारम् अवलोकयति स्म। अत्र नारदस्य वीणायाः लोकोत्तरत्वमिति भावः।

**विशेषः** – उपर्युक्तश्लोकः महाकवेः माघस्य सङ्गीतज्ञानं प्रतिपादयति। तथैव नारदस्य वीणायाः नाम 'महती' इति प्रस्तुतश्लोकात् ज्ञायते। यथा हि –

**विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती।**

**महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपी।।**इति।

श्लोकेऽस्मिन् श्रुतिर्नाम स्वरारम्भकावयवः शब्दविशेषः। स्वरारोहावरोहक्रमभेदाः नाम मूर्च्छना इति। ग्रामः इत्युक्ते स्वराणां सन्दोहः। षड्जग्रामः, मध्यमग्रामः तथा च गान्धारग्राम इति ग्रामत्रयम्। तत्र हि सप्तस्वराः एकविंशतिः मूर्च्छनाः च सन्ति। एवं सङ्गीतशास्त्रे उलब्धाः पारिभाषिकशब्दाः महाकविना अत्र योजिताः। इदमेव प्रमाणमस्ति यत् महाकवेः सङ्गीतशास्त्रस्य परिचयः अस्ति इति। अत्र हि अतिशयोक्तिः अलङ्कारोऽस्ति।

समासः – श्रुतिमण्डलैः = श्रुतीनां मण्डलानि तैः षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. नारदस्य वीणायाः नाम किम्?

२. नारदः मुहुर्मुहुः कां पश्यति?

## २.३. उपसंहारः

आगच्छन्तं नारदं वीक्ष्य श्रीकृष्णस्य मनसि के विचाराः समुत्पन्नाः? इत्येव द्वितीयखण्डेऽस्मिन् उपवर्णितम्। नारदमुनिम् अवलोक्य भगवान् श्रीकृष्णः शिवं, हिमालयं, बलरामं, शरन्मेघम् ऐरावतञ्च अस्मरत्। तस्य स्फटिकमालायाः वीणायाश्च अलौकिकत्वमत्र समुल्लिखितम्। अनेन छात्राः देवर्षिनारदस्य माहात्म्यम् अवगच्छन्ति। महाकवेः कल्पनाशक्तिम् अवगत्य 'उपमा कालिदासस्य' इति पद्यपङ्क्तेः सार्थकतामनुभवन्ति।

## २.४. प्रश्नाः

१. महाकविना नारदस्य वाणायाः लोकात्तरत्वं कथं प्रतिपादितम्?

२. नारदस्य शिवौपम्यं हिमालयसादृश्यञ्च वर्णयत।

ꙮ

## तृतीयखण्डः
## *नारदस्वागतम्*

### संरचना


३.०. प्रस्तावना

३.१. लक्षिताधिगमांशाः

३.२. नारदस्वागतम्

 ३.२.१. श्रीकृष्णद्वारा नारदस्य आदरातिथ्यम्

 ३.२.२. श्रीकृष्णस्य शिष्टाचारपालनम्

 ३.२.३. नारदस्य भुवि चरणन्यासः

 ३.२.४. श्रीकृष्णकृतं देवर्षिनारदपूजनम्

 ३.२.५. देवर्षेः उपावेशनम्

३.३. आसनस्थश्रीकृष्णनारदयोः वर्णनम्

३.४. नारदपूजनेन श्रीकृष्णस्य प्रसन्नता

३.५. उपसंहारः

३.६. प्रश्नाः


### ३.०. प्रस्तावना

'शिशुपालवधम्' इत्यस्य महाकाव्यस्य प्रथमसर्गे 'नारदस्वागतम्' इत्ययम् अंशः समुपलभ्यते। एकादशश्लोकादारभ्य पञ्चदशश्लोकपर्यन्तं 'श्रीकृष्णविहितं नारदस्वागतं' महाकविना उपवर्णितम्। ततः षोडशे श्लोके आसनस्थश्रीकृष्णनारदयोः शोभा तथा च सप्तदशे श्लोके नारदपूजनेन श्रीकृष्णस्य प्रसन्नता समुपवर्णिता। तथैव भगवतः श्रीकृष्णस्य शिष्टाचारपालनम् अस्मान् अतिथिपूजनं ज्ञापयति। अत्र देवर्षेः गौरवाधिक्यं प्रतिपाद्य मुनिपूजनहेतुः बोधितः। मानवजीवने अतिथिस्वागतम् अतीव महत्त्वं भजते। भारतीयसंस्कारेषु सोऽपि कश्चन संस्कारः इत्यस्मात् अंशोऽयमत्र सविस्तरं स्पष्टीक्रियते।

## ३.१. लक्षिताधिगमांशाः

* नारदमुनेः माहात्म्यमत्र ज्ञातुं प्रभवति ।
* स्वागतसंस्कारविषये ज्ञानं प्राप्नोति ।
* पूज्यानां स्वागताय ईश्वरोऽपि समुपस्थित इत्यवगच्छति ।
* महाकवेः माघस्य अतिथिसंस्कारज्ञानमासीत् इत्यवलोकयति ।
* महाजनाः स्वकर्तव्यपालनात् च्युताः नैव भवन्तीति अभिजानाति ।

## ३.२.नारदस्वागतम्

भगवन्तं श्रीकृष्णं प्रति नारदागमनं सञ्जातम् । 'अतिथिः देवो भव' इति विचिन्त्य श्रीकृष्णेन नारदस्वागतं विहितम् । इदं शिष्टाचारपालनं सर्वैः अवगन्तव्यमिति धिया अंशोऽयमत्र प्रस्तूयते ।

### ३.२.१. श्रीकृष्णद्वारा नारदस्य आदरातिथ्यम्

प्रस्तुते श्लोके नारदस्य द्वारकाप्राप्तिः सूचिता।

**निवर्त्य सोऽनुव्रजतः कृतानतीनतीन्द्रियज्ञाननिधिर्नभःसदः।**
**समासदत् सादितदैत्यसम्पदः पदं महेन्द्रालयचारुचक्रिणः।। ११।।**

**अन्वयः** - अतीन्द्रियज्ञाननिधिः सः कृतानतीन् अनुव्रजतः नभःसदः निवर्त्य सादितदैत्यसम्पदः चक्रिणः महेन्द्रालयचारु पदं समासदत् ।

**प्रतिपदार्थः** - निवर्त्य = परावर्त्य, प्रतिषिध्यः, सः = मुनिः, अनुव्रजतः = अनुगच्छतः, कृतानतीन् = कृतप्रणामान् , अतीन्द्रियः = चक्षुरादीन्द्रियागोचरः, ज्ञाननिधिः = सर्ववस्तुद्रष्टा, सर्वार्थद्रष्टा, नभःसदः = देवान् , सुरान् , समासदत् = प्राप्तवान् , पदं = स्थानम् , चक्रिणः = कृष्णस्य , सादितदैत्यसम्पदः = सादिता = नाशिता, विध्वस्तीकृता, दैत्यसम्पदः = दैत्यानां, असुराणां वा सम्पत्तिः, महेन्द्रालयचारु इन्द्रभवनमिव भासमानम् , रमणीयम् ।

**श्लोकार्थः** - सर्वार्थद्रष्टा सः मुनिः कृतप्रणामान् अनुगच्छतः देवान् परावर्त्य दैत्यसम्पत्तिविनाशकस्य श्रीकृष्णस्य इन्द्रभवनमिव भासमानं प्रासादं प्राप्तवान्।

**भावार्थः** – देवर्षिनारदः देशकालातिक्रान्तानां सर्वविषयानां द्रष्टा आसीत्। अत एव आकाशे विचरणशीलाः देवाः तम् अनुसरन्तः प्रणमन्ति स्म। अधुनापि देवताः तम् अनुगच्छन्तः आसन् । तस्मात् तान् परावर्त्य तेषां प्रणामान् च स्वीकृत्य देवर्षिः सुदर्शनचक्रेण आसुरसम्पत्तेः संहारकस्य भगवतः श्रीकृष्णस्य प्रासादं प्राप्तवान्। सः प्रासादः इन्द्रप्रासाद इव रमणीयः सुन्दरश्चासीत्।

**विशेषः** – देवर्षिनारदस्य सर्वविषय़द्रष्टत्वमत्र प्रतिपादितम्। अनुप्रासालङ्कारः अत्र।

समासः – अतीन्द्रियज्ञाननिधिः–अतीन्द्रिया इन्द्रियमतिक्रान्ता – अव्ययीभावसमासः।

ज्ञाननिधिः – ज्ञानस्य निधिः = षष्ठीतत्पुरुषसमासः।

नभःसदः – नभसि सीदन्ति इति = उपपदतत्पुरुषः।

महेन्द्रालयः – महेन्द्रस्य आलयः = षष्ठीतत्पुरुषसमासः।

चक्रिणः – चक्रं यस्य हस्ते सः चक्रिणः तस्य = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. कः अतीन्द्रियज्ञाननिधिः?

२. नारदः कुत्र समासदत्?

## ३.२.२.श्रीकृष्णस्य शिष्टाचारपालनम्

शिष्टाचारस्य पालनं कुर्वन् श्रीकृष्णेन नारदस्वागतं कृतमिति प्रस्तुते श्लोके महाकविमाघेन उल्लिखितम् ।

**पतत् पतङ्गप्रतिमस्तपोनिधिः पुरोऽस्य यावन्न भुवि व्यलीयत।**
**गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः।। १२**

**अन्वयः** – पतत्पतङ्गप्रतिमः तपोनिधिः अस्य पुरः भुवि यावत् न व्यलीयत, तावत् अच्युतः गिरेः तडित्वान् इव उच्चकैः पीठात् जवेन उदतिष्ठत्।

**प्रतिपदार्थः** – पतत् पतङ्गप्रतिमः = निष्पतत्सूर्यसदृशः, ‘ पतङ्गौ पक्षिसूर्यौ ’च इत्यमरः। पीठात् = आसनात् , जवेन = वेगेन, तपोनिधिः = मुनिः, अच्युतः = हरिः, श्रीकृष्णः, भुवि = भूमौ, व्यलीयत = अतिष्ठत्, गिरेः = शैलात्, पर्वतात् , तडित्वानिव = मेघ इव, उच्चकैः = उन्नतात् , उदतिष्ठत् = उत्थितवान्

**श्लोकार्थः** – निष्पतत्सूर्यसदृशः तेजस्वी तपोनिधिः (नारदः) अस्य (श्रीकृष्णस्य) पुरतः भूमौ यावत् नातिष्ठत् तावत् श्रीकृष्णः शैलात् मेघ इव उन्नतात् आसनात् वेगेन उत्थितवान् ।

**भावार्थः** – सूर्यतुल्यः तेजस्वी नारदः श्रीकृष्णसम्मुखं यावत् नावतरत् तत्पूर्वमेव भगवान् श्रीकृष्णः तस्य स्वागतं कर्तुं पर्वततुल्यात् उन्नतात् आसनात् सिंहासनात् वा उत्थितवान्। तदा सः कृष्णः पर्वतात् प्रादुर्भूतः तडित्वान्मेघ इव विद्योतते स्म। यतो हि श्यामवर्णीयः कृष्णः सुवर्णसिंहासनात् अधः अवातरत् । मुनिचरणस्य भूस्पर्शात् प्रागेव श्रीकृष्णः स्वयमुत्थिवान्निति भावः।

**विशेषः** – श्रीकृष्णः शास्त्रम् अनुसृतवान् इत्यभिप्रायः। मनुस्मृत्यनुसारं वृद्धपुरुषः वा महापुरुषः वा आयाति चेत् युवकैः उत्थाय अभिवादनं करणीयमिति। श्रीकृष्णेनापि एवं शिष्टाचारपालनम् अनुष्ठितम् । अत्र ‘पतत्पतङ्गप्रतिमः’ इति विशेषणं नारदस्य महातेजः सूचयति। उत्प्रेक्षालङ्कारः श्लोकेऽस्मिन् विद्यते।

समासः – तडित्वान् – तडितोऽस्य सन्तीति तडित्वान् = तत्पुरुषसमासः।

पतङ्गप्रतिमः – पतङ्गः इव प्रतिमा यस्य सः पतङ्गप्रतिमः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. अच्युतः जवेन कस्मात् उदतिष्ठत्?

२. पतङ्गप्रतिमस्तपोनिधिः कः?

### ३.२.३. नारदस्य भुवि चरणन्यासः

**नारदमुनेः पादन्यासस्य प्रभावः श्लोकेऽस्मिन् उपवर्णितः।**

**अथ प्रयत्नोन्नमितानमत्फणैर्धृते कथञ्चित्फणिनां गणैरधः।**

**न्यधायिषातामभिदेवकीसुतं सुतेन धातुश्चरणौ भुवस्तले।।१३।।**

**अन्वयः** - अथ धातुः सुतेन प्रयत्नोन्नमितानमत्फणैः फणिनां गणैः अधः कथञ्चित् धृते भुवः तले अभिदेवकीसुतं चरणौ न्यधायिषाताम्।

प्रतिपदार्थः - धातुः = ब्रह्मदेवस्य, अथ = श्रीकृष्णस्य उत्थानान्तरम् , धृते = ऊढे,उत्तोलिते, न्यधायिषाताम् = निहितौ, स्थापितौ, चरणौ = पादौ, सुतेन = पुत्रेण, भुवस्तले = भूमौ, भूतले, प्रयत्नोन्नमिताः = यत्नेन उन्नमिताः, फणिनां गणैः= सर्पसमूहैः, अभिदेवकीसुतम् = श्रीकृष्णस्य सम्मुखम्।

**श्लोकार्थः** - तदनन्तरं (श्रीकृष्णस्य अभ्युत्थानानन्तरं) फणानां गणैः आनमन्तः फणाः महत्प्रयत्नैः उत्तोलिताः तथापि अधःप्रदेशे आनताः भवन्ति स्म। ततः कथञ्चित् फणिगणैः स्थिरीकृते भूतले धातुः पुत्रेण (नारदेन) श्रीकृष्णस्य पुरतः पादौ स्थापितौ।

**भावार्थः** - 'पातालस्थसर्पफणानाम् उपरि पृथिवी स्थिता अस्ति' इति वर्णनं पुराणेषु उपलभ्यते। यदा नारदमुनिः भूपृष्ठे पादन्यासं कर्तुम् उद्युक्तः तदा मुनिपादान्यासभारात् पृथिव्याः भारः वर्धितः। अपि च धरित्रीभारवशात् फणिनां फणाः आनमन्ति स्म, फणिनश्च ताः उन्नमयन्ति चेदपि आनताः एव अभवन् । अस्यां स्थितौ तैः कथञ्चित् भूतले स्थिरीकृते सति देर्वषिनारदः श्रीकृष्णस्य सम्मुखं चरणौ स्थापितवान् । तात्पर्यं नारदस्य भूतलस्पर्शेन फणिनः अपि पृथिव्याः भारं सोढुम् असमर्थाः अभवन् ।

**विशेषः** - अत्र फणानां नमनोन्नमने नारदमुनेः गौरवाधिक्यमेव प्रतीयते। अतिशयोक्ति-अलङ्कारेण अलङ्कृतोऽयं श्लोकः।

**समासः** - अभिदेवकीसुतम् - देवकीसुतम् अभिलक्ष्य - अव्ययीभावसमासः।

**स्वावलोकनप्रश्नाः**

१. अभिदेवकीसुतं केन चरणौ स्थापितौ?

२. के प्रयत्नेन उन्नमिताः अपि आनमन्ति स्म?

## ३.२.४. श्रीकृष्णकृतं देवर्षिनारदपूजनम्

भगवता श्रीकृष्णेन विधिवत् नारदपूजनं विधाय स्वागतकर्म आचरितम् इत्येव श्लोकेऽस्मिन् समुपवर्णितम्।

**तमर्घ्यमर्घ्यादिकयाऽऽदिपूरुषः सपर्यया साधु स पर्यपूपुजत्।**
**गृहानुपैतुं प्रणयादभीत्सवो भवन्ति नापुण्यकृतां मनीषिणः।। १४।।**

**अन्वयः** – आदिपुरुषः सः अर्घ्यं तत् अर्घ्यादिकया सपर्यया साधु पर्यपूपुजत्। मनीषिणः अपुण्यकृतां गृहान् प्रणयात् उपैतुम् अभीप्सवः न भवन्ति।

**प्रतिपदार्थः** –तम् = नारदम्, अर्घ्यम् = पूज्यम् , अर्घ्यादिकया = अर्घ्यमादिपूजासाहित्येन, आदिपुरुषः = पुराणपुरुषः, सपर्यया = पूजया, साधु =विधिवत् , यथावत् , पर्यपूपुजत् = परिपूजितवान् , सः = कृष्णः, अभीप्सवः = इच्छुकाः, गृहान् = गृहाणि, उपैतुम् = प्राप्तुम् , मनीषिणः = विद्वांसः, सन्तः, अपुण्यकृताम् = पापात्मनाम् , पुण्यम् अकृतवताम् , प्रणयात् =स्नेहात्, प्रीत्या।

**श्लोकार्थः** – सः आदिपुरुषः श्रीकृष्णः पूजनीयं नारदम् अर्घ्यादिपूजाद्रव्यैः यथावत् विधेरनुसारं वा परिपूजितवान्। यतः मनीषिणः पुण्यम् अकृतवतां गृहाणि प्रीत्या गन्तुम् इच्छुकाः न भवन्ति।

**भावार्थः** – भगवान् श्रीकृष्णः गृहमागतं देवर्षिनारदम् अर्घ्यादिषोडशोपचारविधिना सम्यक् अपूजयत् । पुराणपुरुषस्य तस्य कृते अपि सः पूजनीय आसीत् । भगवता एतत् समुचितमेव अनुष्ठितम् । यतः सदसद्विवेकशालिनः महात्मनः पुण्यात्मनां गृहेष्वेव पदार्पणं कुर्वन्ति न तु पापात्मनाम् । महात्मा नारदोऽपि पुण्यात्मनः श्रीकृष्णस्य भवनमागतः इत्यस्मात् यथोचितं पूजनं युज्यते एव।

**विशेषः** – 'अतिथिः देवो भव' इति भारतीयसंस्कृतिः। तस्मादेव गृहमागतानां सर्वेषां पूजनं विधातव्यम् । तत्रापि पुण्यवतां पूजनीयानाञ्च समागमनं महते भाग्याय कल्पते। यतो हि तादृशाः समादरणीयाः सर्वत्र नैव गच्छन्ति। अपि च तेषां पूजनं सकृत् लाभाय भवति। महात्मानः अपि शान्तिप्रदायकं पुण्यवतः गृहमेव प्रीत्या गन्तुम् अभिलषन्ते। यतः पापीनः गृहे अनाचारप्रभावः मनस्तापं जनयति।

एवमस्मिन् श्लोके सतां स्वभावः वर्णितः। श्लोकस्य द्वितीयचरणं सुभाषितं वर्तते। अर्थान्तरन्यासालङ्कारः श्लोकेऽस्मिन् दृश्यते ।

**स्वावलोकनप्रश्नाः**

१. आदिपुरुषः कं पर्यपूजयत्?

२. मनीषिणः प्रणयात् कुत्र गन्तुं नेच्छन्ति?

### ३.२.५. श्रीकृष्णद्वारा देवर्षेः उपावेशनम्

भगवान् श्रीकृष्णः देवर्षिनारदाय उपवेष्टुं स्वयम् आसनं दत्तवान् इत्येव अत्र वर्णितम्।

**न यावदेतावुदपश्यदुत्थितौ जनस्तुषाराञ्जनपर्वताकृती।**
**स्वहस्तदत्ते मुनिमासने मुनिश्चिरन्तनस्तावदभिन्यवीविशत् ।। १५**

**अन्वयः** – जनः उत्थितौ एतौ तुषाराञ्जनपर्वतौ इव यावत् न उदपश्यत् तावत् चिरन्तनः मुनिः स्वहस्तदत्ते आसने मुनिम् अभिन्यवीविशत्।

**प्रतिपदार्थः** – उदपश्यत् = दृष्टवान् , उत्प्रेक्षितवान्, तुषारः = हिमः, अञ्जनम् = कज्जलम्, चिरन्तनः = पुराणः, एतौ = मुनिकृष्णौ, अभिन्यवीविशत् = स्वाभिमुखेन उपवेशितवान्, आसने= उपवेशनपीठे।

**श्लोकार्थः** – यावता लोकः देवर्षिनारदं हिमवन्तमिव भगवन्तं श्रीकृष्णं च कज्जलपर्वतमिव अपश्यत् ततः पूर्वमेव चिरन्तनः मुनिः श्रीकृष्णः नारदमुनिं स्वहस्तेन दत्ते आसने उपावेशितवान्।

**भावार्थः** – भगवान् श्रीकृष्णः नारदः च यदा परस्परसम्मुखौ आगतौ तदा गौरवर्णीयः नारदः हिमपर्वतः इव श्यामवर्णीयः श्रीकृष्णश्च अञ्जनपर्वतः इव जनैः अवलोकितः। परं यावत् जनावलोकनं न समाप्तं तावत् श्रीकृष्णः स्वहस्तेन दत्ते आसने नारदमुनिं स्वाभिमुखेन उपावेशितवान् । तात्पर्यं लोकानां द्वयोः तुलनात्मकी दर्शनोत्सुकता तीव्रा आसीदिति।

**विशेषः** – श्रीकृष्णस्य कृते अत्र 'चिरन्तनमुनिः' इति सम्बोधनं दृश्यते। पुरा नारायणावतारेण भगवान् श्रीकृष्णः बदरिकारण्ये तपः आचरितवान् । अतः 'चिरन्तनमुनिः' इति तस्य सम्बोधनं जातमिति पुराणेषु उल्लिखितमस्ति। अनेन महाकविमाघस्य पुराणज्ञानम् अवगम्यते। तथैव गौरवर्णनारदस्य तुलना हिमपर्वतेन सह, श्यामवर्णकृष्णस्य च तुलना अञ्जनपर्वतेन सह कृता।

समासः – स्वहस्तदत्ते – स्वहस्तेन दत्ते – तृतीयातत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. तुषाराञ्जनपर्वताकृती कः उदपश्यत्?

२. 'चिरन्तनमुनिः' इति कस्य सम्बोधनम्?

### ३.३. आसनस्थश्रीकृष्णनारदयोः वर्णनम्

श्लोकेऽस्मिन् श्रीकृष्णस्य सम्मुखम् उपविष्टः देवर्षि नारदः कथं प्रतीयते स्म इति कथितम् ।

**महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे।**
**श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम् ।। १६ ।।**

**अन्वयः** – महामहानीलशिलारुचः कंसकृषः पुरः उच्चकैः विष्टरे निषेदिवान् सः अभिसायं श्रितोदयाद्रेः चन्द्रमसः अभिरामताम् अचूचुरत् ।।

## *शिशुपालवधम्*

**प्रतिपदार्थः** – महामहानीलशिला = विशालः इन्द्रनीलमणिः, रुचः = कान्तियुक्तः, पुरः= अग्रे, निषेदिवान् = उपविष्टवान् , उच्चकैः = उन्नते, विष्टरे = आसने, कंसकृषः = हरेः, कृष्णस्य, अभिसायम् = सायङ्कालाभिमुखम् , श्रितः = आश्रितः, उदयाद्रिः= उदयाचलः, चन्द्रमसः = चन्द्रस्य, अभिरामताम् = शोभाम् , अचूचुरत् = चोरितवान्, प्राप्तवान्, सः = नारदमुनिः।

**श्लोकार्थः** – महताकारस्य इन्द्रनीलमणेः रुचिः इव कान्तिमतः कंससंहारकर्तुः श्रीकृष्णस्य पुरः उन्नतासने उपविष्टः नारदमुनिः सायङ्काले उदयाचलस्थितचन्द्रस्य शोभां चोरितवान्।

**भावार्थः** – श्रीकृष्णः श्यामवर्णीयः इत्यस्मात् इन्द्रनीलमणिः इव कान्तिः इत्युक्तम् । भगवतः पुरतः उच्चासने उपविष्टः नारदः श्वेतवर्णीयः आसीत् । अतः सायङ्काले उदयाचले स्थितचन्द्रस्य शोभां नारदः प्राप्तवान् इति प्रतिपादितम् । सायङ्कालस्य कार्ष्ण्यात् कृष्णोपमानत्वं प्रदर्शितम् ।

**विशेषः** – अत्र निदर्शना अलङ्कारः वर्तते।

समासः – अभिसायम् - सायङ्कालाभिमुखम् = अव्ययीभावसमासः।

महामहानीलशिलारुचः – महत्याः महानीलशिलायाः रुचिः इव रुचिः यस्य तस्य– बहुव्रीहिसमासः।

कंसकृषः – कंसं कृष्टवान् इति कंसकृट् तस्य = उपपदतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. नारदः कस्य शोभां चोरितवान्?

२. नारदमुनिः कस्य पुरः उपविष्टवान्?

## ३.४. नारदपूजनेन श्रीकृष्णस्य प्रसन्नता

देवर्षिनारदपूजनानन्तरं भगवान् श्रीकृष्णः प्रसन्नः सञ्जातः। तस्य प्रसन्नतायाः कारणमत्र उल्लिखितमस्ति।

**विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः।**

**ग्रहीतुमार्यान् परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः।। १७।।**

**अन्वयः** – यज्वनां प्रियः प्रसेदुषः तस्य अपचितिं विधाय प्रकामम् अप्रीयत। हि महानुभावाः आर्यान् परिचर्यया मुहुः ग्रहीतुम् नितान्तम् अर्थिनः (भवन्ति)।

**प्रतिपदार्थः** – विधाय = कृत्वा, तस्य = नारदमुनेः, अपचितिम् =पूजाम् , प्रसेदुषः = प्रसन्नस्य, प्रकामम् = अत्यन्तम् , अप्रीयत = प्रसन्नः अभूत् , प्रीतः अभवत् । यज्वनाम् = विधिन् इष्टवताम् , मुहुर्ग्रहीतुम् =वशीकर्तुम् , आर्यान् = पूज्यान् , परिचर्यया = सेवया, महानुभावाः = महात्मानः, नितान्तम् = अत्यधिकम् , अर्थिनः= अभिलाषवन्तः, इच्छुकाः।

**श्लोकार्थः** – शास्त्रोचितयज्ञकर्तॄणां प्रियः भगवान् श्रीकृष्णः नारदमुने पूजनं विधाय अतीव हर्षितः जातः। यतो हि महानुभावाः पूज्यान् जनान् सेवया वारं वारं वशीकर्तुं नितान्तम् अभिलषन्ति।

**भावार्थः** – भगवान् श्रीकृष्णः विधिपूर्वकं यज्ञसम्पादनं कुर्वतामुपरि प्रसीदति अतः यज्वनां प्रियः इति। देवर्षिनारदोऽपि शास्त्रोचिते कार्ये विश्वसिति स्म। तस्मात् तस्य पूजनं कृत्वा श्रीकृष्णः अतीव प्रमुदितः। यतो हि महात्मानः पूज्यान् जनान् सेवया वशीकर्तुमिच्छन्ति। महतां पूजनं सेवाञ्च विधाय तान् प्रसन्नं करोति चेत् सेवाकर्तुः कामनापूर्तता अवश्यं सम्भवति। तेषां सेवया न कदापि हानिः प्रत्युत सन्तोषः लाभश्च। अपि च महानुभावानां सेवा नाम ईश्वरसेवा एव। तस्मात् एतादृशां पूज्यानां सेवां कर्तुं महात्मानः अवसरान्वेषणमेव कुर्वन्ति। पुनः पुनः पूजनादिसेवां कृत्वा ते सर्वदा वशीभवन्तु इत्येव तेषां मनोकामना विद्यते। अतः एव प्रभावशीलं नारदमुनिं सेवितुम् अवसरं प्राप्य श्रीकृष्णः अतीव हर्षम् अनुभूतवान् । एवं पूज्यलोकानां सेवां कर्तुं भगवानपि प्रयतते इति भवः।

**विशेषः**– विधिपरिपालकानां सेवायै भगवान् सर्वदा प्रसन्नमनसा सिद्धोऽस्ति इत्येव महाकविना अत्र सूचितम्। अर्थान्तरन्यासालङ्कारस्य योजना श्लोकेऽस्मिन् दृश्यते। श्लोकस्य द्वितीयचरणं सुभाषितमस्ति। मुनिपूजायाः प्रीतिहेतुः अत्र स्पष्टीजातः।

**स्वावलोकनप्रश्नाः**

१. भगवान् केषां प्रियोऽस्ति?

२. कस्य अपचितिं विधाय श्रीकृष्णः अप्रीयत?

### ३.५. उपसंहारः

खण्डेऽस्मिन् 'श्रीकृष्णद्वारा नारदस्वागतम्' उल्लिखितमस्ति। अभ्यागतानां सभाजनमिति मनुष्यस्य कर्तव्यम्। मानवताप्रतिपादकोऽयं संस्कारः।भगवता श्रीकृष्णेन देवर्षेः स्वागतं विधाय स्वकीयकर्तव्यम् अनुष्ठितम्। अपि च जगतः पुरतः आदर्शः प्रतिष्ठापितः।अतिथेः सन्मानम् अस्माकं मनसि सन्तोषं जनयति। तत्रापि पूज्यानां वशीकरणाय तेषाम् आदरातिथ्यमेकं साधनम्। सुविदितमेव यत् मानो हि महतां धनमिति।अतः महाकविमाघः एतमंशमत्र वर्णयित्वा शिष्टाचारपालनाय जनान् प्रेरयति। 'व्यवहारविदे' इति काव्यप्रयोजनपूर्तता खण्डेऽस्मिन् अस्माभिः परिलक्ष्यते।

### ३.६. प्रश्नाः

१. श्रीकृष्णविहितं नारदस्वागतं स्वशब्दैः विवेचयत।

२. भगवतः श्रीकृष्णस्य मुनिपूजायाः प्रीतिहेतुं प्रतिपादयत।

# चतुर्थखण्डः
# *श्रीकृष्णवर्णनम्*

**संरचना**


४.०. प्रस्तावना

४.१. लक्षिताधिगमांशाः

४.२. श्रीकृष्णवर्णनम्

४.२.१. श्रीकृष्णस्य जलाभिषेकः

४.२.२. श्रीकृष्णाधिष्ठितासनस्य शोभावर्णनम्

४.२.३. श्रीकृष्णस्य समुद्रेण सह साम्यम्

४.२.४. श्रीकृष्णनारदयोः तेजसः सम्मिश्रणशोभा

४.२.५. कृष्णनारदयोः एकवर्णः

४.२.६. नारदागमनेन श्रीकृष्णस्य हर्षोत्पत्तिः

४.२.७. श्रीकृष्णस्य 'पुण्डरीकाक्ष' इत्यभिधानस्य

४.२.८. श्रीकृष्णस्य दन्तकान्तेः शोभावर्णनम्

४.३. उपसंहारः

४.४. प्रश्नाः


## ४.०. प्रस्तावना

महाकविमाघेन 'शिशुपालवधम्' इत्यस्मिन् महाकाव्ये 'श्रीकृष्णवर्णनम्' इत्यंशः प्रथमसर्गे समाविष्टः। तत्र हि अष्टादशश्लोकादारभ्य पञ्चविंशतिश्लोकपर्यन्तं विषयोऽयं उपवर्णितः। श्रीकृष्णस्य जलाभिषेकः, श्रीकृष्णाधिष्ठितासनस्य शोभा, समुद्रेण तस्य साम्यं, 'पुण्डरीकाक्ष'इत्यभिधानस्य सार्थकता, नारदागमनेन तस्य हर्षोत्पत्तिः, तस्य दन्तकान्तेः वैशिष्ट्यं तथा च श्रीकृष्णनारदयोः सम्मिश्रणशोभा इत्यादयः विषयाः खण्डेऽस्मिन् प्रबोधिताः। श्रीकृष्णभक्तिप्रतिपादकाः एते श्लोकाः महाकवेः वर्ण्यविषयश्रद्धां ज्ञापयति। अतः महाकविमाघस्य वैशिष्ट्यज्ञापनमिति खण्डस्यास्य उद्दिष्टम्।

## ४.१. लक्षिताधिगमांशाः

* श्रद्धया दत्तं भगवता सानन्दं स्वीक्रियते इति छात्रः अभिजानाति।
* भगवतः शोभा सर्वदा आह्लादप्रदायिनीति अवगच्छति।
* महाकवेः वैशिष्ट्यम् अवगन्तुं प्रभवति।
* भक्तस्य समागमनं भगवति हर्षोत्पादनं करोतीति ज्ञातुं पारयति।
* श्रीकृष्णवर्णनाय उपनिबद्धश्लोकानां परिचयं प्राप्नोति।

## ४.२. श्रीकृष्णवर्णनम्

नारदमुनेः आगमनानन्तरं श्रीकृष्णः कथं प्रतीयते स्म इत्यस्य वर्णनमत्र अधुना क्रियते।

### ४.२.१. श्रीकृष्णस्य जलाभिषेकः

नारदमुनिना स्वसमीपे सङ्गृहीतजलेन श्रीकृष्णस्य अभिषेकः कृतः। अपि च भगवता अपि सानन्दं तस्य स्वीकारः कृतः इति श्लोकेऽस्मिन् वर्ण्यते।

**अशेषतीर्थोपहृताः कमण्डलोर्निधाय पाणावृषिणाभ्युदीरिताः।**

**अघौघविध्वंसविधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहीदपः ।। १८।।**

**अन्वयः** – अशेषतीर्थोपहृताः ऋषिणा कमण्डलोः पाणौ निधाय अभ्युदीरिताः, अघौघविध्वंसविधौ पटीयसीः अपः हरिः नतेन मूर्ध्ना अग्रहीत्।

**प्रतिपदार्थः** – अशेषतीर्थोपहृताः = सर्वतीर्थेभ्यः आहृताः, सर्वतीर्थेभ्यः सङ्गृहीताः कमण्डलोः = जलपात्रात् , निधाय = स्थापयित्वा, पाणौ = हस्तयोः, ऋषिणा = नारमुनिना, अभ्युदीरिताः = आक्षिप्ताः, अघौघविध्वंसविधौ = अघौघानां = पापसमूहानां विध्वंसविधौ = विनाशकरणे, पटीयसीः = समर्थतराः, नतेन = अवनतमस्तकेन, मूर्ध्ना = मस्तकेन, हरिः = श्रीकृष्णः, अग्रहीत् = स्वीकृतवान् , अपः = जलानि।

**श्लोकार्थः** – नारदमुनिना पापसमूहानां विनाशकरणे अत्युपयुक्तं जलं सर्वतीर्थेभ्यः सङ्गृह्य निजकमण्डलौ आनीतमासीत् । तत् तेन कमण्डलुतः करे संस्थाप्य मन्त्रोच्चारपूर्वकं भगवतः श्रीकृष्णस्य मस्तके निक्षिप्तम् । भगवता अपि नतमस्तकेन

तत् जलं स्वशिरसि स्वीकृतम्।

**भावार्थः** – देवर्षिनारदेन श्रद्धया कृतः पवित्रजलाभिषेकः भगवान् श्रीकृष्णः सानन्दं स्व्यकरोत्।

**विशेषः** – पूज्यैः श्रद्धया यत्किमपि दत्तं चेत् आशीर्वादरूपेण आनन्देन विनयेन च स्वीकर्तव्यम्।

समासःअशेषतीर्थोपहृताःअशेषेभ्यःतीर्थेभ्यःउपहृताः=तत्पुरुषसमासः ।

अघौघविध्वंसविधौ – अघानाम् ओघाः अघौगाः, तेषां विध्वंसः तस्य विधिः तस्मिन् = तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. नारदेन अशेषतीर्थेभ्यः किम् आनीतम्?

२. हरिः किम् अग्रहीत्?

## ४.२.२. श्रीकृष्णाधिष्ठितासनस्य शोभावर्णनम्

देवर्षिनारदस्य आज्ञया सुवर्णसिंहासने उपविष्टः श्रीकृष्णः कथं शोभते स्म इत्यस्य वर्णनं प्रस्तुतश्लोके विद्यते।

**स काञ्चने यत्र मुनेरनुज्ञया नवाम्बुदश्यामवपुर्न्यविक्षत् ।**
**जिगाय जम्बूजनितश्रियः श्रियं सुमेरुशृङ्गस्य तदा तदासनम् ।। १९।।**

**अन्वयः** – नवाम्बुदश्यामवपुः सः मुनेः अनुज्ञया काञ्चने यत्र न्यविक्षत् तत् आसनं तदा जम्बूजनितश्रियः सुमेरुशृङ्गस्य श्रियं जिगाय।

**प्रतिपदार्थः** – नवाम्बुदश्यामवपुः = नूतनमेघः इव श्यामवर्णतनुः, अनुज्ञया = आज्ञया, अनुमत्या, न्यविक्षत् = उपविष्टवान् , जम्बूजनितश्रियः = जम्बूफलजनिता शोभा यस्य तस्य, श्रियं = शोभाम्, जिगाय = जीतवान् , अभिभावितवान् । सुमेरुशृङ्गस्य = सुमेरुपर्वतशिखरस्य, तदा = तत्समये, सः = श्रीकृष्णः, काञ्चने = सुवर्णे।

**श्लोकार्थः** – मेघश्यामः श्रीकृष्णः देवर्षेः नारदस्य अनुमोदनेन यदा सुवर्णसिंहासने समुपाविशत् तदा तदासनं जम्बूवृक्षेण जनिता सुमेरुपर्वतशृङ्गस्य शोभां अतिशेते स्म।

**भावार्थः** – सुमेरुपर्वतशिखरे उत्पन्नः जम्बूवृक्षः तस्य पर्वतस्य शोभां वर्धयति। तादृशमेव सुवर्णसिंहासने उपविष्टः श्रीकृष्णः तस्य आसनस्य शोभां संवर्धितवान् । किन्तु श्रीकृष्णस्य आसनस्य अलौकिकी शोभा सुमेरुपर्वतशृङ्गस्य जम्बूफलजनितशोभामपि अतिशेते स्म।

**विशेषः** – भगवतः श्रीकृष्णस्य उपवेशनात् आसनस्य रमणीयता अत्यधिका वर्धिता। अत्र जम्बूफलविशेषवृक्षस्य उपमा श्रीकृष्णस्य कृते वर्तते। यतो हि जम्बूवृक्षः कृष्णवर्णीयः भवति। संसृष्टिः अलङ्कारः श्लोकेऽस्मिन् विद्यते।

समासः – नवाम्बुदश्यामवपुः – नवः चासौ अम्बुदः कर्मधारयसमासः,

नवाम्बुदः इव श्यामवपुः यस्य सः , कर्मधारयसमासः।

जम्बूजनितश्रियः – जम्बूजनिता श्रीः कर्मधारयसमासः। यस्य तस्य इति।

**स्वावलोकनप्रश्नाः**

१. नवाम्बुदश्यामवपुः कस्य?

२. सुवर्णसिंहासनं कस्य श्रियं जिगाय?

३. श्रीकृष्णः कस्य अनुज्ञया न्यविक्षत?

### ४.२.३. श्रीकृष्णस्य समुद्रेण सह साम्यम्

सुवर्णासने उपविष्टः श्रीकृष्णः समुद्र इव शोभां प्राप्तवानिति वर्णनम् अस्मिन् श्लोके माघकविना कृतम् ।

**स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः।**
**विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः।। २०।।**

**अन्वयः** – तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः सः वाडवजातवेदसः शिखाभिः आश्लिष्टः अम्भसां निधिः इव विदिद्युते।

**प्रतिपदार्थः** – तप्तकार्तस्वरम् = अग्नौ शोधितं सुवर्णम् , भास्वराम्बरः = दैदीप्यमानं वस्त्रं नाम पीताम्बरं यस्य सः। कठोरताराधिपः = पूर्णेन्दुः, पूर्णचन्द्रः, लाञ्छनच्छविः= कलङ्कस्य शोभा, विदिद्युते = अशोभत, वाडवजातवेदसः = वाडवाग्नेः , शिखाभिः= ज्वालाभिः, आश्लिष्टः = व्याप्तः, अम्भसां निधिः = समुद्रः।

**श्लोकार्थः** – पूर्णचन्द्रकलङ्कस्य कान्तिः इव सुशोभितः भगवान् श्रीकृष्णः सुवर्णकान्तिं पीताम्बरं धारयन् वडवानलस्य ज्वालाभिः व्याप्तः समुद्रः इव शोभते स्म।

**भावार्थः** – अग्नौ उष्णीकृतं सुवर्णं यथा दैदीप्यमानं भवति तथा भगवतः पीताम्बरम् आसीत्। तथैव पूर्णचन्द्रकलङ्कः इव श्यामवर्णः श्रीकृष्णस्य। अतः वडवाग्निना आश्लिष्टः समुद्रः इति वर्णनम्।

**विशेषः** – वडवाग्नेः शिखाभिः व्याप्तः समुद्रः इव भासमानः कृष्णः इति द्वयोः साम्यमत्र प्रदर्शितम् ।

समासः – तप्तकार्तस्वरभास्वराम्बरः – तप्तं कार्तस्वरमिव भास्वरम् अम्बरं यस्य सः = बहुव्रीहिसमासः।

कठोरताराधिपलाञ्छनच्छविः – कठोरताराधिपस्य लाञ्छनस्य छविरिव छविः यस्य सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. कः अम्भसां निधिः विदिद्युते?

२. श्रीकृष्णस्य छविः कीदृशी?

### ४.२.४. श्रीकृष्णनारदयोः तेजसः सम्मिश्रणशोभा

श्यामवर्णश्रीकृष्णः तथा च गौरवर्णनारदः इत्यनयोः तेजसः सम्मिश्रणशोभा अस्मिन् श्लोके महाकविना समुपवर्णिता ।

**रथाङ्गपाणेः पटलेन रोचिषामृषित्विष संवलिता विरेजिरे।**
**चलत्पलाशान्तरगोचरास्तरोस्तुषारमूर्तेरिव नक्तमंशवः।। २१।।**

**अन्वयः** – रथाङ्गपाणेः रोचिषां पटलेन संवलिता ऋषित्विषः नक्तं तरोः चलत्पलाशान्तगोचराः तुषारमूर्ते अंशवः इव विरेजिरे।

**प्रतिपदार्थः** –रथाङ्गपाणेः = हरेः, श्रीकृष्णस्य , पटलेन = समूहेन, रोचिषाम् =छवीनाम्, संवलिता = मिलिता, मिश्रिता, नक्तम् = रात्रौ, तरोः = वृक्षस्य, अंशवः = किरणाः, विरेजिरे = अशोभत, तुषारमूर्तेः = इन्दोः, चन्द्रस्य।

**श्लोकार्थः** – यदा मेघश्यामः श्रीकृष्णः हिमधवलो नारदश्च परस्परस्य सम्मुखम् उपविष्टौ तदा तयोः मिश्रिताः कान्तयः रात्रौ पवनकम्पितस्य पलाशवृक्षस्य पत्राणां मध्ये आगताः चन्द्रकिरणाः इव भासन्ते स्म।

**भावार्थः** – यदा रात्रौ वृक्षाणां चलितपर्णाणां मध्यभागात् चन्द्रकिरणाः भूमौ आगच्छन्ति तदा पर्णाणां कृष्णच्छाया तथा च चन्द्रप्रकाशः इत्यनयोः परस्परमिश्रणं काचित् पृथक् शोभां समुत्पादयति। तथैव अत्रापि दृश्यं दृष्टम् ।

**विशेषः** – कृष्णधवलवर्णयोः मिश्रणं निश्चयेन आकर्षितं भवति। तद्वत् श्रीकृष्णनारदयोः एकत्र उपवेशनं कश्चित् विशेषशोभाविषयः आसीत्।

समासः – रथाङ्गपाणेः = रथाङ्गं (चक्रम्) पाणौ यस्य सः रथाङ्गपाणिः
तस्य = बहुव्रीहिसमासः।

तुषारमूर्तिः – तुषारा मूर्तिः = कर्मधारयसमासः।

ऋषित्विषः – ऋषेः त्विषः = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. 'रथाङ्गपाणिः' इति कस्य सम्बोधनम्?

२. ऋषित्विषः केन संवलिता?

### ४.२.५. कृष्णनारदयोः एकवर्णः

श्रीकृष्णस्य श्यामवर्णः तथा च नारदस्य शुभ्रवर्णः। द्वयोः वर्णयोः सम्मिश्रणेन द्वयोः एकवर्णत्वस्य प्रतीतिः अभवदिति प्रस्तुते श्लोके प्रतिपादितम् ।

प्रफुल्लतापिच्छनिभैरभीषुभिः शुभैश्च सप्तच्छदपांशुपाण्डुभिः।

परस्परेण च्छुरितामलच्छवी तदैकवर्णाविव तौ बभूवतुः।।२२।।

**अन्वयः** – प्रफुल्लतापिच्छनिभैः सप्तच्छदपांशुपाण्डुभिः शुभैश्च अभीषुभिः परस्परेण च्छुरितामलच्छवी तौ तदा एकवर्णौ इव बभूवतुः।

**प्रतिपदार्थः** – प्रफुल्लतापिच्छम् = विकसिततमालपुष्पम् , निभै = सदृशैः, परस्परेण = अन्योन्यम् , अभीषुभिः = रश्मिभिः, बभूवतुः = अभवताम् , तौ = हरिनारदौ, सप्तच्छदपांशुपाण्डुभिः = सप्तपर्णपरागशुभ्रैः, एकवर्णौ = समानवर्णौ, शुभैः = मनोहरैः, छुरितामलच्छवी = मिश्रितोज्ज्वलकान्तिः।

**श्लोकार्थः** –विकसिततमालपुष्पवत् नीला श्रीकृष्णकान्तिः तथा च सप्तपर्णपरागवत् धवला नारदस्य कान्तिरासीत् । उभयोरपि परस्परसङ्क्रमणेन तदा उभावपि परस्परम् अभिनवैकवर्णरञ्जितौ अभवताम्।

**भावार्थः** – कृष्णनारदयोः प्रभामेलनात् कश्चिदेको वर्णः प्रादुर्भूतः। गङ्गायमुनासङ्गमः इव स्फटिकइन्द्रनीलमणिप्रभामेलनम् आसीत् ।

**विशेषः** – उत्प्रेक्षा अलङ्कारः अत्र।

समासः – एकवर्णौ – एकः वर्णः ययोः तौ = बहुव्रीहिसमासः।

छुरितामलच्छवी – छुरिते अमले छवी ययोः तौ = बहुव्रीहिसमासः।

प्रफुल्लतापिच्छनिभैः – प्रफुल्लं तत् तापिच्छं तेन सदृशैः = कर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. श्रीकृष्णस्य छवी कीदृशी आसीत्

| |
|---|
| २. सप्तच्छदपांशुवत् छवी कस्य |

### ४.२.६. नारदमुनेः आगमनेन श्रीकृष्णस्य हर्षोत्पत्तिः

श्रीकृष्णस्य नारदशुभागमनजन्यः हर्षः कीदृशः आसीदिति श्लोकेऽस्मिन् महाकविना उक्तम् ।

**युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत।**

**तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः।। २३।।**

**अन्वयः** – युगान्तकालप्रतिसंहृतात्मनः कैटभद्विषः यस्यां तनौ जगन्ति सविकासम् आसत तत्र तपोधनाभ्यागमसम्भवाः मुदः न ममुः।

**प्रतिपदार्थः** – युगान्तकालप्रतिसंहृतात्मनः = प्रलयसमये उपसंहृतजीवस्य, विलयं प्रापितजीवस्य, कैटभद्विषः = हरेः,श्रीकृष्णस्य, यस्यां तनौ = यस्मिन् शरीरे, जगन्ति =भुवनानि, लोकाः, सविकासम् = सविस्तरम् , यथासुखम् , आसत = अतिष्ठन् , तत्र = तस्याम् , तपोधनाभ्यागमसम्भवाः = तपस्विश्रेष्ठनारदागमनप्रभवाः, मुदः = प्रमोदाः, प्रीतयः,न ममु = न मान्ति स्म, अतिरिच्यन्ते।

**श्लोकार्थः** – प्रलयकाले सम्पूर्णचराचरं स्वात्मनि अन्तर्भूतं कुर्वतः कैटभशत्रोः श्रीकृष्णस्य शरीरे भुवनानि यथासुखम् अतिष्ठन् , तस्मिन् एव शरीरे तपस्विश्रेष्ठनारदस्य अभ्यागमनेन उत्पन्नहर्षः स्थानं प्राप्तुं नाशक्नोत् ।

**भावार्थः** – समस्तब्रह्माण्डं निजशरीरे समावेशयितुं समर्थः श्रीकृष्णः नारदागमनेन उद्भूतम् आनन्दं स्वकीयदेहे समाविष्टं कर्तुम् असमर्थः जातः। अत्यधिकहर्षम् अन्तःकरणे गोपयितुं न शक्तवान् इत्यर्थः।

**विशेषः** – प्रलयकाले श्रीकृष्णः समस्तचराचरस्य संहारं कृत्वा स्वकुक्षौ स्थापयति। तात्पर्यं चतुर्दशभुवानि तस्य शरीरान्तर्गतं तिष्ठन्ति। प्रलयानन्तरं सः क्षीरसागरे स्वपितीति पुराणे उल्लिखितमस्ति। भगवद्गीतायामपि तथैव वर्णनं दृश्यते।

यथा हि – सर्वभूतानि कौन्तेय। प्रकृतिं यान्ति मामिकाम् ।

कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ।। इति।

अस्मिन् पद्ये 'कैटभद्विष्' इति श्रीकृष्णस्य सम्बोधनम् । तस्मिन् विषयेऽपि काचित् कथा वर्तते। कदाचित् भगवतः विष्णोः कर्णेन्द्रियात् मलनिस्सारणं सञ्जातम्। ततः मधु तथा कैटभः इति द्वौ असुरौ उत्पन्नौ। स्वकीयबलेन मदोन्मतौ तौ विष्णोः नाभितः समुत्पन्नं ब्रह्मदेवं हन्तुम् उद्युक्तौ। तेन हि सः आत्मरक्षणाय विष्णुम् उत्थापितवान् यः क्षीरसागरे निद्राति स्म। अतः भगवता निजसुदर्शनचक्रेण द्वयोः दानवयोः शिरच्छेदनं कृतम्। तदारभ्य 'मधुकैटभशत्रुः' 'मधुकैटभारिः' वा श्रीकृष्णस्य हरेर्वा नामकरणं जातम्।

समासः – सविकासम् – विकासेन सह यथा स्यात् तथा – सह बहुव्रीहिसमासः।

तपोधनः – तपः एव धनं यस्य असौ – बहुव्रीहिसमासः।

कैटभद्विषः – कैटभं द्वेष्टीति तस्य –उपपदतत्पुरुषसमासः।

युगान्तकालप्रतिसंहृतात्मनः – युगान्तस्य कालः, तस्मिन् प्रतिसंहृताः आत्मनः येन असौ तस्य – तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. कैटभद्विषः तनौ किं सविकासम् अतिष्ठन्?

२. नारदागमनहर्षः कस्मात् अतिरिच्यते?

### ४.२.७. श्रीकृष्णस्य 'पुण्डरीकाक्ष' इत्यभिधानस्य सार्थकता

भगवतः श्रीकृष्णस्य 'पुण्डरीकाक्ष' इति नामाभिधानं कथं सार्थकम् अभूत् इत्येव अस्मिन् श्लोके वर्णितमस्ति।

**निदाघधामानमिवधिदीधितिं मुदा विकासं मुनिमभ्युपेयुषी।**

**विलोचने बिभ्रदधिश्रितश्रिणी स पुण्डरीकाक्ष इति स्फुटोऽभवत् ।। २४।।**

*शिशुपालवधम्*

**अन्वयः** – निदाघधामानम् इव अधिदीधितिं मुनिम् अभिमुदा विकासम् उपेयुषी अधिश्रितश्रिणी विलोचने बिभ्रत् सः पुण्डरीकाक्षः इति स्फुटः अभवत् ।

**प्रतिपदार्थः** – निदाघधामानम् = ग्रीष्मकालस्य सूर्यम् , इव = यथा, अधिदीधितिम् = अधिकतेजसम् , विकासम् = प्रफुल्लितम् , मुदा = आनन्देन, अभ्युपेयुषी = उपगते, प्राप्ते, स्फुटः = स्पष्टम् , पुण्डरीकाक्षः = कमलनयनः, अधिश्रितश्रिणी = प्राप्तशोभे, सौन्दर्यसम्पन्ने, विलोचने = नेत्रे, बिभ्रत् = दधानः, सः = श्रीकृष्णः, मुनिम् = नारदम् धाम = तेजः।

**श्लोकार्थः** – ग्रीष्मकालस्य सूर्य इव अधिकं तेजस्वी नारदः। अस्य पुरतः हर्षेण प्रफुल्लितं शोभासम्पन्नं नेत्रद्वयं धारणं कुर्वन् सः श्रीकृष्णः ‘ पुण्डरीकाक्ष ’ इति अन्वर्थकः सञ्जातः।

**भावार्थः** – देवर्षिः नारदः निदाघकालस्य सूर्य इव अत्यधिकं तेजस्वी आसीत् । श्रीकृष्णस्य नेत्रे च कमलवत् शोभासम्पन्ने आस्ताम् । देवर्षेः सम्मुखम् आगमनानन्तरं तस्य नेत्रकमले विकसिते जाते। सूर्यसन्निधाने कमलश्रीविकासः इति पुण्डरीकसाधर्म्यात् श्रीकृष्णस्य ‘पुण्डरीकाक्षः’ इति नाम सार्थकमभवत् ।

**विशेषः** – नारदस्य कृते सूर्यस्य तथा च श्रीकृष्णनेत्रस्य कृते कमलस्य उपमा अत्र विद्यते। ‘पुण्डरीकाक्षः’ इति संज्ञासार्थकत्वे श्रीकृष्णस्य नेत्रयोः नारदागमनेन विकासः अतः काव्यलिङ्गालङ्कारः। द्वयोः अलङ्कारयोः अङ्गाङ्गिभावेन सङ्करः अलङ्कारः श्लोकेऽस्मिन् विद्यते।

समासः– निदाघधामानम् – निदाघं धाम यस्य सः निदाघधामा तम् – बहुव्रीहिसमासः।
पुण्डरीकाक्षः – पुण्डरीके इव अक्षिणी यस्य सः – बहुव्रीहिसमासः।
अधिदीधितिम् –अधिका दीधितिः यस्य सः अथवा
अधिगता दीधितिः येन सः तम् – बहुव्रीहिसमासः।
अधिश्रितश्रिणी – अधिश्रिता श्रीः याभ्यां ते – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. कः पुण्डरीकाक्षः?

२. निदाघधामानमिव कः परिलक्ष्यते?

### ४.२.८. श्रीकृष्णस्य दन्तकान्तेः शोभावर्णनम्

श्रीकृष्णस्य नारदं प्रति यद्वचनम् आसीत् तस्मिन् समये श्रीकृष्णस्य ईषद्-हास्येन कीदृशी शोभा वर्धितेति अस्मिन् पद्ये समुपवर्णितम्।

सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लम्भयन् ।
द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः ।। २५।।

**अन्वयः** – अथ अच्युतः विसारिभिः द्विजावलिव्याजनिशाकरांशुभिः सिते मुनेः वपुः सौधमिव सुतरां सितिम्ना लम्भयन् शुचिस्मितां वाचम् अवोचत् ।

**प्रतिपदार्थः** – अथ = नारदश्रीकृष्णयोरुपवेशनानन्तरम् , अच्युतः = श्रीकृष्णः, विसारिभिः=प्रसरणशीलैः,द्विजावलिव्याजनिशाकरांशुभिः= दन्तपङ्क्तिछद्मचन्द्रकिरणैः, सितम् = शुभ्रम् , मुनेः = नारदस्य, वपुः = शरीरम् , सौधम् = राजसदनम् , प्रासादः, इव = यथा, सुतराम् = अत्यन्तम् , सितिम्ना = शुभ्रत्वेन, लम्भयन् = प्रापयन् , शुचिस्मिताम् = निर्मलमन्दहास्यप्रचुराम् , वाचम् =वाणीम् , अवोचत् = उक्तवान् , उवाच।

**श्लोकार्थः** – नारदश्रीकृष्णयोः उपवेशनानन्तरं भगवान् श्रीकृष्णः प्रसरणशीलैः दन्तपङ्क्तिकपटचन्द्रकिरणैः मुनेः नारदस्य शुभ्रशरीरं, धवलप्रासादं नितरां धवलं कुर्वन् इव निर्मलमन्दहास्यप्रचुरां वाणीम् उक्तवान् ।

**भावार्थः** – उभयोः उपवेशनान्तरं श्रीकृष्णः निर्मलमन्दहास्यपूर्वकं वाक्यमुक्तवान् । तदा तस्य दन्तकिरणाः नारदस्य शुभ्रशरीरं सङ्क्रमन्ते स्म। वस्तुतः न सा दन्तपङ्क्तिः

आसीत् , अपि तु हास्यरूपं गृहीत्वा चन्द्रमा एव नारदशरीरं निजैः किरणैः धवलं करोति स्म। यथा सुधावलिप्तः शुभ्रप्रासादः पुनरपि चन्द्रकिरणैः अत्यन्तं शुभ्रः भवति। अत्र दन्तपङ्क्तेः शुभ्रातिशयता इति भावः।

**विशेषः** – अस्मिन् श्लोके 'व्याज' इति पदम् इयं न दन्तपङ्क्तिः अपि तु चन्द्रः इति दन्तपङ्क्तेः निषेधं करोति। तथैव सौधमिव मुनेः वपुः इत्यत्र सौधेन नारदशरीरस्य साम्यं प्रदर्शयति। चन्द्रकिरणधवलता नारदशरीरवर्णश्चोभयोः समानता अतिशयोक्ति अलङ्कारं दर्शयति।

समासः –शुचिस्मिताम् – शुचि स्मितं यस्याः सा ताम् – बहुव्रीहिसमासः।

द्विजावलिव्याजनिशाकरांशुभिः – द्विजानाम् आवलिः – षष्ठीतत्पुरुषसमासः।

सैव व्याजः यस्य सः द्विजावलिव्याजः – बहुव्रीहिसमासः।

स चासौ निशाकरः– कर्मधारयसमासः, तस्य अंशवः तैः।

**स्वावलोकनप्रश्नाः**

१. शुचिस्मितां वाचं कः अवोचत्?

२. सितं सौधमिव कस्य वपुः आसीत्?

### ४.३.उपसंहारः

अस्मिन् चतुर्थे खण्डे महाकविना माघेन श्रीकृष्णवर्णनाय उपनिबद्धाः श्लोकाः परिचायिताः। भगवतः आदरातिथ्यम् अङ्गीकृत्य नारदमुनिना पवित्रजलैः तस्य अभिषेकः विहितः। अत्रापि आदानप्रदानप्रक्रिया अनुभूयते। तथैव श्रीकृष्णस्य उपवेशनेन सिंहासनशोभावर्धनं सञ्जातमिति उल्लेखः भगवतः स्पर्शमाहात्म्यं प्रख्यापयति ।अत्रैव श्रीकृष्णनारदयोः एकस्मिन् प्रासादे उपस्थितिः दर्शनीया आसीदिति वर्णयित्वा महाकविः

भगवद्भक्तयोः मेलनं सर्वदा प्रमोदजनकमिति प्रतिपादयति। कृष्णनारदयोः एकवर्णप्रतीतिः अस्मान् भक्तः कदापि ईश्वरात् पृथक् नैव भवतीति ज्ञापयति। एवम् अनेन पाठ्यांशेन छात्राः ईश्वरमाहात्म्यं ज्ञातुं प्रभवन्ति।

**४.४. प्रश्नाः**

१. श्रीकृष्णस्य समुद्रेण सह प्रदर्शितं साम्यं प्रतिपादयत।

२. 'पुण्डरीकाक्ष' इति नामाभिधानं कदा सार्थकीजातम्?

## पञ्चमखण्डः
# *श्रीकृष्णविहिता नारदप्रशंसा*

**संरचना**

५.०. प्रस्तावना
५.१. लक्षिताधिगमांशाः
५.२. श्रीकृष्णविहिता नारदप्रशंसा
५.२.१. नारददर्शनमाहात्म्यम्
५.२.२. नारदस्य तेजसः प्रशंसा
५.२.३. नारदस्य वेदविद्यानिधित्वम्
५.२.४. नारदमुनेः गरीयसीः गिरः श्रोतुमिच्छा
५.२.५. नारदागमनप्रयोजनजिज्ञासा
५.३. उपसंहारः
५.४. प्रश्नाः

## ५.०. प्रस्तावना

'श्रीकृष्णविहिता नारदप्रशंसा' इति पाठ्यांशः महाकविमाघस्य 'शिशुपालवधम्' इत्यस्य महकाव्यस्य प्रथमसर्गे अवलोक्यते। अंशोऽयं तत्र षड्विंशतितमश्लोकात् आरभ्य त्रिंशत्श्लोकपर्यन्तं समुल्लिखितः। नारदस्तवने तस्य माहात्म्यं, तेजः तथा च वेदविद्यानिधित्वमित्यादयः विषयाः अन्तर्भूतास्सन्ति। तथैव तस्य गरीयसीः गिरः श्रोतुकामः श्रीकृष्णः आगमनहेतुमपि ज्ञातुमिच्छतीति खण्डेऽस्मिन् निरूप्यते।

## ५.१. लक्षिताधिगमांशाः

* नारदप्रशंसामवगत्य देवर्षिविषयकः आदरः छात्रमनसि समुत्पद्यते।
* भगवता अपि सतां श्लाघा क्रियते इत्यवगच्छति।
* प्रयोजनेन विना मानवः कार्यार्थम् उद्युक्तः नैव भवतीति ज्ञातुं प्रभवति।
* सम्भाषणकौशलं छात्रः सम्पादयति।
* श्रीकृष्णस्य विनयशीलताम् अवगन्तुं पारयति।

## ५.२. श्रीकृष्णविहिता नारदप्रशंसा

नारदस्य आगमनप्रयोजनं प्रष्टुकामः श्रीकृष्णः आदौ तस्य प्रशंसामकरोत् ।भगवता कृतमिदं स्तवनं सम्भाषणशैलीसम्पादनाय साहाय्यं विदधाति। अत एवपाठ्यांशे निर्धारितोऽयम् अंशः सम्प्रति निर्दिश्यते।

### ५.२.१. नारददर्शनमाहात्म्यम्

नारददर्शनं पुण्यकर्मणां फलमिति श्रीकृष्णः श्लोकेऽस्मिन् नारदं स्तौति।

**हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।**

**शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ।।२६।।**

**अन्वयः** – भवदीयदर्शनं शरीरभाजां कालत्रितये अपि योग्यतां व्यनक्ति। सम्प्रति अघं हरति। एष्यतः शुभस्य हेतुः पूर्वाचरितैः शुभैः कृतम् ।

**प्रतिपदार्थः** – भवदीयदर्शनम् = भवतां दर्शनम् , त्वदीयावलोकनम् , शरीरभाजाम् = प्राणिनाम् ,शरीरिणाम् , कालत्रितयेऽपि = भूतादिकालत्रयेऽपि, योग्यताम् = अर्हताम् , पवित्रताम् , व्यनक्ति =प्रकटयति, बोधयति, सम्प्रति = इदानीम् , अघम् =पापम् , हरति = विनाशयति, एष्यतः = भाविनः, आगमिष्यतः, शुभस्य कल्याणस्य, श्रेयसः, हेतुः = कारणम् , उद्दिष्टम् , पूर्वाचरितैः = पूर्वानुष्ठितैः, शुभैः = सुकृतैः, पुण्यैः कृतम् = सम्पादितम् , लब्धम्।

**श्लोकार्थः** – भवतां दर्शनं देहधारिणां जीवानां त्रिषु कालेष्वपि पावित्र्यं द्योतयति। वर्तमानकाले तत् पापविनाशकं भवति । भविष्यत्काले च कल्याणस्य हेतुः वर्तते। अधुना तु पूर्वानुष्ठितैः सुकृतैः दर्शनमिदं सम्प्राप्तम् ।

**भावार्थः** – पूर्वार्जितसत्कर्मवशादेव नारदसदृशां महात्मनां दर्शनं सम्भवति। अपि च दर्शनमिदं वर्तमान-भूत-भविष्येति कालत्रयस्य पवित्रतां सूचयति। तथैव आगामिकालस्य मङ्गलसूचकं वर्तते इत्येव भावः।

**विशेषः** – नारददर्शनस्य माहात्म्यमत्र सूच्यते। नारदमुनितुल्यमानवस्य प्रशंसा भगवता क्रियते इत्येवाभिप्रायः। काव्यलिङ्गमलङ्कारेण अलङ्कृतमिदं पद्यम् ।

समासः - भवदीयदर्शनम् - भवदीयं दर्शनम् - कर्मधारयसमासः।

शरीरभाजाम् - शरीरं भजन्ति ये ते शरीरभाजः, तेषाम् - उपपदतत्पुरुषसमासः।

कालत्रितये - कालस्य त्रितयमिति, तस्मिन् षष्ठीतत्पुरुषसमासः। त्रयः अवयवाः यस्य तत् त्रितयमिति।

**स्वावलोकनप्रश्नाः**

१. नारददर्शनं केषां योग्यतां व्यनक्ति?

२. सम्प्रति नारददर्शनं किं हरति?

### ५.२.२. नारदस्य तेजसः प्रशंसा

नारदमुनेः दर्शनेन तमोरहिताः सम्पन्नाः इति सूचयितुं महाकविः माघः तस्य तेजस्वितां प्रसंशति। अपि च तस्य सूर्यादाधिक्यं दर्शयति।

**जगत्यपर्याप्तसहस्रभानुना न यन्नियन्तुं समभावि भानुना।**
**प्रसह्य तेजोभिरसङ्ख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः।।२७।।**

**अन्वयः** - जगति अपर्याप्तसहस्रभानुना भानुना यत् तमः नियन्तुं न समभावि, अनुत्तमम् अदः तमः असङ्ख्यतां गतैः तेजोभिः प्रसह्य त्वया नुन्नम् ।

**प्रतिपदार्थः** - जगति = लोके, अपर्याप्तसहस्रभानुना = अपरिच्छिन्नसहस्रकिरणेन, भानुना = सूर्येण, यत् तमः = यदज्ञानरूपं ध्वान्तम् , नियन्तुम् = निवारयितुम् , दूरीकर्तुम्, न समभावि = न शक्तम्, अनुत्तमम् = नितरां प्रगाढम् , सर्वाधिकम् , अदः = एतत् , तमः = अज्ञानम् , असङ्ख्यतां गतैः = अगण्यतां प्राप्तैः, अनन्तैः, तेजोभिः = स्वप्रभावैः, प्रसह्य = बलात् , त्वया = भवता, नुन्नम् = छिन्नम् , निरस्तम् ।

**श्लोकार्थः** - जगति सूर्यस्य सहस्रकिरणाः अपि यदज्ञानरूपं तमः दूरीकर्तुम् अशक्ताः तदेव सर्वाधिकम् अज्ञानं भवता असङ्ख्य-स्वप्रभावकिरणैः बलात् निरस्तम् अथवा बलात् निवारितम् ।

**भावार्थः** – सूर्यस्य सहस्रकिरणाः विश्वस्य गिरिकन्दरादिषु व्याप्तम् अन्धकारं छेत्तुम् असमर्थाः भवन्ति। सः सूर्यः मनसि स्थितं तमः निवारयितुं कथं समर्थः भवेत्? परं सः मोहमयः अन्धकारः नारदेन स्वकीयैः अपरिमितैः ज्ञानकिरणैः सत्त्वरं दूरीकृतः इति सूर्यनारायणापेक्षया भवतः सामर्थ्यम् अधिकमिति । तथैव सूर्यः केवलं बाह्यरूपं तमः निरस्तीकरोति परं सर्वातिशायिज्ञानं मनस्स्थितं मोहमयं तमः नाशयतीति भावः।

**विशेषः** – नारदः श्लाघ्यदर्शनीयः इति श्रीकृष्णः तं स्तौति। अपि च 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति ज्ञानस्य माहात्म्यं श्लोकेऽस्मिन् विवेचयति। अत्र भानोः अपेक्षया मुनेः तेजसः आधिक्यप्रतिपादनेन व्यतिरेकालङ्कारः विद्यते। तथैव 'भानुना भानुना' इति आवृत्तिः यमकालङ्कारं सूचयति।

समासः – जगत्पर्याप्तसहस्रभानुना – जगति अपर्याप्ताः भानवः यस्य सः तेन – बहुव्रीहिसमासः।

अनुत्तमम् – अविद्यमानम् उत्तमं यस्मात् तत् – नञ् तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. नारदेन किं निरस्तम्?

२. जगति तमः निवारयितुं कः असमर्थः?

## ५.२.३.नारदस्य वेदविद्यानिधित्वम्

वेदविद्यानिधिरक्षकः नारदमुनिः ब्रह्मदेवस्य योग्यशिष्यः इत्येव पद्येऽस्मिन् उक्त्वा तस्य दर्शनं कथं श्लाघ्यमिति स्पष्टीकृतम् ।

**कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना।**
**सदोपयोगेऽपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसम्पदामिव।।२८।।**

**अन्वयः** – प्रजाक्षेमकृता सुपात्रनिक्षेपनिराकुलात्मना प्रजासृजा त्वं धनसम्पदाम् इव श्रुतीनां सदा उपयोगे अपि अक्षयः गुरुः निधिः कृतः।

**प्रतिपदार्थः** – प्रजाक्षेमकृता = जनकल्याणकारिणा, सुपात्रनिक्षेपनिराकु लात्मना =योग्यपुरुषनिक्षेपस्वस्थचित्तेन, सुपात्रे = योग्ये, निक्षेपेन = न्यासेन, निराकुलः = स्वस्थः, आत्मा = चेतः, प्रजासृता = ब्रह्मणा ,पित्रा, निधिः = शेवधिः, गुरुः = उपदेष्टा, महानाचार्यः, सम्प्रदायप्रवर्तकः, श्रुतीनाम् = वेदानाम् , अक्षयः = नाशरहितः, सदा = सर्वदा, उपयोगेऽपि = अध्ययनाध्यापनादौ उपयोगेऽपि, कृतः = विहितः, धनसम्पदाम् = धनसम्पत्तीनाम् इव = यथा। त्वम् = भवान् नारदः।

**श्लोकार्थः** – यथा प्रजाहितचिन्तकेन योग्यपुरुषं मत्वा स्वस्थचित्तेन धनसम्पदां निधिः तस्मै समर्प्यते तथा ब्रह्मणा अपि योग्यशिष्यं विचिन्त्य त्वयि श्रुतीनां निधिः निक्षिप्तः। यस्य सदा उपयोगेऽपि क्षयत्वं न प्राप्नोति। त्वं निधेः गुरुः वर्तते।

**भावार्थः** – 'प्रजासृट्' इति पदस्य अर्थः पिता तथा च ब्रह्मदेवः। तस्मात् यथा लोहमञ्जूषादिषु सुवर्ण–रजत–रत्नादिधनसम्पत्तिं संस्थाप्य निश्चिन्तमनसा पिता प्राप्तेऽवसरे योग्याय उत्तराधिकारिणे पुत्राय समर्पयति तथैव ब्रह्मदेवः नारदाय वेदविद्यानिधिं समर्प्य अधुना निश्चिन्तः। प्रजाहितचिन्तकः सः ब्रह्मा योग्यशिष्याय नारदाय वेदविद्यां वितीर्य स्वस्थचित्तः वर्तते। अस्य वेदविद्यानिधेः वैशिष्ट्यं यत् सर्वदा शिष्येभ्यः वितरणं क्रियते चेदपि अक्षयः तिष्ठति इति। श्रुतिसम्प्रदायकः नारदः सदा वेदविद्यावितरणं करोतीति भावः।

**विशेषः** – नारदमुनिः सुपात्रशिष्यः इति श्लोकेऽस्मिन् प्रतिपादितम् । अत्र हि श्लेषवाचकानि पदानि वर्तन्ते। यथा – प्रजासृजा, गुरुश्चेति। प्रजासृजा इत्यस्य अर्थद्वयं – ब्रह्मदेवेन पित्रा च। प्रजानां सृजनं कल्याणञ्च द्वाभ्यामपि क्रियते। गुरुः इत्युक्ते महान् सम्प्रदायप्रवर्तकः च। वेदविद्यानिधिः महान् वर्तते। तथैव नारदोऽपि श्रुतिसम्प्रदायप्रवर्तकः इत्यस्मात् गुरुः। एवं सम्प्रदायप्रवर्तकानां धर्माधर्मव्यवस्थापकतया जगत्प्रतिष्ठाहेतूनां नारदसदृशां दर्शनं सर्वदा श्लाघ्यमिति श्रीकृष्णः श्लोकेऽस्मिन् सूचयति। अत्र हि श्लेषालङ्कारोऽस्ति।

समासः – प्रजाक्षेमकृता – प्रजानां क्षेमं कृतवानिति प्रजाक्षेमकृत् तेन

– उपपदतत्पुरुषसमासः।

सुपात्रनिक्षेपनिराकुलात्मना – सुपात्रे निक्षेपेन निराकुलः आत्मा यस्य सः तेन– बहुव्रीहिसमासः।

प्रजासृजा – प्रजाः सृजति तेन – उपपदतत्पुरुषसमासः।

अक्षयः – न क्षयः – नञ् तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. कः श्रुतीनाम् अक्षयनिधिः?

२. प्रजासृजा निधिः कुत्र निक्षिप्तः?

## ५.२.४. नारदमुनेः गरीयसीः गिरः श्रोतुमिच्छा

देवर्षिनारददर्शनेन कृतार्थोऽपि भगवान् श्रीकृष्णः तस्मात् अर्थगम्भीराः गिरः किमर्थं श्रोतुमिच्छति इति अत्रोल्लिखितम् ।

विलोकनेनैव तवामुना मुने! कृतः कृतार्थोऽस्मि निवर्हितांहसा।
तथापि शुश्रूषुरहं गरीयसीगिरोऽथवा श्रेयसि केन तृप्यते।। २९।।

**अन्वयः** – मुने! निवर्हितांहसा अमुना तव विलोकनेन एव कृतार्थः कृतः अस्मि। तथापि अहं गरीयसीः (तव) गिरः शुश्रूषुः अस्मि। अथवा श्रेयसि केन तृप्यते?

**प्रतिपदार्थः** – मुने = हे मुनिश्रेष्ठनारद! निवर्हितांहसा = निरस्तपापेन, अपहृतपाप्मना, अमुना = अनेन, तव = भवतः, विलोकनेन = दर्शनेन, कृतार्थः = कृतकृत्यः, कृतः = विहितः, अहं = श्रीकृष्णः, गरीयसीः = अर्थगम्भीराः, अर्थवत्तराः, गिरः = वाचः, शुश्रूषुः = श्रोतुम् इच्छुकः, श्रेयसि = कल्याणविषये, केन = केन पुंसा, तृप्यते = सन्तुष्टः भवति।

**श्लोकार्थः** – हे मुनि? यद्यपि पापनिवारणे समर्थस्य भवतः दर्शनात् कृतार्थोऽहं तथापि भवतः अर्थगम्भीरां वाणीं श्रोतुमिच्छुकोऽस्मि। यतः आत्मकल्याणविषये कः सन्तुष्टः भवति?

भावार्थः – नारदमुनेः पवित्रदर्शनेन श्रीकृष्णः कृतकृत्योऽस्ति। किन्त्वधुना नारदमुनेः महार्थपूर्णवाणीं श्रोतुम् उत्सहते। यतः आत्महितविषये न कोऽपि सन्तुष्टः भवति, अपि तु सदा आत्मकल्याणमधिकाधिकं कामयते। कृतार्थतायाः प्रमाणाभावात् न केनाऽपि तृप्यते इति भावः।

विशेषः – मानवस्य सर्वसामान्यस्वभावः अत्र प्रदर्शितः। नितरां सुखमनुभूय अपि मनसि तस्य समाधानं वा शान्तिः वा नैव लभते। सर्वदा स्वहितकामना तस्मिन् बलीयसी वर्तते। सामान्यपुरुषरूपेण आत्मानं चिन्तयन् श्रीकृष्णोऽपि मुनिवरस्य न केवलं पवित्रदर्शनेन धन्यतां मन्यते अपि तु तस्य मुखात् महार्थां वाणीं श्रोतुमपि वाञ्छति। तेन सह मुनिं मुख्यविषयम् उपस्थापयितुं प्रेरयति।'श्रेयसि केन तृप्यते?'इति वाक्यं लोकेऽस्मिन् सर्वदा उपयुज्यते। अर्थान्तरन्यासः अलङ्कारः पद्येऽस्मिन् विद्यते।

समासः – निवर्हितांहसा – निवर्हितं अंहः येन सः निवर्हितांहः तेन – बहुव्रीहिसमासः।

कृतार्थः – कृतः अर्थः यस्य सः – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. कस्य विलोकनेन श्रीकृष्णः कृतार्थः?

२. गरीयसीः गिरः कः शुश्रूषुः?

### ५.२.५. नारदागमनप्रयोजनजिज्ञासा

देवर्षिनारदस्य आगमनप्रयोजनजिज्ञासा श्रीकृष्णस्य मनसि वर्तते इत्येव प्रस्तुतश्लोके निगदितम् ।

**गतस्पृहोऽप्यागमनप्रयोजनं वदेति वक्तुं व्यवसीयते यया।**
**तनोति नस्तामुदितात्मगौरवो गुरुस्तवैवागम एष धृष्टताम् ।।३०।।**

**अन्वयः** – गतस्पृहः अपि आगमनप्रयोजनं वद इति वक्तुं यया व्यवसीयते उदितात्मगौरवः

गुरुः एष तव आगमः एव नः तां धृष्टतां तनोति।

**प्रतिपदार्थः** – गतस्पृहः = निःस्पृहः, विरक्तः, आगमनप्रयोजनम् = आगमनहेतुः, आगमनकारणम् , वद = ब्रूहि, इति = इत्थम् ,वक्तुम् = कथयितुम् , निगदितुम् , यया = धृष्टतया व्यवसीयते =उद्यम्यते, उदितात्मगौरवः = प्रकटितनिजमाहात्म्यम् , आगमः = आगमनम् , नः = अस्माकम् , गुरुः = श्लाघ्यः, महान् , एषः = अयम्, धृष्टताम् = धाष्ट्‍र्यम् , तनोति = विस्तारयति।

**श्लोकार्थः** – निःस्पृहः भूत्वा अपि भवान् आगमनप्रयोजनं कथयतु इति वक्तुं या धृष्टता माम् उद्युक्तं करोति तत्रापि भवतः प्रकटितनिजमाहात्म्यमेव धृष्टतावर्धनाय कारणं विद्यते।

**भावार्थः** – देवर्षिनारदः सांसारिकविषयेभ्यः विरक्तः सन् अपि भगवतः श्रीकृष्णस्य गृहं प्राप्तः। निःस्पृहमानवस्य स्वार्थः कदापि न विद्यते। अर्थिनामेव राजभिः प्रयोजनमिति तु सर्वविदितमेव। परन्तु प्रयोजनेन विना मन्दोऽपि कार्यार्थं न प्रवर्तते। तत्रापि उदितात्मगौरवः नारदः आगतः। अस्य आगमनं निश्चयेन बहुमानविषयः किन्तु अनर्थकं न। ईदृशं महात्मानम् आगमनकारणं पृच्छतीति धृष्टता एव इति श्रीकृष्णः जानाति। अतः नारदस्य आगमनजिज्ञासा हेतुपूर्णा इत्येव भावः।

**विशेषः** – भगवतः श्रीकृष्णस्य विनयशीलता प्रस्तुतपद्येन ज्ञायते।

समासः – गतस्पृहः – गता स्पृहा यस्य असौ – बहुव्रीहिसमासः।

उदितात्मगौरवः – उदितम् आत्मगौरवं येनाऽसौ – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. कः गतस्पृहः विद्यते?

२. श्रीकृष्णः नारदं किं वक्तुं व्यवसीयते?

## ५.३. उपसंहारः

अयं पञ्चमखण्डः नारदमुनेः प्रशंसया परिपूर्णोऽस्ति। अभ्यागतनारदस्य आगमनहेतुजिज्ञासा श्रीकृष्णस्य मनसि वर्तते। तेन हि सः मुनिः स्तौति। तस्य मङ्गलमयदर्शनंवेदविद्यावितरणस्वभावः सार्थकवाणी च सहेतुकमागमनं सूचयतीति वाण्या भाषणं विधातव्यमिति खण्डेऽस्मिन् परिज्ञायते। अत्र श्रीकृष्णस्य विनयशीलता अस्मान् विनम्रतां प्रति प्रेरयति। मानवगुणाधिक्यं भगवतः प्रीतिपात्रं भवितुं हेतुः सम्भवति इत्यपि अस्मात् पाठ्यांशात् अवगम्यते।

## ५.४. प्रश्नाः

१ नारददर्शनमाहात्म्यं स्वशब्दैः वर्णयत।

२. श्रीकृष्णेन नारदतेजः कथं विवेचितम्?

## षष्ठः खण्डः

# *नारदकृता श्रीकृष्णस्तुतिः*

**संरचना**

६.०. प्रस्तावना

६.१. लक्षिताधिगमांशाः

६.२. नारदकृता श्रीकृष्णस्तुतिः

६.२.१. नारदस्य प्रत्युत्तरम्

६.२.२. नारदमुनेः स्ववाक्यस्य पुनः प्रतिष्ठापनम्

६.२.३. साङ्ख्यशास्त्रानुसारं वर्णितपुरुषः श्रीकृष्णः एव

६.२.४. वराहरूपेण पृथिव्याः उद्धरणम्

६.२.५. भगवतः अवगम्यत्वम्

६.२.६. श्रीकृष्णस्य भूभारापहारकत्वम्

६.२.७. नारदस्य विनयोक्तिः

६.२.८. श्रीकृष्णस्य जगत्पालनसामर्थ्यम्

६.२.९. लोकानां स्तुतिकर्म अपमानजन्यम्

६.३. उपसंहारः

६.४. प्रश्नाः

## ६.०. प्रस्तावना

'नारदकृता श्रीकृष्णस्तुतिः'इत्ययमंशः शिशुपालवधमहाकाव्यस्य प्रथमसर्गे वर्तते। महाकविमाघेन एकत्रिंशत्तमश्लोतः आरभ्य एकोनचत्वारिंशत् श्लोकं यावत् अंशोऽयं विवेचितः। तत्र हि श्रीकृष्णस्य जिज्ञासापरिपूरणाय नारदस्य प्रत्युत्तरं, स्वकीयवाक्यस्य दृढीकरणञ्चान्तर्भवति। तथैव साङ्ख्यशास्त्रप्रतिपादकपुरुषः, वराहरूपेण पृथिव्याः उद्धारकः, भूभारापहारकः, जगत्पालकश्चेति विशेषणप्रयोगः श्रीकृष्णस्य स्तवनविषये नारदमुनिना कृतः। अपि च भगवद्तत्त्वम् अगम्यमस्ति इत्यपि सूचितम्। एवं भगवतः स्तवः अत्र उद्बोधितः।

## ६.१. लक्षिताधिगमांशाः

* भगवद्तत्त्वस्य अगम्यत्वं वर्तते इति छात्रः जानाति ।
* दुष्टदमनकर्तुः श्रीकृष्णस्य जगदोद्धारकार्यमवगच्छति ।
* साङ्ख्यशास्त्रप्रतिपादितपुरुषस्वरूपम् अभिजानाति ।
* नारदस्य विनयशीलस्वभावं ज्ञातुं प्रभवति ।
*'ईश्वरसाक्षात्कारः' इत्येव निःस्पृहध्येयमिति अधिगच्छति ।
* स्तुतिगानं कथं करणीयमिति अवगन्तुं शक्नोति ।

## ६.२. नारदकृता श्रीकृष्णस्तुतिः

भगवान् श्रीकृष्णः नारदमुनेः आगमनहेतुजिज्ञासुः आसीत् । तस्मात् तां जिज्ञासां परिपूरयितुं देवर्षिः स्वकीयकथनम् आरब्धवान् । आदौ सः भगवतः श्रीकृष्णस्य स्तवनमकरोत् । तदेव स्तवनमधुना अत्र निरूप्यते ।

### ६.२.१. नारदस्य प्रत्युत्तरम्

भगवता श्रीकृष्णेन नारदस्य आगमनप्रयोजनं पृष्टे सति प्रस्तुतश्लोकेन मुनिना प्रत्युत्तरं प्रदत्तम्।

**इति ब्रुवन्तं तमुवाच स व्रती न वाच्यमित्थं पुरुषोत्तम! त्वया।**
**त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरु योगिनामपि।। ३१।।**

**अन्वयः** - अति ब्रुवन्तं तं स व्रती उवाच - पुरुषोत्तम! त्वया इत्थं न वाच्यम् । योगिनाम् अपि त्वमेव साक्षात्करणीयः इत्यतः गुरुकार्यं किमस्ति।

**प्रतिपदार्थः** - इति = इत्थम् , ब्रुवन्तम् = कथयन्तम् , तम् = श्रीकृष्णम् , सः = नारदमुनिः, व्रती = मुनिर्नारदः, उवाच = उक्तवान् , हे पुरुषोत्तम = हे नरोत्तम, त्वया = भवता, इत्थम् = ईदृशम् , न वाच्यम् = न वक्तव्यम् , योगिनाम् = समहितचेतसाम्, त्वम् = भवान् , साक्षात्करणीयः = प्रत्यक्षीकर्तव्यः, अतः = अस्मात् , गुरु = महत्, श्रेष्ठम् , कार्यम् = प्रयोजनम् , किमस्ति = किं विद्यते।

**श्लोकार्थः** – एवं कथयन्तं श्रीकृष्णं मुनिः उक्तवान् – हे पुरुषोत्तम! भवता एवं न वक्तव्यम् । यतः योगिनामपि भवान् एव साक्षात्करणीयः इत्यतः तदपेक्षया श्रेष्ठं कार्यं किं विद्यते?

**भावार्थः** – सनत्कुमारादयः वीतस्पृहाः योगिनोऽपि भवतः साक्षात्कारस्य लोभं न परित्यजन्ति। अतः भवद्दर्शनमेव अस्माकम् आगमनप्रयोजनम् । तात्पर्यं, निःस्पृहानामपि ईश्वरदर्शनम् इति प्रयोजनं सम्भवति। तस्मात् न प्रयोजनान्तरप्रश्नावकाशः इति भावः।

**विशेषः** – योगिनामपि ईश्वरः प्रत्यक्षीकर्तव्यः इति महत्प्रयोजनं विद्यते नान्यत् । तदेव तेषां कृते श्रेष्ठकार्यम् ।

समासः –पुरुषोत्तमः – पुरुषेषु उत्तमः – सप्तमीतत्पुरुषसमासः।

व्रती – व्रतम् अस्य अस्तीति – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. योगिनां श्रेष्ठं कार्यं किमस्ति?

२. पुरुषोत्तम इति कस्य सम्बोधनम्?

### ६.२.२. नारदमुनेः स्ववाक्यस्य पुनः प्रतिष्ठापनम्

त्वमेव साक्षात्करणीयः इत्येतत् स्वकथनं पुनरेकवारं प्रतिपादनाय प्रस्तुतश्लोकं नारदः वदति।

**उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयाऽतिदुर्गमम् ।**
**उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया।। ३२।।**

**अन्वयः** – उदीर्णरागप्रतिरोधकम् अभीक्ष्णम् अक्षुण्णतया जनैः अतिदुर्गमं मोक्षपथम् उपेयुषः मनस्विनः त्वं निरपायसंश्रया अग्रभूमिः (असि)।

**प्रतिपदार्थः** – उदीर्णरागप्रतिरोधकम् = प्रवृद्धविषयाभिलाषनिवारकम् , अभीक्ष्णम् = मुहुर्मुहुः, निरन्तरम् , अक्षुण्णतया = अनभ्यस्तत्वेन, अतिदुर्गमम् = अतिकठिनम्,

गन्तुमशक्यम् , उपेयुषः = प्राप्तवतः, परिशीलयतः, मनस्विनः = आत्मचिन्तापरायणस्य, धीरस्य ,निरपायसंश्रया = पुनरावृत्तिरहितप्राप्तिः, अग्रभूमिः = प्राप्यस्थानम् , जनैः = मुमुक्षुभिः, मोक्षपथम् = अपवर्गमार्गम् , त्वम् = भवान् ।

**श्लोकार्थः** – प्रवृद्धसांसारिकविषयानाम् अनुरागः यत्र प्रतिरोधकः तथा च अनभ्यस्तत्वेन अतिकठिनः तं मोक्षमार्गं प्राप्तवतः मनस्विनः मोक्षपरायणपुरुषस्य कृते भवान् एव पुनरावृत्तिरहितप्राप्तिः अग्रभूमिः इत्युक्ते प्राप्यस्थानं विद्यते।

अस्मिन् संसारे प्रवृद्धविषयाभिलाषः चौरः स्वकीयमार्गे अवरोधकर्तारं प्रतिबन्धकं चिन्तयति। अपि च तेभ्यः दूरं गन्तुं दुर्गममार्गेण गत्वा निर्बाधस्थानप्राप्तिम् अभयाय सः कल्पते। यतो हि ततः पुनः प्रत्यागमनं नापेक्षितमिति।

**भावार्थः** – यथा धीरः चौरः जनसमूहरूपम् अपायकारकं प्रतिरोधकं निवारयितुं कण्टकाकीर्णेन दुर्गमारण्यमार्गेण गच्छन् अपायरहितं स्थानं लभते। तादृशमेव मुक्तिकामो मनस्वी प्रदीप्तविषयाभिलाषैः सप्रतिबन्धकम् अभ्यासराहित्यात् च कष्टसाध्यं मोक्षमार्गं भजमानोऽन्ते श्रीकृष्णमेव विश्रामधामरूपं लभते। तं प्राप्य सः जन्ममरणबन्धनचक्रात् मुक्तः भवति।

**विशेषः** – अत्र हि कामक्रोधादिदुर्गुणाः मुमुक्षोः मार्गे प्रतिबन्धकाः भवन्ति। तेषां नियन्त्रणम् अतीव कठिनम्। यः कश्चित् तान् वशीकृत्य मोक्षमार्गमेव भजते सः निश्चयेन मोक्षं प्राप्नोति। तस्मात् 'मुमुक्षुणामपि त्वमेव साक्षात्करणीयः, त्वमेव विदित्वा अतिमृत्युमेति, नान्यः मार्गः' इत्येव नारदः प्रतिपादयितुं कामयते। अतः भवदीयसाक्षात्कारः एव ममागमनप्रयोजनमिति सः भगवन्तं निवेदयति।

समासः – उदीर्णरागप्रतिरोधकम् – उदीर्णः रागः एव प्रतिरोधकः, यस्मिन् तम् – कर्मधारयसमासः।

निरपायसंश्रया – निर्गतः अपायः यस्मात् सः, निरपायः संश्रयः यस्याः सा – बहुव्रीहिसमासः।

अग्रभूमिः – अग्रे भूमिः – तत्पुरुषसमासः।

दुर्गमः – दुःखेन गम्यते इति – उपपदतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. मनस्विनः अग्रभूमिः का?

२. उदीर्णरागप्रतिरोधकमार्गं कः चिनोति?

## ६.२.३.साङ्ख्यशास्त्रानुसारं वर्णितपुरुषः श्रीकृष्णः एव

साङ्ख्यशास्त्रोक्तपुरुषसाक्षात्कारात् मोक्षः न अस्मत् साक्षात्कारात् इत्याशङ्का श्रीकृष्णस्य मनसि माभूत् तदर्थं प्रस्तुतश्लोकः नारदमुनिना उद्धृतः।

**उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथञ्चन।**
**बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः।।३३।।**

**अन्वयः** – पुराविदः त्वां निगृहीतमानसैः अध्यात्मदृशा कथञ्जन गृहीतम् उदासितारं बहिर्विकारं प्रकृतेः पृथक् पुरातनं पुरुषं त्वां विदुः।

**प्रतिपदार्थः** – पुराविदः = पूर्वज्ञाः कपिलादयः, मुनयः, त्वाम् = भवन्तम् , निगृहीतमानसैः = संयतचित्तैर्योगिभिः, अन्तरनिबद्धचित्तैर्योगिभिः, अध्यात्मदृशा = अन्तर्दृशा, प्रत्यग्दृष्ट्या, कथञ्चन = महाप्रयासेन, गृहीतम् = साक्षात्कृतम् , उदासितारम्= उदासीनम् , बहिर्विकारम् = महदादिप्रकृतिविकारभिन्नम् , प्रकृतेः = प्रधानात् , पृथक् = भिन्नम् , पुरातनम् = पुराणम् , सनातनम् , पुरुषम् = पुरुषपदवाच्यम्, विदुः = जानन्ति।

**श्लोकार्थः** –पूर्वज्ञाः कपिलादिमहर्षयः भवन्तं वशीकृतमानसैः अन्तर्दृष्ट्या महता प्रयासेन साक्षात्कृतम् उदासीनं, महदादिप्रकृतिविकारभिन्नं, मूलप्रकृतेः पृथक् पुरातनं पुरुषं मन्यन्ते।

**भावार्थः** – कपिलादिमहर्षयः साङ्ख्यदृष्ट्या श्रीकृष्णमेव पुराणपुरुषं चिन्तयन्ति। सः आदिकारणभूतायाः प्रकृतेः भिन्नोऽस्ति। प्रकृतिः कर्त्री, पुरुषः तु द्रष्टा उदासीनः। महत्तत्वम् , अहङ्कारः, पञ्चतन्मात्राः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, पञ्चमहाभूतानि चेति त्रयोविंशतिविकाराः प्रकृतेरेव। पुरुषस्तु तेभ्यः बहिर्भूतः,

पुष्करपलाशवत् निर्लिप्तत्वात् । एवम्भूतं भगवन्तं श्रीकृष्णं वशीकृतमानसाः महामुनयः अन्तर्दृष्ट्या प्रयासपूर्वकं साक्षात्कृतवन्तः। अतः भवत्साक्षात्काराय ममागमनमिति नारदाभिप्रायः।

**विशेषः** – श्लोकेऽस्मिन् सम्पूर्णसाङ्ख्यशास्त्ररहस्यं प्रतिपादितम् । साङ्ख्यशास्त्रस्य प्रवर्तकः कपिलमुनिरेव पुराविदः नाम्ना उल्लेखितः। साङ्ख्यदर्शनानुसारं पुरुषः निष्क्रियः निर्गुणश्च विद्यते।

समासः – निगृहीतमानसैः – निगृहीतं मानसं यैः तैः – बहुव्रीहिसमासः।

अध्यात्मदृशा – आत्मनि अधि – अव्ययीभावसमासः।

अध्यात्मं या दृक् सा तया – कर्मधारयसमासः।

बहिर्विकारम् – विकारेभ्यः बहिः – अव्ययीभावसमासः।

**स्वावलोकनप्रश्नाः**

१. कः पुरातनः पुरुषः?

२. पुराविदः कम् उदासितारं मन्यन्ते?

### ६.२.४. वराहरूपेण पृथिव्याः उद्धरणम्

आगमनप्रयोजनकथने नारदमुनिः भगवतः श्रीकृष्णस्य दर्शनमाहात्म्यं कथयति। भगवता विभिन्नावतारं धृत्वा जगतः रक्षणं कृतमिति प्रतिपादयन् सः अस्मिन् श्लोके वराहावतारस्य स्मारणं कारयति।

**निवेशयामासिथ हेलयोद्धृतं फणाभृतां छादनमेकमोकसः।**
**जगत्त्रयैकस्थपतिस्त्वमुच्चकैरहीश्वरस्तम्भशिरःसु भूतलम् ।।३४।।**

**अन्वयः** –जगत्त्रयैकस्थपतिः त्वं हेलया उद्धृतं फणिभृताम् ओकसः एकं छादनं भूतलम्, उच्चकैः अहीश्वरस्तम्भशिरःसु निवेशयामासिथ।

**प्रतिपदार्थः**– जगत्त्रयैकस्थपतिः = त्रैलोक्याधिपतिः, त्रैलोक्यशिल्पी, त्वम् = भवान्, हेलया = लीलया, उद्धृतम् = उत्थापितम् , वराहावतारे समुद्धृतम् । फणाभृताम् =

सर्पाणाम् , ओकसः = आश्रयस्थानं तस्य, पातालरूपस्य, एकम् = मुख्यम् , प्रधानम् , छादनम् = आवरणम् , भूतलम् = भूवलयम् , पृथिवीतलम्, उच्चकैः = उन्नतेषु, अहीश्वरस्तम्भसिरःसु = सर्पाधिपतिशेषशिरोरूपस्तम्भाग्रभागेषु, शेषनागसहस्रेषु, निवेशयामासिथ = नियोजितवान् असि। स्थपतिः = प्रधानकर्ता।

**श्लोकार्थः** – त्रैलोक्याधिपतिः भवान् सर्पाणाम् आश्रयस्थानस्य आवरणरूपेण स्थितं भूतलं लीलया उत्थाप्य सर्पाधिपतिशेषस्य शिरोरूपस्तम्भाग्रभागेषु नियोजितवान् ।

**भावार्थः** – भगवान् स्वर्गलोकस्य, भूलोकस्य पाताललोकस्य च अधिपतिः वर्तते। अनेन नागलोकस्य आच्छादनस्वरूपं भूतलं लीलया वराहावतारे समुद्धृतम् । एतत् पृथिवीतलं शेषराजस्य सहस्रफणासु स्थापितम् । अयं शेषराजः एव स्तम्भः इति कल्पितः।

यथा कश्चित् शिल्पी भवनस्य छदः सहजतया उन्नीय उन्नतस्तम्भेषु नियोजयति तथैव भगवता कृतमिति भावः।

**विशेषः** – भगवतः सगुणस्वरूपप्रतिपादनं देवर्षिनारदेन कृतम् । श्लोकेऽस्मिन् भगवतः वराहावतरास्य वर्णनं विद्यते। वराहावतारे भगवता स्वदंष्ट्राग्रोपरि भूतलं लीलया धृतमासीत् । एवं त्रिभुवनरक्षणकत्रा पृथिवीरक्षणं कृतमिति नारदमुनिः श्रीकृष्णं स्मारयति। रूपकालङ्कारः अत्र अस्ति।

समासः – जगत्त्रयैकस्थपतिः – जगत्त्रयस्य एकस्थपतिः – षष्ठीतत्पुरुषसमासः।

फणाभृताम् – फणाः बिभ्रतीति, तेषाम् – उपपदतत्पुरुषसमासः।

अहीश्वरस्तम्भशिरःसु – अहीश्वरस्य स्तम्भशिरःसु – षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. त्रैलोक्याधिपतिना किम् उद्धृतम्?

२. त्रिभुवनाधिपतिः भूतलं कुत्र स्थापितवान् ?

### ६.२.५. भगवतः अगम्यत्वम्

भगवद्तत्त्वम् अगम्यं वर्तते। मनुष्यः तत् ज्ञातुं कथं क्षमः समर्थः वा स्यादित्येव कविना श्लोकेऽस्मिन् उपवर्णितम् ।

**अनन्यगुर्वास्तव केन केवलः पुराणमूर्तेर्महिमावगम्यते।**
**मनुष्यजन्माऽपि सुरासुरान् गुणैर्भवान् भवच्छेदकरैः करोत्यधः।।३५।।**

**अन्वयः** – अनन्यगुर्वाः तव पुराणमूर्तेः केवलः महिमा केन अवगम्यते? मनुष्टजन्मा अपि भवान् भवच्छेदकरैः गुणैः सुरासुरान् अधः करोति।

**प्रतिपदार्थः** – अनन्यगुर्वाः = सर्वोत्तमायाः, तव = भवतः, पुराणमूर्तेः = पुरातनस्वरूपस्य, दिव्यवपुषः, केवलः = अशेषः, महिमा = माहात्म्यम् , केन = पुरुषेण, अवगम्यते = ज्ञायते, भवान् = त्वम् , भवच्छेदकरैः = संसारनिवर्तकैः, भवबन्धनकर्तनपटुभिः, मनुष्यजन्माऽपि = मानवशरीरधारी अपि, गुणैः = ज्ञानैश्वर्यादिभिः गुणैः, सुरासुरान् = देवासुरान् , अधःकरोति = तिरस्करोति।

**श्लोकार्थः**– सर्वोत्तमस्य भवतः दिव्यशरीरस्य माहात्म्यं केन ज्ञायते? इत्युक्ते न कोऽपि ।मानवशरीरं धृत्वा अपि जन्ममरणरूपसंसारस्य विनाशकारकैः ज्ञानैश्वर्यादिभिः गुणैः देवासुरान् भवान् तिरस्करोति।

**भावार्थः** – भगवतः मूर्तिरिव नान्या गरीयसी मूर्तिः। न तादृशः अन्यगुरुः। भगवतः सम्पूर्णमहिमा ज्ञातुम् अशक्य एव। मानवरूपेण रामकृष्णादिकमवतारं धृत्वा स्वकीयगुणैः देवासुरान् तिरस्करोति सः। तात्पर्यं भूमितलमवतीर्णोऽपि स्वर्गस्थान् सुरान् असुरान् च सः विजयते। दृश्यरूपस्य मानवस्वरूपस्य गुणान् माहात्म्यञ्च अवगन्तुं यत्र काठिन्यं तत्र सूक्ष्ममूर्तेः पुराणपुरुषस्य ज्ञानमहिमा कथं वा अवगम्येत इत्येव भावः।

**विशेषः** – श्रीकृष्णस्य अपूर्वमहिमावगमनम् असम्भवम् इति महाकविः बोधयति अत्र। पद्येऽस्मिन् अनुप्रासालङ्कारोऽस्ति।

समासः – पुराणमूर्तेः – पुराणी मूर्तिः तस्याः – कर्मधारयसमासः।

अनन्यगुर्वाः – न विद्यते अन्यः गुरुः यस्याः सा तस्याः– बहुव्रीहिसमासः।

भवच्छेदकरैः - भवच्छेदं कुर्वन्तीति तैः - उपपदतत्पुरुषसमासः।

भवस्य छेदः - भवच्छेदः - षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. कस्य महिमा नावगम्यते?

२. मनुष्यजन्मा कान् अधः करोति?

### ६.२.६. श्रीकृष्णस्य भूभारापहारकत्वम्

भगवतः अवतारोद्दिष्टं किमिति श्लोकेऽस्मिन् महाकविना उपपादितम् ।

**लघूकरिष्यन्नतिभारभङ्गुराममूं किल त्वं त्रिदिवादवातरः।**

**उदूढलोकत्रितयेन साम्प्रतं गुरुर्धरित्री क्रियतेतरां त्वया।।३६।।**

**अन्वयः** - त्वम् अतिभारभङ्गुराम् अमूं लघूकरिष्यन् त्रिदिवात् अवतारः किल। साम्प्रतम् उदूढलोकत्रितयेन त्वया धरित्री गुरुः क्रियतेतराम् ।

**प्रतिपदार्थः** - त्वम् = भवान् , अतिभारभङ्गुराम् = भारातिशयभज्यमानाम् , भाराक्रान्ताम् , अमूं = धरित्रीम् , लघुकरिष्यन् = निर्भरां करिष्यन् , व्यपगतभारां विधास्यन् , त्रिदिवात् = स्वर्गात् , अवातरः = अवतीर्णः, साम्प्रतम् = इदानीम् , त्वया = भवता श्रीकृष्णेन, उदूढलोकत्रितयेन = धारितभुवनत्रयेण, धरित्री = पृथिवी, गुरुः = पूज्या, भाराक्रान्ता, क्रियतेतराम् = अतिशयेन क्रियते।

**श्लोकार्थः** - भवान् भाराक्रान्तां पृथिवीं व्यपगतभारां कर्तुमत्र स्वर्गात् अवतीर्णः किल। किन्तु इदानीं स्वर्ग-मृत्यु-पातालादित्रिलोकान् धारयन् धरित्रीमेव भाराक्रान्ताम् अकरोत् भवान् ।

**भावार्थः** - दुष्टजनैः भाराक्रान्तां पृथिवीं तेषां विनाशं कृत्वा भाररहितां कर्तुं श्रीकृष्णः स्वर्गात् भूमौ अवतीर्णः। परन्तु त्रिलोकधारणकर्ता श्रीकृष्णः स्वयं भारयुक्तः तस्मात् पृथिवीम् अधिकं भारवतीं कृतवान् । तथैव श्रीकृष्णावतारेण पृथिवी गुरु इत्युक्ते पूज्या सञ्जाता इति भावः।

**विशेषः** – भगवतः भूभारापहारकत्वमिति अवतारोद्दिष्टमत्र उल्लिखितम् । तथैव तस्य भूमौ अवतरणं पृथिव्याः पूजनीयतामेव अभिव्यनक्ति। पृथिव्याः भारम् अपनेतुम् अवतीर्णः भगवान् स्वयं पृथ्वीं भारसहितां करोतीति विरोधाभासः। अतः विरोधाभासालङ्कारः अत्र। वस्तुतः धरित्री गुरुः (पूज्या) क्रियते न तु गुरुः (भारवती) इति निन्दा स्तुतिरूपेण पर्यवस्यति।

समासः – उदूढलोकत्रितयेन – उदूढं लोकत्रितयं येन सः तेन – बहुव्रीहिसमासः।

अतिभारभङ्गुराम् – अतिभारेण भङ्गुरा ताम् – तत्पुरुषसमासः।

| **स्वावलोकनप्रश्नाः** |
|---|
| १. भगवान् त्रिदिवात् किमर्थम् अवतीर्णः? |
| २. साम्प्रतं धरित्री केन गुरुः क्रियते? |

### ६.२.७.नारदस्य विनयोक्तिः

प्रस्तुते श्लोके निर्गुणः ईश्वरः भूमौ किमर्थम् अवतरतीति कथयितुं नारदमुनिः प्रयतते।

**निजौजसोज्जासयितुं जगद्द्रुहामुपाजिहीथा न महीतलं यदि।**
**समाहितैरप्यनिरूपितस्ततः पदं दृशः स्याः कथमीश मादृशाम् ।।३७।।**

**अन्वयः** – निजौजसा जगद्द्रुहाम् उज्जासयितुं महीतलं न उपाजिहीथाः यदि ततः समाहितैः अपि अनिरूपितः त्वम् ईश! मादृशां दृशः पदं कथं स्याः?

**प्रतिपदार्थः** – निजौजसा = स्वतेजसा जगद्द्रुहाम् = लोकपीडकानाम् , उज्जासयितुम् = मारयितुम् , महीतलम्= पृथिवीतलम् , न उपाजिहीथा = अवतीर्णाः न भवन्ति। यदि = चेत् , ततः = तर्हि, समाहितैः = समाधिनिष्ठैः, योगिभिः, अनिरूपितः = अनवलोकितः, त्वम् = भवान् , ईश = हे स्वामिन्! मादृशाम् = मत्सदृशानाम् , दृशः = द्रष्टेः, पदम् = गोचरः, कथम् = केन प्रकारेण, स्याः = भवेः।

**श्लोकार्थः** – हे ईश, भवान् यदि स्वतेजसा लोकपीडकानां विनाशाय पृथिवीतलं न आगच्छेत् तर्हि समाधिनिष्ठैः योगिभिः अनवलोकितः कथं वा मादृशां स्वल्पधियां दृष्टिगोचरः स्यात्?

**भावार्थः** – पृथिव्यां श्रीकृष्णः अवतीर्णः इत्यस्मात् अस्मादृशः सर्वसामान्यजनाः दुर्लभं दर्शनं कर्तुं प्रभवन्ति इति नारदस्य अभिप्रायः। वस्तुतः योगिनोऽपि तं साक्षात्कर्तुं न पारयन्ति। एवं चेत् तस्य निर्गुणं स्वरूपं प्रत्यक्षीकर्तुं सामान्यलोकः कथं प्रभवेदिति भावः। नारदमुनेः विनयोक्तिरियम् ।

**विशेषः** – दुष्टजनसंहारः इति श्रीकृष्णस्य महीतलं प्रति आगमनप्रयोजनम् । कंसादीनां विश्वद्रोहकराणां शत्रूणां विनाशाय युगे युगे प्रभुः धरणीतलम् अवतरति। उक्तमेव गीतायाम् – **परित्राणाय साधूनां विनाशाय दुष्कृताम्** इति।

समासः – जगद्द्रुहाम् – जगद्भ्यो द्रुह्यन्तीति तेषाम् – उपपदतत्पुरुषसमासः।

निजौजसा– निजं च तद् ओजश्च तेन – कर्मधारयतत्पुरुषसमासः।

महीतलम् – मह्याः तलम् – षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. भगवता महीतलं किमर्थम् आगम्यते?

२. ईशः कैः अनिरूपितः?

### ६.२.८. श्रीकृष्णस्य जगत्पालनसामर्थ्यम्

जगत्पालकः श्रीकृष्णः एव विश्वे उद्भूतानां सङ्कटानां निवारणाय शक्तः इति ज्ञापयितुं सूर्यस्य उदाहरणं प्रस्तुतश्लोके महाकविना प्रदत्तम् ।

**उपप्लुतं पातुमदो मदोद्धतैस्त्वमेव विश्वम्भर! विश्वमीशिषे।**
**ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः।।३८।।**

**अन्वयः** – विश्वम्भर! मदोद्धतैः उपप्लुतम् अदः विश्वं पातुं त्वमेव ईशिषे।

क्षपातमस्काण्डमलीमसं नभः क्षालयितुं रवेः ऋते कः क्षमेत?

**प्रतिपदार्थः** – विश्वम्भर = हे जगत्पालक! हे त्रैलोक्यरक्षक! मदोद्धतैः = गर्वेण उन्मत्तैः, उपप्लुतम् = पीडितम् , अदः = इदम् , एतत् , विश्वं = जगत् , पातुम् = रक्षितुम् , त्वमेव = भवानेव, ईशिषे = समर्थोऽसि, क्षपातमस्काण्डमलीमसम् = निशान्धकारसन्तानमलिनम् , क्षपा = रात्रिकालः, तमस्काण्डैः = अन्धकारसमूहैः, नभः = आकाशात् , क्षालयितुम् = निर्मलीकर्तुम् , प्रकाशयितुम् , रवेः = सूर्यात् , ऋते = विना,क्षमेत = शक्नुयात् , समर्थः भवेत् ।

**श्लोकार्थः** – हे जगत्पालक! मदोन्मत्तैः पीडितमिदं विश्वं रक्षितुं भवानेव समर्थः। यथा – रात्रिकालस्य गाढान्धकारेण आच्छन्नम् आकाशं निर्मलीकर्तुं सूर्यं विना कः समर्थः भवेत्?

**भावार्थः** – सम्प्रति मदोन्मत्तैः कंसादिराक्षसैः विश्वं त्रस्तं जातम् । भवान् जगत्पालकः इत्यस्मात् तस्य रक्षणाय समर्थोऽस्ति। यथा निशाजनितान्धकारसमूहैः मलिनम् आकाशं निर्मलीकर्तुं केवलं सूर्य एव शक्नोति, नान्यः। सूर्यतुल्यसामर्थ्यं श्रीकृष्णेन विना अस्मिन् जगति कस्यापि नास्तीति भावः। जगत्पालनसामर्थ्यं तस्मिन्नेव इति।

**विशेषः** – भगवान् त्रैलोक्यरक्षकः इत्यतः त्रिभुवनं निष्कण्टकीकर्तुं दुष्टसंहारं विधाय लोकरक्षणं कर्तुं शक्तः अस्ति। सूर्यः स्वतेजसा गाढान्धकारं छिन्नं कृत्वा आकाशं प्रकाशयति तद्वत् श्रीकृष्णः स्वकीयतेजसा लोकसन्तापजनकान् दुर्जनान् मारयित्वा जगद्रक्षणं करोति। तेन हि सः दुष्टदमनकर्तेति अभिधीयते। प्रतिवस्तूपमालङ्कारः श्लोकेऽस्मिन् विद्यते।

समासः – विश्वम्भरः – विश्वं बिभर्ति इति – उपपदतत्पुरुषसमासः।

मदोद्धतैः – मदेन उद्धताः तैः – तृतीयातत्पुरुषसमासः।

क्षपातमस्काण्डमलीमसम् – तमसः काण्डानि तमस्काण्डानि,

क्षपायाः तमस्काण्डानि तैः मलीमसम् – षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. नभः क्षालयितुं कः समर्थः?

२. विश्वम्भरः कीदृशं विश्वं रक्षितुं क्षमः?

## ६.२.९. लोकानां स्तुतिकर्म अपमानजन्यम्

कंसादिक्षुद्रनृपाणां वधकर्ता इति श्रीकृष्णस्य स्तवनं न, अपि तु अपमानः विद्यते इति श्लोकेऽस्मिन् प्रतिपादितम् ।

**करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तवम् ।**
**हरे! हिरण्याक्षपुरःसरासुरद्विपद्विषः प्रत्युत सा तिरस्क्रिया।।३९।।**

**अन्वयः** – हे हरे! जनः मृगाणाम् इव कंसादिभृतां वधात् यत् तव स्तवं करोति, सा हिरण्याक्षरपुरःसरासुरद्विपद्विषः (तव) प्रत्युत तिरस्क्रिया।

**प्रतिपदार्थः** – जनः = लोकः, मृगाणाम् = हरिणानाम् , इव = यथा, वधात् = हननात् , कंसादिमहीभृताम् = कंसादिनृपाणाम् , तव = भवतः, स्तवम् = स्तुतिम्, करोति = विदधाति, हरे = हे कृष्ण! सा = स्तुतिक्रिया, हिरण्याक्षपुरःसरासुरद्विपद्विषः = हिरण्याक्षादिदानवगजरिपोः, प्रत्युत = वैपरीत्येन, तिरस्क्रिया = निन्दा, अवमानः।

**श्लोकार्थः** – हे हरे! मृगाणामिव कंसादिनृपाणां हननात् लोकः भवतः प्रशंसां करोति। किन्तु हिरण्याक्षादि-असुररूपगजानां वधं कुर्वतः भवतः सा तु निन्दा एव न तु स्तुतिः।

**भावार्थः** – सिंहस्य मृगहत्या तिरस्कार्या। यतो हि समतुल्यता तत्र नैव विद्यते। जनाः अपि मृगाणामिव दानवानां वधं कृतवान् इति श्रीकृष्णस्य स्तवनं कुर्वन्ति। वस्तुतः हिरण्याक्षप्रभृतयः ये असुरा ते एव गजतुल्याः आसन् । अतः गजघातिनः सिंहस्य मृगवधवर्णनमिव महासुरहन्तुः श्रीकृष्णस्य कंसादिक्षुद्रनृपवधवर्णनं तिरस्कारविषयः। तेन हि श्रीकृष्णस्य अपमानः एव न तु स्तवनमिति भावः।

**विशेषः** – कंसादिनृपाणां तुलना हिरण्याक्षादिदुर्दमनीयदानवैः सह न कदापि शक्या। यतो हि कंसादिनृपाः हिरण्याक्षादिदुर्दमनीयराक्षसानाम् अपेक्षया क्षुद्राः आसन् । तस्मात् क्षुद्रनृपाणां हननेन श्रीकृष्णस्य सामर्थ्यनिन्दनमेव। लोकप्रपीडकानां वधः श्रीकृष्णस्य महत्कार्यमिति अस्मात् श्लोकात् ज्ञायते। रूपकालङ्कारः अत्र।

समासः – हिरण्याक्षपुरःसरासुरद्विपद्विषः – हिरण्याक्षपुरःसराः हिरण्याक्षप्रभृतयः ये असुराः, ते एव द्विपाः तेषां द्विषः – षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. जनाः श्रीकृष्णं कस्मात् स्तवन्ति?

२. कंसादिमहीभृतां वधः केन कृतः?

**६.३.उपसंहारः**

खण्डेऽस्मिन् नारदमुनिना श्रीकृष्णस्य या स्तुतिः विहिता तस्याः विवेचनं कृतमस्ति । दुष्टदमनकर्तुः श्रीकृष्णस्य महिमा अपि अगम्यः इत्यपि सूचितम् । भूमौ अवतारं स्वीकृत्य जगद्रक्षणं विधाय पालककर्तव्यं तेन परिपालितमिति अत्र बोधितम् । अनेन छात्रः अभिजानाति यत् 'पालकत्वम्'कीदृशं भवतीति । अपि च स्वकीयकर्तव्यपूर्ततां कर्तुं सः प्रेरणां प्राप्नोति।

**६.४.प्रश्नाः**

१.श्रीकृष्णस्य जगदोद्धारकार्यं विवेचयत।

२.भगवतः जगत्पालनसामर्थ्यं नारदमुनिना कथं प्रतिपादितम्?

३.नारदकृतां श्रीकृष्णस्तुतिं वर्णयत।

ജ്ഞ

## सप्तमः खण्डः
## *नारदागमनप्रयोजनभूमिका*

**संरचना**

७.०.प्रस्तावना
७.१. लक्षिताधिगमांशाः
७.२.नारदागमनप्रयोजनभूमिका
७.२.१. रहसि सम्भाषणलोलुपः नारदः
७.३. नारदस्य प्रधानविषयोपस्थापनम्
७.३.१. इन्द्रसन्देशश्रवणाय निवेदनम्
७.४. उपसंहारः
७.५. प्रश्नाः

### ७.०. प्रस्तावना

'नारदागमनप्रयोजनभूमिका' इति पाठ्यबिन्दुः शिशुपालवधमहाकाव्यस्य प्रथमसर्गे अस्माभिः अवलोक्यते। अत्र नारदस्य रहसि सम्भाषणलोलुपता तथाच इन्द्रसन्देशश्रवणाय निवेदनमिति विषयद्वयं समाख्यातम्। तथैव प्रधानविषयोपस्थापनाय ईदृशी भूमिका आवश्यकीति देवर्षिनारदस्य सन्देशकथनकौशल्यं दृग्गोचरीभवति।छात्रैः तादृशं संलापकौशल्यं ज्ञातव्यमिति धिया समाविष्टोऽयमंशः अत्र।

### ७.१.लक्षिताधिगमांशाः

* नारदागमनप्रयोजनभूमिका अत्र अवगम्यते।
* सन्देशकथनरीतिः छात्रैः ज्ञायते।
* नारदः उत्तमः सन्देशवाहकः इत्यवगन्तुं सः समर्थः भवति।
* अनेन बिन्दुना माघस्यापि व्यवहारनैपुण्यम् अभिज्ञातुं सः प्रभवति।

## ७.२.नारदागमनप्रयोजनभूमिका

श्रीकृष्णं प्रति देवर्षिनारदस्य आगमनं सप्रयोजनं विद्यते। इन्द्रस्य सन्देशार्थं कथयितुमुद्युक्तः नारदः तत्पूर्वं भूमिकां लक्ष्यीकरोति।तस्यैव वर्णनं सम्प्रत्यत्र क्रियते।

### ७.२.१. रहसि सम्भाषणलोलुपः नारदः

नारदमुनिः श्रीकृष्णेन सह सम्भाषणाय समुत्सुकोऽस्ति इति महाकविः श्लोकेऽस्मिन् कथयति।

**प्रवृत्त एव स्वयमुज्झितश्रमः क्रमेण पेष्टुं भुवनद्विषामसि।**
**तथापि वाचालतया युनक्ति मां मिथस्त्वदाभाषणलोलुपं मनः।।४०।।**

**अन्वयः** –उज्झितश्रमः(सन्) क्रमेण भुवनद्विषां पेष्टुं स्वयमेव प्रवृत्तः असि। तथापि मिथः त्वदाभाषणलोलुपं मनः मां वाचालतया युनक्ति।

**प्रतिपदार्थः** – उज्झितश्रमः = परित्यक्तपरिश्रमः, क्रमेण = क्रमशः, पर्यायेण, भुवनद्विषाम् = जगद्द्रुहाम् , जगतः शत्रूणाम् , पेष्टुम् = हन्तुम् , स्वयमेव = आत्मनैव, प्रवृत्तः = उद्युक्तः, मिथः = परस्परम् , त्वदाभाषणलोलुपम् = त्वया सह संलापे समुत्सुकम् , मममनः = मच्चेत् , माम् = निःस्पृहमपि मां नारदम् , वाचालतया = वाचाटतया, जल्पाकत्वैन, युक्ति= योजयति।

**श्लोकार्थः** – यद्यपि भवान् परिश्रमम् अचिन्तयन् लोकद्रुहां हन्तुं स्वयमेव प्रवृत्तः तथापि भवता सह रहसि सम्भाषणे लोलुपं मम मनः मां वाचालं करोति।

**भावार्थः** – भगवान् श्रीकृष्णः भुवनदुष्टानां विनाशाय स्वयं प्रेरितोऽस्ति। नारदमुनिरपि अत्र दुर्जनकर्मप्रतिपादनाय समागतः। वस्तुतः सर्वज्ञश्रीकृष्णस्य पुरतः दुष्कर्मकर्तृणां विषये निवेदन नैव युज्यते। अतः रहसि सम्भाषणे नारदमुनिः आत्मनः वाचालत्वमेव मन्यते इति भावः।

**विशेषः** – नारदमुनेः विनयशीलता अत्र दृश्यते। तथैव श्रीकृष्णः सर्वदा दुष्टजनसंहाराय स्वयं प्रवृत्तः इत्यपि ज्ञायते।

समासः –उज्झितश्रमः – उज्झितः श्रमः येन सः – बहुव्रीहिसमासः।

भुवनद्विषाम् – भुवनानां द्विषः तेषाम् – षष्ठीतत्पुरुषसमासः।अथवा
भुवनानि द्विषन्तीति तेषाम् – उपपदतत्पुरुषसमासः।

त्वदाभाषणलोलुपम् – त्वया सह आभाषणं तस्मिन् लोलुपः
तम् – तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. कः स्वयममुज्झितपरिश्रमः?

२. नारदस्य मनः किमर्थं लोलुपं विद्यते?

## ७.३. नारदस्य प्रधानविषयोपस्थापनम्

अत्र नारदमुनिः ‘इन्द्रसन्देशकथनम्’ इति प्रधानविषयोपस्थापनं श्रीकृष्णस्य पुरतः विदधाति। आगमनहेतुं प्रतिपादयितुं सः इन्द्रेण श्रीकृष्णस्य सम्बन्धं स्मारयति। अपि च बन्धुत्वभावनाम् उत्पाद्य इन्द्रकार्यं परिपूरयितुं प्रेरयति। सः विषयः अधुना स्पष्टीक्रियते।

### ७.३.१. इन्द्रसन्देशश्रवणाय निवेदनम्

अस्मिन् श्लोके देवर्षिनारदः भगवन्तं श्रीकृष्णम् इन्द्रसन्देशं निवेदयितुम् इच्छति। अपि च आगमनं सहेतुकमिति स्पष्टयति। इतः नारदः मुख्यविषयम् उपस्थापयति।

**तदिन्द्रसंदिष्टमुपेन्द्र! यद्वचः क्षणं मया विश्वजनीनमुच्यते।**
**समस्तकार्येषु गतेन धुर्यतामहिद्विषस्तद् भवता निशम्यताम् ।। ४१।।**

**अन्वयः** – तत् उपेन्द्र! इन्द्रसन्दिष्टं विश्वजनीनं यत् वचः क्षणं मया उच्यते। तत् अहिद्विषः समस्तकार्येषु धुर्यतां गतेन भवता निशम्यताम् ।

**प्रतिपदार्थः** – उपेन्द्र = हे इन्द्रानुज! हे श्रीकृष्ण! इन्द्रसन्दिष्टम् = इन्द्रकथितम् , विश्वजनीनम् = सार्वजनिकम् , सर्वलोकोपकारकम् , तत् = तद्वचः, अहिद्विषः = इन्द्रस्य, समस्तकार्येषु = निखिलकर्तव्येषु, धुर्यताम् = धुरन्धरताम् ,

उत्तरदायित्वनिर्वाहकताम्, गतेन = प्राप्तेन, भवता = त्वया श्रीकृष्णेन, निशम्यताम् =श्रूयताम्।

**श्लोकार्थः** – हे इन्द्रानुज ! इन्द्रसन्देशरूपं सर्वलोकोपकारकं यद्वाक्यं किञ्चित्कालं मया उच्यते तत् इन्द्रस्य समस्तकार्येषु उत्तरदायित्वनिर्वाहकतां कुर्वता भवता श्रोतव्यम्।

**भावार्थः** – देवर्षिनारदः श्रीकृष्णम् इन्द्रसन्देशं श्रावयितुं वाञ्छति। इदं सन्देशरूपं कार्यं सार्वजनिकं विद्यते। यतः विश्वजनाः तस्मात् उपकृताः भविष्यन्ति। तथैव इन्द्रस्य सर्वकार्येषु भगवता श्रीकृष्णेन साहाय्यं विधाय उत्तरदायित्वं निरूढम् । इन्द्रस्य अनुजः भवान् इत्यतः ज्येष्ठभ्रातुः सन्देशश्रवणं कार्यमिति भावः। बन्धुकर्तव्यपूर्तता श्रीकृष्णेन विधातव्या इति।

**विशेषः** – श्लोकेऽस्मिन् श्रीकृष्णस्य कृते 'उपेन्द्र' इति सम्बोधनम् , तस्मिन् विषये काचित् कथा पुराणेषु समुपलभ्यते। इन्द्रादिदेवान् , पराभूय असुरेन्द्रः बलिः लोकत्रयेऽपि अधिराज्यं कर्तुम् आरब्धवान् । तदनन्तरं तेन यज्ञस्य प्रारम्भः कृतः। तत्समये दितेः प्रार्थनया भगवान् विष्णुः वामनरूपं धृत्वा बलेः यज्ञशालां सम्प्राप्तः। अपि च यज्ञावसरे दानरूपेण पादत्रयं भूमिः याचिता। तस्याः याचनायाः अङ्गीकारात् विष्णुना विराट्रूपं धृतम् । ततः विष्णुः पादत्रयेण लोकत्रयं व्याप्य असुरेन्द्रं बलिं सपरिवारं पाताललोकं अप्रेषयत्। अनेन सत्कार्येण प्रसन्नाः देवगणाः विष्णोः 'उपेन्द्रः' इति नामकरणम् अकुर्वन् ।

अतः ज्येष्ठभ्रातुः सन्देशश्रवणे विश्वकल्याणकारिता, अनुजकर्तव्यपालनम् उत्तरदायित्वनिर्वहनश्चेति हेतुत्रयम् । अत्र हि काव्यलिङ्गमलङ्कार वर्तते।

समासः – उपेन्द्रः – इन्द्रम् उपगतः – अव्ययीभावसमासः।

इन्द्रसन्दिष्टम् – इन्द्रेण सन्दिष्टम् – तृतीया तत्पुरुषसमासः।

विश्वजनीनम् – विश्वजनेभ्यः हितम् – तत्पुरुषसमासः।

समस्तकार्येषु – समस्तानि च तानि कार्याणि तेषु – कर्मधारयसमासः।

अहिद्विषः – अहिं द्वेष्टि इति अहिद्विट् तस्य – उपपदतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. श्रीकृष्णेन किं श्रोतव्यम्?

२. नारदेन उक्तं वचः कथं विद्यते?

## ७.४. उपसंहारः

अस्मिन् सप्तमे खण्डे देवर्षिनारदेन प्रधानविषयोपस्थापनाय भूमिका प्रकथितेति अवगम्यते। रहसि सम्भाषणं कर्तुकामः नारदः मुख्यविषयस्य गाम्भीर्यं ज्ञापयितुं वाञ्छतीति स्पष्टीभवति। श्रीकृष्णम् इन्द्रस्य अनुजः इति सम्बोध्य बान्धव्यं कर्तव्यपूर्ततायै प्रमुखकारणं भवितुमर्हतीति सूचना अस्मात् खण्डात् प्राप्यते। भाषणनैपुण्यं स्वकीयहेतुसम्पूरणायप्राधान्यं भजते इति छात्रज्ञानम् इतः सम्भवति।

## ७.५. प्रश्नाः

१. 'समस्तकार्येषु गतेन धुर्यतामहिद्विषः तद् भवता निशम्यताम्' इति वाक्यं स्पष्टयत।

२.नारदमुनेः विनयशीलता महाकविना कथं प्रदर्शिता?

## अष्टमः खण्डः
# *शिशुपालस्य पूर्वजन्मवृत्तान्तः*

**संरचना**

८.०.प्रस्तावना

८.१.लक्षिताधिगमांशाः

८.२. शिशुपालस्य पूर्वजन्मवृत्तान्तः

८.२.१.शिशुपालस्य पूर्वजन्मकथनम्

८.२.२.हिरण्यकशिपुरूपेण सर्वप्रथमं भयस्य पूर्वावतरः

८.२.३.हिरण्यकशिपोः दिक्पालविजयः

८.२.४.देवानां हिरण्यकशिपोः भयम्

८.२.५.भयभीतदेवानां सन्ध्यावन्दनादिक्रियापरित्यागः

८.२.६. हिरण्यकशिपोः वधाय भगवतः नृसिंहावतारवर्णनम्

८.३.उपसंहारः

८.४. प्रश्नाः

## ८.०.प्रस्तावना

'शिशुपालस्य पूर्वजन्मवृत्तान्तः' इति पाठ्यांशःमहाकवेः माघस्य शिशुपालवधमहाकाव्यस्य प्रथमसर्गे समाविष्टोऽस्ति। अंशोऽयं द्विचत्वारिंशत्तमश्लोकतः सप्तचत्वारिंशत्तमश्लोकं यावत् समुपवर्णितः। तत्र हि शिशुपालस्य पूर्वजन्मकथनं, हिरण्यकशिपुरूपेण भयस्यपूर्वावतारः, हिरण्यकशिपोः दिक्पालविजयः,तस्मात् देवानां भयम् ,भयभीतदेवानां स्वकर्तव्यपरित्यागः अपि च विष्णोः नृसिंहावतारस्वीकरणमित्यादयः विषयाः अन्तर्भूतास्सन्ति। एते विषयाः सम्प्रत्यत्र विविच्यन्ते।

## ८.१. लक्षिताधिगमांशाः

* छात्रः शिशुपालस्य पूर्वजन्मवृन्तान्तं जानाति।
* शिशुपालः पूर्वजन्मनि हिरण्यकशिपुः आसीदिति पाठकः अवगच्छति।

* हिरण्यकशिपोः औद्धत्यं ज्ञातुं सः प्रभवति।
*‘असुरशक्तिः बलवती’ इत्यवगमनं तस्य भवति।
* भगवतः नृसिंहावतारप्रयोजनमभिजानाति।
* शिशुपालवधस्य गाम्भीर्यं ज्ञापयितुं नारदस्य प्रयासान् प्रत्यभिजानाति।

## ८.२. शिशुपालस्य पूर्वजन्मवृत्तान्तः

‘शिशुपालवधः अत्यावश्यकः’इति वक्तुकामः नारदः तस्य पूर्वजन्मकथनं विदधाति। विषयगाम्भीर्यं श्रीकृष्णः जानीयादित्येव नारदस्य अभिलषितम्। एषा कामना नारमुनिना केन प्रकारेण पूर्णतां नीता इत्येव अधुनात्र स्पषटीक्रियते।

### ८.२.१. शिशुपालस्य पूर्वजन्मकथनम्

इन्द्रसन्देशं कथयितुम् उद्युक्तः नारदमुनिः शिशुपालस्य पूर्वजन्मनः स्मारणार्थं प्रस्तुतश्लोकम् उपस्थापयति।

**अभूदभूमिः प्रतिपक्षजन्मनां भियां तनूजस्तपनद्युतिर्दितेः।**
**यमिन्द्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते।। ४२।।**

**अन्वयः** – प्रतिपक्षजन्मनां भियाम् अभूमिः तपनद्युतिः दितेः तनूजः अभूत् । हरेः इन्द्रशब्दार्थनिषूदनं यं हिरण्यपूर्वं कशिपुं प्रचक्षते।

**प्रतिपदार्थः** – प्रतिपक्षजन्मनाम् = शत्रुसमुद्भूतानाम् , भियाम् = भीतीनाम् , अभूमिः =अविषयः, तपनद्युतिः =सूर्यतेजः, दितेः = कश्यपपत्न्याः, तनूजः = सुतः,दैत्यः इति। अभूत् = बभूव, अभवत् , हरेः = इन्द्रस्य, इन्द्रशब्दार्थनिषूदनम् = इन्द्रपदार्थभूतपरमैश्वर्यनिवर्तकम् , यम् = दैत्यम् , हिरण्यपूर्वं कशिपुम् = हिरण्यशब्दपूर्वकं कशिपुम् , हिरण्यकशिपुम् , प्रचक्षते = कथयन्ति।

**श्लोकार्थः** – शत्रुजन्यायाः भीतेः अथवा शत्रुसमुद्भूतायाः भीतेः अविषयः इत्युक्ते निर्भयः दितेः पुत्रः अभवत्। इयं दितिः सूर्य इव तेजस्विनी आसीत् ।तस्याः पुत्रं जनाः परमैश्वर्यवान् नाम इन्द्रपदार्थनाशकः ‘हिरण्यकशिपुः’ इति सम्बोधयन्ति स्म।

**भावार्थः** – पुरा शत्रुभ्यः भयम् अप्राप्नुवन् सूर्यसमतेजस्वी दैत्यः अजायत। यस्य नाम

हिरण्यकशिपुः आसीत् । येन इन्द्रस्य राज्यमपहृत्य परमैश्वर्यलक्षणः 'इन्द्र' शब्दार्थः विनाशितः।

'शिशुपालः हन्तव्यः' इति वक्तुकामो नारदः तस्य पूर्वजन्मविषयं श्रीकृष्णस्य पुरतः उपस्थापयति। अयमेव शिशुपालः पूर्वमपि अनाचारविक्रमसम्पन्नः दैत्यादिपुरुषः हिरण्यकशिपुः अभवत् इति। सः दितेः पुत्रः आसीत् ।

**विशेषः** – शिशुपालवधाय तस्य पूर्वजन्मकथनं श्रीकृष्णस्य मनसि शिशुपालस्य विषये द्रोहं जनयेदित्येव अत्र नारदाभिप्रायः ।

समासः – प्रतिपक्षजन्मनाम् – प्रतिकूलपक्षात् जन्म यासां ते प्रतिपक्षजन्मानः तासाम् – बहुव्रीहिसमासः।

तपनद्युतिः – तपनस्य द्युतिरिव द्युतिः यस्य सः – बहुव्रीहिसमासः।

इन्द्रशब्दार्थनिषूदनम् – इन्द्रशब्दार्थस्य निषूदनम् – तत्पुरुषसमासः।

हिरण्यपूर्वम् – हिरण्यं पूर्वं यस्य सः। हिरण्यपूर्वः तम् – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. हिरण्यकशिपुः कस्याः पुत्रः?

२. इन्द्रशब्दार्थनिषूदनः कः?

### ८.२.२. हिरण्यकशिपुरूपेण सर्वप्रथमं भयस्य पूर्वावतारः

देवर्षिनारदः शिशुपालस्य पूर्वजन्मकथां कथयन् हिरण्यकशिपुरूपेण सर्वप्रथमं देवानां कृते भीतेः पूर्वावतारः आसीदिति पद्येस्मिन् सूचयति।

**समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयताम् ।**
**भयस्य पूर्वावतरस्तरस्विना मनस्सु येन द्युसदां न्यधीयत।। ४३।।**

**अन्वयः** – समत्सरेण असुर इति नाम्नः चिराय प्रथमाभिधेयताम् उपेयुषा तरस्विना येन द्युसदां मनःसु भयस्य पूर्वावतारः न्यधीयत।

**प्रतिपदार्थः** – समत्सरेण = सक्रोधेन, सद्वेषिणा, असुर इति नाम्नः = असुर इति अभिधानस्य, प्रथमाभिधेयताम् = अन्वर्थतया, मुख्याभिधेयताम् । गतेन =प्राप्तेन, तरस्विना = बलवता, येन = हिरण्यकशिपुना, द्युसदः = देवानाम् , मनःसु =चित्तेषु भयस्य = भीतेः, पूर्वावतरः = प्रथमप्रवेशः, प्रथमप्रादुर्भावः, न्यधीयत = निहितः।

**श्लोकार्थः** – अन्यस्य कस्यचित् शुभं द्रष्टुम् अशक्तेन समत्सरेण 'असुर' इत्यभिधानस्य सर्वप्रथमं सार्थकता कुर्वता बलवता हिरण्यकशिपुना देवानां मनःसु भयस्य प्रथमप्रादुर्भावः कृतः ।

**भावार्थः** – हिरण्यकशिपुः कस्यापि शुभम् अवलोकयितुं न शक्नोति स्म। यतः सः ईर्ष्यालुः आसीत् । स्वकीयबलेन तेन देवानां मनसि सर्वप्रथमं भयोत्पादनं कृतम् । अपि च असुर इति नाम्नः सार्थकता प्रदर्शिता। तस्मात् 'असुर' इति नामाभिधानप्राप्तः प्रप्रथमः सः एव।

**विशेषः** – सुराणां सर्वप्रथमम् उन्मूलनकर्ता हिरण्यकशिपुः आसीत् । तस्य कारणात् एव जगति 'असुर' इति नामकरणं दुष्कृत्यकर्तॄणाम् अभवत् ।

समासः – समत्सरेण – मत्सरेण सहितः यः समत्सरः तेन सह – बहुव्रीहिसमासः।

प्रथमाभिधेयम् – प्रथमं च तदभिधेयम् – कर्मधारयसमासः।

द्युसदाम् – दिवि सीदन्ति तेषाम् – उपपदतत्पुरुषसमासः।

पूर्वावतारः – पूर्वश्च असौ अवतरः – कर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. कः भयस्य पूर्वावतारः?

२. 'असुर' इति प्रथमाभिधानं केन प्राप्तम्?

### ८.२.३. हिरण्यकशिपोः दिक्पालविजयः

लोके लक्ष्मीः चञ्चला इति प्रवादः श्रूयते तस्य मूलकारणमत्र महाकविना प्रतिपादितम् ।

**दिशामधीशांश्चतुरो यतः सुरानपास्य तं रागहृताः सिषेविरे।**
**अवापुरारभ्य ततश्चला इति प्रवादमुच्चैरयशस्करं श्रियः।।४४।।**

**अन्वयः** –श्रियः यतः दिशाम् अधीशान् चतुरः सुरान् अपास्य तं रागहृताः सिषेविरे ततः आरभ्य अयशस्करं चला इति उच्चैः प्रवादम् अवापुः।

**प्रतिपदार्थः** – श्रियः = सम्पदः, यतः= यदा, यस्मात् =कालात् , दिशामधीशान्= दिक्पालान् , चतुरः= चतुःसंख्याकान् , सुरान् = देवान् , अपास्य =त्यक्त्वा, तम् = हिरण्यकशिपुम् , रागहृता =रागाकृष्टाः, सिषेविरे सेवाम् =आरब्धवती, असेवत अयशस्करम् =अकीर्तिकरम् , दुष्कीर्तिहेतुम् , प्रवादम् =लोकनिन्दाम् , अवापुः= प्राप्तवती, उच्चैः= महान्तम् , प्रचुरम् , ततः आरभ्य = ततः प्रभृति। चला = चञ्चला।

**श्लोकार्थः** – यदा आरभ्य लक्ष्मीः चतुरः दिक्पालान् (इन्द्रः, यमः,वरुणः,कुबेरः) परित्यज्य अनुरागवशात् तं हिरण्यकशिपुम् असेवत तदारभ्य सा 'चला 'अथवा 'चञ्चला' इति अकीर्तिकरं महाप्रवादं प्राप्तवती।

**भावार्थः** – लोके 'लक्ष्मीः अस्थिरा' इति प्रसिद्धम् । तस्याः एवं दुष्कीर्तेः कारणमपि हिरण्यकशिपुरेव। यतो हि तस्य शौर्यगुणेन आकृष्टा सा तं सेवते स्म। पूर्वं लक्ष्मीः इन्द्रादिदेवानां समीपे निवसति स्म। हिरण्यकशिपोः वीरत्वम् अवलोक्य सा तस्मिन् अनुरक्ता। तं सेवितुञ्चारभत। यतो हि 'साहसे श्रीः प्रतिवसति' इति ख्यातमेव। दुर्जनसहवासात् सा अपि 'चञ्चला' इति अपकीर्तिं प्राप्तवती। देवानाम् अपेक्षया हिरण्यकशिपुः अत्यधिकः बलवानिति भावार्थः।

**विशेषः** – 'राजलक्ष्मीः चञ्चला' इति लोकापवादस्य कारणं यत् सा दिक्पालान् परित्यज्य हिरण्यकशिपोः समीपं गता। अतः अत्र काव्यलिङ्गमलङ्कारोऽस्ति। दिक्पालविजयं सूचयित्वा हिरण्यकशिपोः शौर्यप्रदर्शनमत्र विहितम् ।

**समासः** – रागहृताः– रागेण हृताः – तत्पुरुषसमासः।

अयशस्करम् – अयशः करोति इति अयशस्करः तम् – उपपदतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. श्रीः कं सिषेविरे?

२. सुरान् अपास्य का निर्गता?

## ८.२.४. देवानां हिरण्यकशिपोः भयम्

हिरण्यकशिपोः भयात् देवानाम् आत्मरक्षायै प्रचलितः प्रयासः अस्मिन् श्लोके देवर्षिनारदेन प्रोक्तः।

**पुराणि दुर्गाणि निशातमायुधं बलानि शूराणि घनाश्च कञ्चुकाः।**
**स्वरूपशोभैकफलानि नाकिनां गणैर्यमाशङ्क्य तदादि चक्रिरे।। ४५।।**

**अन्वयः** – नाकिनां गणैः यम् आशङ्क्य तदादि स्वरूपशोभैकफलानि पुराणि दुर्गाणि चक्रिरे, आयुधं निशातं (चक्रे) , बलानि शूराणि चक्रिरे, कञ्चुकाः घनाः (चक्रिरे)

**प्रतिपदार्थः** – नाकिनाम् = स्वर्गिणाम्, देवानाम् , गणैः = समूहैः, यं = हिरण्यकशिपुम्, आशङ्क्य = बाधकत्वेन उत्प्रेक्ष्य, तदादि = तदा प्रभृति, स्वरूपशोभैकफलानि = स्वरूपशोभैकप्रयोजनानि, पुराणि = नगराणि, दुर्गाणि = प्राकाराः, चक्रिरे =कृतानि आयुधम् = शस्त्रम् , निशातम् = तीक्ष्णम् , चक्रे = कृतम् , अकरोत् , बलानि = सैन्यानि, कञ्चुकाः = वारणाः, कवचानि, घनाः = सुदृढाः दुर्भेदाः।

**श्लोकार्थः** – हिरण्यकशिपोः भयमाशङ्क्य देवगणैः स्वरूपशोभैकप्रयोजनानि नगराणि दुर्गाणि कृतानि। आयुधानि तीक्ष्णानि अकुर्वन् ते। सैन्यानि बलयुक्तानि विहितानि तैः। तथा च लोहकवचानि अभेद्यतां नीतानि।

**भावार्थः** – पूर्वं देवानां कस्मादपि भयं नासीत् । अतः तेषां नगराणि, आयुधानि, सैन्यानि कवचानि च केवलम् ऐश्वर्यद्योतकानि आसन् । परन्तु हिरण्यकशिपोः जन्मनः आरभ्य देवाः भयभीताः। अपि च नगरायुधसैन्यकवचादीनाम् उपादेयतां ते अचिन्तयन्। तेन हि तैस्सर्वं परिवर्तितम् । चित्रवत्स्वरूपशोभापूर्णानि शस्त्राणि, नगराणि, सैन्यानि कवचानि चाधुना कार्यक्षमानि विहितानीत्यर्थः।

**विशेषः** – हिरण्यकशिपोः भयात् देवाः आत्मरक्षायै अयतन्त। ये देवाः पूर्वं निर्भयाः सन्तः चिन्तारहिताः ते एव सम्प्रति भयाकुलाः चिन्तातुराश्च सञ्जाताः इति नारदमुनिः सूचयितुमिच्छति।

समासः – स्वरूपशोभैकफलानि – स्वरूपशोभा एव एकं फलं येषां तानि – बहुव्रीहिसमासः।

नाकिनाम् – नाकः अस्ति येषां ते नाकिनः तेषाम् – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. कानि स्वरूपशोभैकफलानि?

२. नाकिनां कस्मात् भयमासीत् ?

## ८.२.५.भयभीतदेवानां सन्ध्यावन्दनादि क्रियापरित्यागः

हिरण्यकशिपोः भयात् सुराः सन्ध्यावन्दनादिक्रियाः अपि अत्यजन् । एवं भीतभीताः ते कथं व्यवहरन्ति स्म इति नारदमुनिना प्रस्तुते पद्ये वर्णितमस्ति।

**स सञ्चरिष्णुर्भुवनान्तरेषु यां यदृच्छयाऽशिश्रियदाश्रयः श्रियः।**
**अकारि तस्यै मुकुटोपलस्खलत्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः।। ४६।।**

**अन्वयः** – भुवनान्तरेषु सञ्चरिष्णुः श्रियः आश्रयः सः यदृच्छया यां दिशम् अशिश्रियत् मुकुटोपलस्खलत्करैः त्रिदशैः त्रिसन्ध्यं तस्यै दिशे नमः अकारि।

**प्रतिपदार्थः** – भुवनान्तरेषु = लोकान्तरेषु, त्रिभुवनमध्येषु, सञ्चरिष्णुः= सञ्चरणशीलः, श्रियः = लक्ष्म्याः, आश्रयः = आधारः, निवासस्थानम् , सः= हिरण्यकशिपुः, यदृच्छया = स्वेच्छया, यां दिशम् = यां पूर्वादिककुभम् , अशिश्रियत् = असेवत् , अगमत् , मुकुटोपलस्खलत्करैः = मौलिमणिसञ्चरहस्तैः, किरीटरत्नव्याप्रियमाणपाणिभिः शिरसि बद्धाञ्जलिभिः, त्रिदशैः = देवैः, त्रिसन्ध्यं =त्रिष्वपि सन्ध्यासु, तस्यै = हिरण्यकशिप्वाश्रितायै, दिशे = दिशायै, नमः =नमस्कारः, अकारि = कृतम् ।

**श्लोकार्थः** – लोकान्तरेषु सञ्चरणशीलः, लक्ष्म्याः आश्रयस्थानं सः हिरण्यकशिपुः यदृच्छया यां दिशं गच्छति स्म तां दिशं मौलिरत्नेषु भीत्या स्खलन्तैः हस्तैः देवाः सन्ध्यात्रये अपि नमस्कारं कुर्वन्ति स्म।

**भावार्थः** – श्रीसम्पन्नः हिरण्यकशिपुः स्वेच्छया यां दिशं गच्छति स्म, तां दिशं देवाः नतमस्तकाः सन्तः सान्ध्यवेलासु त्रिवारं प्रणमन्ति स्म। तात्पर्यं सन्ध्यावन्दनेऽपि दिङ्नियमं परित्यज्य तदागमनभयात् तस्यै दिशे नमस्कुर्वन्तीति। दैत्यस्य हिरण्यकशिपोः महतः भयात् देवाः निरन्तरं भीतिग्रस्ताः अतिष्ठन् । तस्मात् स्वकीयकर्तव्यात् च्युताः भूत्वा धार्मिककार्याणि अपि परित्यक्तवन्तः इति भावः।

**विशेषः** – देवानां मनसि तादृशं भयं समुत्पन्नं यत् ते सततं हिरण्यकशिपुमेव स्मरन्ति स्म नान्यमिति। सुराणां तिस्रः दशाः – बाल्यकौमारयौवनानि जन्मसत्तावृद्धयः वेति। तस्मात् तिस्रः दशाः येषां ते त्रिदशः इति।

समासः – भुवनान्तरेषु – अन्यानि भुवनानि तेषु –सुप्सुप् समासः।

मुकुटोपलस्खलत्करैः – मुकुटस्य उपलेषु स्खलन्तः कराः येषां तैः– बहुव्रीहिसमास।

त्रिदशैः – तिस्रः दशाः येषां ते त्रिदशाः तैः – बहुव्रीहिसमासः।

त्रिसन्ध्यम् – तिसृणां सन्ध्यानां समाहारः इति – द्विगुसमासः।

**स्वावलोकनप्रश्नाः**

१. कः भुवनान्तरेषु सञ्चरिष्णुः?

२. त्रिदशाः कं प्रणमन्ति?

## ८.२.६. भगवतः नृसिंहावतारवर्णनम्

लोकप्रपीडकस्य हिरण्यकशिपोः वधः कथम् अजायत? इति नारदमुनिः प्रस्तुतश्लोके विवेचयति।

**सटाच्छटाभिन्नघनेन बिभ्रता नृसिंह। सैंहीमतनुं तनुं त्वया।**
**स मुग्धकान्तास्तनसङ्गभङ्गुरैरुरोविदारं प्रतिचस्करे नखैः।। ४७।।**

**अन्वयः** – नृसिंह! अतनुं सैंही तनुं बिभता सटाच्छटाभिन्नघनेन त्वया सः मुग्धकान्तास्तनसङ्गभङ्गुरैः नखैः उरोविदारं प्रतिचस्करे।

**प्रतिपदार्थः** – नृसिंह= हे नरश्रेष्ठ! अतनुम् = विस्तीर्णाम् , सैंहीम् = सिंहसम्बन्धिनीम्, सिंहाकाराम् , तनुम् = शरीरम् , बिभ्रता = दधता, धारणं कुर्वता, सटाच्छटाभिन्नघनेन =केसरसमूहविदारितमेघेन, त्वया = भवता, सः =हिरण्यकशिपुः, मुग्धकान्तास्तनसङ्गभङ्गुरैः = सुन्दरभामिनीकुचसंसर्गभज्यमानैः, नखैः = नखरैः, उरोविदारम् = उरो विदार्य, प्रतिचस्करे = हतः, मारितः, भङ्गुरनखैः = कुटिलनखैः।

**श्लोकार्थः** – हे नृसिंह! विशालं सिंहशरीरम् उद्वहता, तथा च स्वकीयकेशरसमूहैः मेघान् विच्छिन्नकुर्वता भवता अभिनवप्रेयसीस्तनयुगलसम्पर्केण कुटिलैः नखैः हिरण्यकशिपोः वक्षःस्थलस्य विदारणं विधाय संहारः कृतः।

**भावार्थः** – पूर्वस्मिन् अवतारे श्रीकृष्णेन विशालं सिंहशरीरं धृतम् । यस्य केशरसमूहाः मेघानपि छिन्नविच्छिन्नं कुर्वन्ति स्म। एवं नृसिंहावतरं धृत्वा तेन वज्रकायोऽपि हिरण्यकशिपुः स्वकीयैः कुटिलैः नखैः उरोविदारणपूर्वकं मारितः।

अत्र मनोज्ञायाः कान्तायाः कुचसम्पर्केण कुटिलाः नखाः इत्युक्ते अत्यन्तकोमलनखाः इति। वज्रकठिनोऽपि हिरण्यकशिपुः कोमलैः नखैः विदारितः इति श्रकृष्णस्य वाङ्मनसयोः अगोचरमहिमा इति भावः।

**विशेषः** – हिरण्यकशिपोः वधार्थं भगवता नृसिंहावतारः स्वीकृतः। अस्य नृसिंहावतारस्य वर्णनं श्रीमद्भागवते उपलभ्यते। तदनुसारं हिरण्यकशिपुना घोरेण तपसा शङ्करात् वरदानं सम्प्राप्तम् । तेन वरदानेन नर-देव-राक्षस-नागादयः तस्य वधं कर्तुमसमर्थाः अभवन् । पृथिव्यां वा आकाशे वा, दिने वा रात्रौ वा, मासे अथवा पक्षे वा तस्य मृत्युः भवितुं न शक्नोति स्म। युद्धार्थं कोऽपि विरोधकः नावशिष्टः तस्य। सर्वेषां महाराजः भूत्वा अक्षयम् ऐश्वर्यं तेन प्राप्तम् । एवं तस्मात् वरदानात् सः

अतुलनीयबलसम्पन्नः , अवध्यः निर्भयश्च सञ्जातः। अपि च मन्दोन्मत्तः सः अखिलविश्वं पीडयितुम् आरभत। अतः त्रस्तं जगत् तापरहितं कर्तुं भगवता विष्णुना नृसिंहरूपं धृत्वा स्वाङ्के तम् उपावेश्य सन्ध्यासमये तस्य वक्षःस्थलं नखैः विदार्य सः हतः।

समासः – नृसिंहः – ना सिंह इव – उपमितसमासः। अथवा

ना चासौ सिंहश्च – कर्मधारयसमासः।

अतनुः – न तनुः – नञ् तत्पुरुषसमासः

सटाच्छटाभिन्नघनेन – सटानां छटाः सटाच्छटाः – षष्ठीतत्पुरुषसमासः।

सटाच्छटाभिः भिन्नाः घनाः येन सः – बहुव्रीहिसमासः।

मुग्धकान्तास्तनसङ्गभङ्गुरैः – मुग्धकान्तास्तनयोः सङ्गेन भङ्गुराः तैः – तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. सैंहीं तनुं कः धृतवान् ?

२. नृसिंहेन कस्य वधः कृतः?

३. नृसिंहः कैः वक्षःस्थलविदारणम् अकरोत्?

### ८.३.उपसंहारः

अस्मिन् अष्टमखण्डे शिशुपालस्यपूर्वजन्मवृत्तान्तःअधिगतः। इतः शिशुपालस्य क्रौर्यज्ञापनमिति नारदस्य उद्दिष्टमासीदिति अवगतम्। स्वकीयहेतुपूर्ततायै विषयोपस्थापनमपि महत्त्वं भजते इति ज्ञानं प्राप्य नारदस्यसम्भाषणचातुर्यम् अस्माभिः ज्ञातम्। हिरण्यकशिपोः दुष्टव्यवहारः तस्य वधाय कारणमभूत् अतः सः व्यवहारः परित्यक्तव्यः। तथैव दुष्टसंहारस्तुजगत्यस्मिन् सदा निश्चितःएव' इति प्रत्यभिज्ञा

अस्मात् खण्डात् भवति। न केवलं महाकविमाघस्य प्रभावपूर्णा रचनाशैली अपि तु विषयप्रतिपादनरीतिज्ञानमपि इतः अनुभूयते।

**८.४. प्रश्नाः**

१. नृसिंहावतारप्रयोजनं स्वकीयैः शब्दैः विवेचयत।

२.हिरण्यकशिपोः औद्धत्यं वर्णयत।

## नवमः खण्डः
## *शिशुपालस्य पूर्वजन्म-औद्धत्यम्*

**संरचना**

९.०. प्रस्तावना
९.१. लक्षिताधिगमांशाः
९.२. शिशुपालस्य पूर्वजन्म–औद्धत्यम्
९.२.१. हिरण्यकशिपोः रावणरूपेण पुनर्जन्म
९.३. रावणवर्णनम्
९.३.१. रावणाय महादेवकृपाप्रसादः
९.३.२. रावणस्य कैलासोत्क्षेपणम्
९.३.३. रावणस्य स्वर्गलुण्ठनम्
९.३.४. रावणभयात् इन्द्रपलायनम्
९.३.५. इन्द्रस्य सुमेरुपर्वतशरणम्
९.३.६.रावणस्य कठोरकण्ठच्छेदने सुदर्शनचक्रस्य विफलता
९.४. उपसंहारः
९.५. प्रश्नाः

### ९.०. प्रस्तावना

'शिशुपालस्य पूर्वजन्म–औद्धत्यम्' इति कथाभागः महाकविमाघस्य शिशुपालवधमहाकाव्यस्य प्रथमसर्गे वर्णितोऽस्ति। शिशुपालः पूर्वजन्मनि हिरण्यकशिपुरासीत्। तदनन्तरं सः रावणरूपेण अस्यां भूमौ पुर्नजन्म आप्नोत्। सः रावणजन्मनि कथं जगत्पीडकः सञ्जात इत्यस्मिन् कथाभागे अवलोक्यते। सः महाउेवकृपाप्रसादात् स्वर्गलुण्ठनम् कैलासोत्क्षेपणञ्चाकरोत्। रावणभयात् पलायितः इन्द्रः सुमेरुपर्वतं शरणङ्गतः। सुदर्शनचक्रमपि रावणहनने अनुपयुक्तमभवत्। इत्थं 'रावणोपद्रवः' इति विषयः खण्डेऽस्मिन् सम्प्रति वर्ण्यते।

*शिशुपालवधम्*

## ९.१. लक्षिताधिगमांशाः

* शिशुपालस्य पूर्वजन्मनः औद्धत्यं छात्रं ज्ञातुं प्रभवति ।
* रावणजन्मनि सः कथं लोकप्रपीडक आसीदिति अवगच्छति ।
* रावणोपद्रवम् अवगन्तुं शक्नोति ।
* रावणस्य अतुलनीयं बलं जानाति ।
* रावणभयात् इन्द्रस्य कातरत्वमभिजानाति ।
* खलशक्तिनिदर्शकः रावण इत्यवगन्तुं समर्थः भवति ।
* ईश्वरवरप्रसादादेव दुर्जना अपि अपरिमितं बलमाप्तुं प्रयतन्ते इति छात्रेण ज्ञायते ।

## ९.२. शिशुपालस्य पूर्वजन्म-औद्धत्यम्

शिशुपालवधस्य आवश्यकतां प्रतिपादयितुं देवर्षिनादेन तस्य पूर्वजन्मनः दुष्कृत्यानि स्मारयितुम् औद्धत्यवर्णनमत्र प्रस्तूयते ।

### ९.२.१.हिरण्यकशिपोः रावणरूपेण पुनर्जन्म

हिरण्यकशिपुः पुनर्जन्म प्राप्य पुनः विश्वविनाशाय उद्युक्तः इति महाकविना पद्येऽस्मिन् विविच्यते।

**विनोदमिच्छन्नथ दर्पजन्मनो रणेन कण्डूवास्त्रिदशैः समं पुनः।**
**स रावणो नाम निकामभीषणं बभूव रक्षः क्षतरक्षणं दिवः।। ४८।।**

**अन्वयः** - अथ सः पुनः त्रिदशैः समं रणेन दर्पजन्मनः कण्ड्वाः विनोदमिच्छन् दिवः क्षतरक्षणं निकामभीषणं रावणो नाम रक्षः बभूव।

**प्रतिपदार्थः** - अथ = तदनन्तरम् ,सः=हिरण्यकशिपुः, पुनः = भूयोऽपि, त्रिदशैः = देवैः, समम् = सार्धम् , रणेन = युद्धेन, दर्पजन्मनः = अहङ्कारप्रभवायाः, कण्ड्वाः = भुजकण्डूतेः, विनोदम् = विनाशम् , इच्छन् = अभिलषन् , दिवः = स्वर्गस्य, क्षतरक्षणम् = विनाशितरक्षणम् , निकामभीषणम् = अत्यन्तभयानकम् , नितरां भयाङ्करम्, रक्षः = राक्षसः, बभूव = जातः, अभवत् , रावणो नाम = रावण इति नामधेयम् ।

**श्लोकार्थः** – तदनन्तरं स एव हिरण्यकशिपुः देवैः सह युद्धं कत्वा अहङ्कारजन्यकण्डूतिं दूरीकर्तुम् इच्छुकः सन् स्वर्गरक्षाव्यवस्थाविनाशकः अत्यन्तभयङ्करः रावणः नाम राक्षसः अभवत् ।

**भावार्थः** – भगवता नृसिंहरूपं धृत्वा हिरण्यकशिपुः मारितः अतः तस्मिन् जन्मनि देवैः सह योद्धुं सः न शक्तवान् । स्वकीयाम् अपूर्णाम् इच्छां सम्पूरयितुं सः 'रावण' नाम्ना पुनर्जन्म प्राप्तवान् । अपि च स्व-अहङ्कारजन्यकण्डूतिम् अपनेतुं स्वर्गस्य रक्षाव्यवस्थाविनाशकः महाभयङ्करः राक्षसः सञ्जातः। देवानां सर्वस्वापहारकः रावणः हिरण्यकशिपोः एव पुनर्जन्म इति भावः।

**विशेषः** – रावणजन्मनः वर्णनमस्मिन् श्लोके अस्ति। विश्रवसः अपत्यं रावणः इति। अयमेव पूर्वजन्मनि हिरण्यकशिपुः आसीदिति विष्णुपुराणस्य वाक्येन अपि ज्ञायते। तद्वाक्यम् एवम् 'यश्च हिरण्यकशिपुः सकललोकगुरुणा घातितः पुनरपि अक्षतवीर्यसम्पत्पराक्रमगुणः समाक्रान्तसकलत्रैलोक्येश्वरप्रतापो दशाननोऽभवत्' इति। पर्यायोक्तालङ्कारः पद्येऽस्मिन् विद्यते।

समासः – निकामभीषणम् – निकामं भीषणम् – सुप् सुप् समासः।

दर्पजन्मनः – दर्पात् जन्म यस्याः सा दर्पजन्मा तस्याः – बहुव्रीहिसमासः।

क्षतरक्षणम् – क्षतं रक्षणम् – कर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. रावणः पूर्वजन्मनि केन रूपेण धरणीतले आसीत् ?

२. दिवः क्षतरक्षणं केन कृतम्?

## ९.३. रावणवर्णनम्

शिशुपालोऽयं पूर्वजन्मनि हिरण्यकशिपुनाम्ना तदनन्तरञ्च रावणरूपेण अस्मिन् पृथिवीतले उपद्रवमजनयदिति ज्ञापयितुमेव नारदः श्रीकृष्णस्य पुरतः रावणवर्णनं

कृतवान्। रावणस्य अनिष्टकृत्यानि कथं लोकपीडाप्रदायकानि आसन् इत्येवात्र निरूप्यते

### ९.३.१ रावणाय महादेवकृपाप्रसादः

रावणः महादेवकृपाप्रसादं कथं प्राप्तवानिति देवर्षिनारदः बोधयतीति प्रस्तुते श्लोके महाकविना समुपवर्णितम्। अस्मात् श्लोकात् आरभ्य ६६ श्लोकपर्यन्तं रावणस्य औद्धत्यं कथितमस्ति।

**प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरोऽतिरागाद् दशमं चिकर्तिषुः।**
**अतर्कयत् विघ्नमिवेष्टसाहसः प्रसादमिच्छासदृशं पिनाकिनः ।।४९।।**

**अन्वयः** – यः भुवनत्रयस्य प्रभुः बुभूषुः अतिरागात् दशमं शिरः चिकर्तिषुः इष्टसाहसः इच्छासदृशं पिनाकिनः प्रसादं विघ्नम् इव अतर्कयत्।

**प्रतिपदार्थः** – यः = रावणः, भुवनत्रयस्य = लोकत्रयस्य, प्रभुः = ईश्वरः, स्वामी, बुभूषुः = भवितुमिच्छुः, अतिरागात् = प्रेमाधिक्यात् , दशमं शिरः = दशमं मूर्धानम्, चिकर्तिषुः = कर्तितुमिच्छुः, इष्टसाहसः = प्रियसाहसः, इच्छासदृशं =स्ववाञ्छानुकूलम्, पिनाकिनः = शिवस्य, प्रसादम् = वरम् , विघ्नमिव = बाधाम् इव, अतर्कयत् = व्यचारयत् , अचिन्तयत् ।

**श्लोकार्थः** – लोकत्रयस्य स्वामी भवितुमिच्छुकः शिवस्य अतिभक्तिकारणात् दशमं शिरः छेत्तुमिच्छुकः साहसप्रियश्च रावणः मनोरथानुरूपं शिवस्य प्रसादं विघ्नरूपेण अतर्कयत् ।

**भावार्थः** – रावणः भुवनत्रयस्य प्रभुः भवितुमिच्छति स्म। तदर्थं तेन शिवः आराधितः। तत्र तेन स्वीयानि नव शिरःकमलानि शिवाय समर्पितानि। यदा सः दशमं शिरः छेत्तुं प्रवृत्तः तदा प्रसन्नेन शिवेन तस्मै अभीष्टः त्रैलोक्याधिपत्यरूपः वरः प्रदत्तः। सः एव वरः तेन स्वीयसाहसप्रतिबन्धकः चिन्तितः इति भावार्थः।

**विशेषः** – रावणस्य तपःशौर्यवर्णनम् अस्मिन् श्लोके कृतमस्ति। रावणः शिवभक्तः आसीत् । सः शिवात् अभीष्टवरप्राप्त्यर्थं महत्साहसम् अकरोत् । एकदा सः

पशुपतिप्रीणनाय स्वशिरांसि कर्तयित्वा यज्ञे संस्थाप्य (हुत्वा) शिवपूजनमारब्धवान् । तस्मिन् काम्ये कर्मणि नव शिरांसि एवमेव तेन अग्नौ समर्पितानि। एकस्मिन् अवशिष्टे प्रसन्नः शङ्करः तस्मै 'त्रैलोक्याधिपः भव' इति ईप्सितवरप्रदानम् अकरोतीति शिवपुराणे कथा वर्तते। उत्प्रेक्षा अलङ्कारोऽस्ति अत्र। अस्मात् श्लोकादारभ्य श्लोकषट्केऽपि यच्छब्दस्य 'सः रावणो नाम राक्षसः बभूव 'इत्यनेन वाक्येन अन्वयः करणीयः।

समासः – पिनाकिनः – पिनाकः अस्य अस्ति इति पिनाकी तस्य – बहुव्रीहिसमासः।

इष्टसाहसः – इष्टं साहसं यस्य सः – बहुव्रीहिसमासः।

इच्छासदृशम्– इच्छया सदृशः इच्छासदृशः तम् – तृतीयातत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. भुवनत्रयस्य प्रभुः कः भवितुमिच्छुकः?

२. रावणः कीदृशं विघ्नम् अचिन्तयत् ?

## ९.३.२. रावणस्य कैलासोत्क्षेपणम्

शिवभक्तः रावणः कैलासपर्वतस्य उत्तोलनेन किं कृतवान् इति देवर्षिनारदः प्रस्तुतश्लोकेन श्रीकृष्णं निवेदयति।

**समुत्क्षिपन् यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः।**
**त्रसत्तुषाराद्रिसुताससम्भ्रमस्वयंग्रहाश्लेषसुखेन निष्क्रयम् ।। ५०।।**

**अन्वयः** – यः पृथिवीभृतां वरं समुत्क्षिपन् शूलिनः वरप्रदानस्य त्रसत्तुषाराद्रिसुताससम्भ्रमस्वयंग्रहश्लेषसुखेन निष्क्रयं चकार।

**प्रतिपदार्थः** – यः = रावणः, पृथिवीभृताम् = पर्वतानाम् , भूधराणाम् , वरं = श्रेष्ठम्, कैलासपर्वतम् , समुत्क्षिपन् = उपरि प्रक्षिपन् , उत्तोलयन् , शूलिनः = शिवस्य, वरप्रदानस्य = इष्टवितरणस्य, वरदानस्य, चकार = कृतवान् , निष्क्रयम् = विनिमयम्, निष्कृतिम् , त्रसत्तुषाराद्रिसुताससम्भ्रमस्वयंग्रहाश्लेषसुखेन = बिभ्यत्याःपार्वत्याः

ससम्भ्रमेण स्वयं कृतालिङ्गनेन जातेन सुखेन वा आनन्दानुभवेन, तुषाराद्रिसुता = पार्वती, आश्लेषः = आलिङ्गनम् ।

**श्लोकार्थः** – रावणेन श्रेष्ठं कैलासपर्वतम् उत्तोलयन् बिभ्यत्याः पार्वत्याः ससम्भ्रमेण सत्वरं स्वयमेव कृतेन आलिङ्गनेन जातेन सुखानुभवेन शिवात् यद् वरदानं प्राप्तमासीत् तस्य प्रत्यर्पणं कृतम् ।

**भावार्थः** – एकदा रावणेन शिवस्य निवासस्थानं पर्वतश्रेष्ठः कैलासपर्वतः समुत्तोलितः। तस्मात् तस्य कम्पनेन तत्रोपस्थिता पार्वती भयभीता। अपि च भीत्या तया ससम्भ्रमेण सत्वरं शिवः आलिङ्गितः। एवं प्रियप्रार्थनां विना पार्वत्याः स्वयंकृतेन आलिङ्गनेन शिवः महत्सुखम् अन्वभवत् । अतः पार्वत्याः आलिङ्गनसौख्यं प्रदाय रावणेन शिवप्रसादयुक्तवरस्य प्रत्यर्पणं कृतम् । एवमत्र पर्वतोन्नयनेन रावणः प्रत्युपकारं कृतवान् इति भावार्थः।

**विशेषः** – भगवते शिवाय पार्वत्याः आलिङ्गनसुखं प्रदाय वरप्रदानमूल्यं रावणः दत्तवान् इति महाकवेः अभिप्रायः। अत्र वरप्रदानमूल्यदानात् परिवृत्तिः अलङ्कारोऽस्ति।

समासः – पृथिवीभृताम् – पृथिवीं बिभ्रतीति पृथीवीभृतः तेषाम्

– उपपदतत्पुरुषसमासः।

शूलिनः – शूलम् अस्य अस्तीति शूली तस्य शूलिनः – बहुव्रीहिसमासः।

वरप्रदानम् – वरस्य प्रदानम् – षष्ठीतत्पुरुषसमासः।

त्रसत्तुषाराद्रिसुताससम्भ्रमस्वयंग्रहाश्लेषसुखेन – त्रसन्त्याः तुषाराद्रिसुतायाः ससम्भ्रमेण स्वयंग्रहणेन आश्लेषसुखं तेन – तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. कैलासपर्वतः केन उत्तोलितः?

२. पार्वती भीत्या किं कृतवती?

३. रावणः कस्य निष्क्रयम् अकरोत् ?

## ९.३.३. रावणस्य स्वर्गलुण्ठनम्

रावणः स्वदुष्क्रियाभिः स्वर्गस्य अस्वास्थ्यं कथम् अजनयत् इति प्रस्तुतश्लोके नारदमुखेन महाकविः ज्ञापयति।

**पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः।**
**विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः।।५१।।**

**अन्वयः** - बली यः नमुचिद्विषा विगृह्य पुरीम् अवस्कन्द नन्दनं लुनीहि, रत्नानि मुषाण, अमराङ्गनाः हर, इत्थम् अहर्दिवं दिवः अस्वास्थ्यं चक्रे।

**प्रतिपदार्थः** -बली = बलवान् , यः = रावणः, नमुचिद्विषा = इन्द्रेण सह, विगृह्य =वैरं विधाय, निरुध्य, पुरीम् = अमरावतीम् , अवस्कन्द = परिवेष्टितवान् , अवरुरोध, नन्दनम् = इन्द्रोद्यानम् , लुनीहि = छिन्नं कृतम् , रत्नानि= श्रेष्ठवस्तूनि, मणीन् वा, अमराङ्गनाः = देवाङ्गनाः, अप्सरसः, हर = अपहृतवान् , इत्थम् = अनेन प्रकारेण , अहर्दिवम् = प्रतिदिनम् , दिवः = स्वर्गे, अस्वास्थ्यम् = अशान्तिः, उपद्रवम् चक्रे = कृतवान्, मुषाण = अचोरयत् ।

**श्लोकार्थः** - सः बलवान् रावणः इन्द्रेण सह विरोधं कृत्वा वारं वारम् इन्द्रपुरीम् अमरावतीं परिवेष्टयति स्म। नन्दनवनं भूयः भूयः छिन्नविच्छिन्नं करोति स्म। रत्नानां लुण्ठनं कृत्वा देवाङ्गनानाम् अपहरणं विदधाति स्म। एवं प्रतिदिनं स्वर्गे सः अस्वास्थ्यम् अजनयत् ।

**भावार्थः** - स्वकीयैः उपद्रवैः रावणः स्वर्गशान्तिम् अनाशयत् । अनुदिनं स्वर्गलुण्ठनं विधाय सः देवान् त्रस्तम् अकरोदिति भावः।

**विशेषः** - रावणकृतोपद्रववर्णनम् अत्र विधीयते। अत्र 'नमुचिद्विट्' इति इन्द्रस्य सम्बोधनम् । इन्द्रः नमुचिराक्षसस्य वधम् अकरोत् इत्यतः नमुचिराक्षसशत्रुः इत्यर्थः

तस्य। श्लोकेऽस्मिन् समुच्चयालङ्कारः वर्तते।

समासः – अस्वास्थ्यम् – न स्वास्थ्यमिति – नञ् तत्पुरुषसमासः।

अहर्दिवम् – अहनि च दिवा च – द्वन्द्वसमासः।

नमुचिद्विषा – नमुचिं द्वेष्टीति तेन – उपपदतत्पुरुषसमासः।

अमराङ्गनाः – अमराणाम् अङ्गनाः – षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. स्वर्गलुण्ठनं केन कृतम्?

२. रावणः कुत्र अशान्तिं निर्मितवान् ?

३. 'नमुचिद्विट्' इति कस्य सम्बोधनम् ?

### ९.३.४. रावणभयात् इन्द्रपलायनम्

रावणात् भयभीतः इन्द्रः युद्धात् कथं पलायितः इति नारदमुनिः पद्येऽस्मिन् सूचयति।

**सलीलयातानि न भर्तुरभ्रमोर्न चित्रमुच्चैःश्रवसः पदक्रमम् ।**
**अनुद्रुतः संयति येन केवलं बलस्य शत्रुः प्रशशंस शीघ्रताम् ।।५२।।**

**अन्वयः** – संयति येन अनुद्रुतः बलस्य शत्रुः अभ्रमोः भर्तुः सलीलयातानि न प्रशशंस, उच्चैःश्रवसः चित्रं पदक्रमं न,केवलं शीघ्रतां प्रशशंस।

**प्रतिपदार्थः** – संयति = युद्धे, येन = रावणेन, अनुद्रुतः= अनुधावितः, बलस्य = बलासुरस्य, शत्रुः= रिपुः, अभ्रमोः भर्तुः= ऐरावतस्य स्वामिनः, सलीलयातानि =लीलया गतानि, चित्रम् =नानाविधम् , न प्रशशंस =प्रशंसां न कृतवान् , पदक्रमम् =पदन्यासम् , पादविक्षेपम् , शीघ्रताम् = वेगशीलताम् , उच्चैःश्रवसः =उच्चैःश्रवा नाम्नः अश्वः तस्य, अभ्रमोः ऐरावतस्य।

**श्लोकार्थः** – रावणेन युद्धे अनुधावितः बलासुरशत्रुः इन्द्रः ऐरावतस्य लीलापूर्णगमनं

न प्राशंसत। तथैव उच्चैःश्रवसः नानाविधं पदन्यासं नैव अश्लाघत प्रत्युत तयोः द्वयोः शीघ्रगामित्वमेव प्रशंसति स्म।

**भावार्थः** – रावणात् भयभीतः इन्द्रः युद्धात् पलायितः। रावणः तम् अन्वधावत् । तस्मिन् समये इन्द्रस्य समीपे ऐरावतगजः उच्चैःश्रवाः अश्वश्च आस्ताम् । अनुधावन्तं रावणम् अवलोक्य इन्द्रः न तु ऐरावतस्य विलासपूर्णगमनं प्रशंसितवान् अथवा न उच्चैःश्रवसः चित्रं पदन्यासं श्लाघितवान् । अपि तु द्वयोः शीघ्रगामित्वमेव प्राशंसत। द्वयोः गमनवेगः वा आशुगमनं वा इन्द्रं रावणात् अरक्षदिति भावः।

**विशेषः** – रावणभयेन इन्द्रस्य अतिशयकातरत्वमेव अस्मात् श्लोकात् कविना प्रदर्श्य रावणबलातिशायित्वं प्रकटीकृतम् ।

समासः – पदक्रमम् – पदयोः क्रमः पदक्रमः तम् – षष्ठीतत्पुरुषसमासः।

उच्चैःश्रवसः – उच्चैः श्रवः यस्य सः उच्चैःश्रवाः तस्य – बहुव्रीहिसमासः।

सलीलयातानि – लीलया सहितानि यातानि – कर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. इन्द्रस्य अश्वस्य नाम किम् ?

२. रावणः कम् अन्वधावत्?

३. इन्द्रः गजाश्वयोः कीदृशं गमनं प्राशंसत?

## ९.३.५. इन्द्रस्य सुमेरुपर्वतशरणम्

रावणस्य भयात् पलायितः इन्द्रः आत्मरक्षणाय किम् अकरोदिति नारदमुखेन महाकविः श्रीकृष्णम् अश्रावयत् । तदर्थं प्रस्तुतश्लोकरचना।

**अशक्नुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम् ।**
**प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः।। ५३।।**

**अन्वयः** – अधीरलोचनः कौशिकः सहस्ररश्मेः इव यस्य दर्शनं सोढुम् अशक्नुवन् हेमाद्रिगुहागृहान्तरं प्रविश्य बिभ्यत् दिवसानि निनाय।

*शिशुपालवधम्*

**प्रतिपदार्थः** - अधीरलोचनः= चञ्चलनयनः, अस्थिरदृष्टिः, कौशिकः= महेन्द्रः, उलुकश्च। सहस्ररश्मेः =सूर्यस्य, इव =यथा, यस्य =रावणस्य, दर्शनम् =विलोकनम्, प्रेक्षणम् , सोढुम् = सहनं कर्तुम् , अशक्नुवन् = असमर्थः, अपारयन् , हेमाद्रिगुहागृहान्तरम् =मेरुपर्वतकन्दरानिकेतनमध्यम् , प्रविश्य =प्रवेशं कृत्वा, बिभ्यत् =भीतः सन् , दिवसानि = वासराणि, निनाय =यापितवान् ।

**श्लोकार्थः** - चञ्चलनयनः इन्द्रः सूर्यः इव रावणस्य दर्शनम् असहमानः मेरुपर्वतस्य गुहारूपं गृहान्तरं प्रविश्य भीत्या तत्रैव दिनानि अयापयत् ।

**भावार्थः** - यथा देवाभीतः अथवा उलुकः सूर्यदर्शनाय असमर्थः सन् गृहस्य अन्तः एव तिष्ठति। इत्युक्ते उलुकः सूर्यतेजः सोढुं न शक्नोति अतः आत्मानं गोपयति। तथा भयात् चञ्चलनयनः इन्द्रः रावणस्य तेजस्वितां सहनं कर्तुम् असमर्थः इत्यस्मात् मेरुपर्वतस्य गुहायाः आश्रयं स्वीकृत्य तत्रापि भीत्या दिनानि यापितवान् । रावणभयात् सः अमरावतीपुरं परित्यज्य सुमेरुपर्वतगुहायाम् आत्मानं गोपयित्वा निजरक्षणं कृतवान् इति भावः।

**विशेषः** - देवराजः इन्द्रः रावणात् एतावान् भयभीतः आसीत् यत् सः स्वगृहं गन्तुमपि बिभ्यति स्म। अतः हेमाद्रिगुहा एव आत्मसंरक्षणस्थानमिति विचिन्त्य तत्रैव सः न्यवसत्। एवम् इन्द्रस्य दुःस्थितिः अस्मात् श्लोकात् ज्ञायते। अत्र उलुकेन सह इन्द्रतुलना कृता। पद्येऽस्मिन् रूपकालङ्कारः अस्ति।

समासः - अधीरलोचनः - अधीरे लोचने यस्य सः - बहुव्रीहिसमासः।

हेमाद्रिगुहागृहान्तरम् - हेमाद्रेः गुहा एव गृहं तस्यान्तरम् - कर्मधारयसमासः।

सहस्ररश्मेः - सहस्रं रश्मयः यस्य सः सहस्ररश्मिः तस्य - बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. हेमाद्रिगुहागृहान्तरं कः प्रविष्टः?

२. कस्य दर्शनं सहस्ररश्मेरिव आसीत् ?

## ९.३.६. रावणस्य कठोरकण्ठच्छेदने सुदर्शनचक्रस्य विफलता

विष्णोः सुदर्शनचक्रमपि रावणस्य कण्ठच्छेदने लाभदायकं नासीदिति नारदमुनिः श्रीकृष्णं कथयितुं प्रस्तुतश्लोकस्य आधारं स्वीकरोति।

**बृहच्छिलानिष्ठुरकण्ठघट्टनाद्विकीर्णलोलाग्निकणं सुरद्विषः।**
**जगत्प्रभोरप्रसहिष्णु वैष्णवं न चक्रमस्याक्रमताधिकन्धरम् ।। ५४।।**

**अन्वयः** – बृहच्छिलानिष्ठुरकण्ठघट्टनात् विकीर्णलोलाग्निकणम् अप्रसहिष्णु वैष्णवं चक्रं जगत्प्रभोः सुरद्विषः अस्य अधिकन्धरं न अक्रमत।

**प्रतिपदार्थः** – वैष्णवम् = विष्णोः सम्बन्धिनं, चक्रम = सुदर्शनचक्रम् , रथाङ्गम् , जगत्प्रभोः = लोकस्वामिनः, सुरद्विषः = देवानां शत्रोः, रावणस्य, अधिकन्धरम् = अधिग्रीवम् ,न अक्रमत = न प्रावर्तत, विकीर्णलोलाग्निकणम्= विक्षिप्तचपलस्फुलिङ्गम्,बृहच्छिलानिष्ठुरकण्ठघट्नात्= विशालपाषाणकठोरकण्ठाभिधानात् ।

**श्लोकार्थः** – जगत्प्रभोः विष्णोः सुदर्शनचक्रमपि रावणस्य ग्रीवाच्छेदने न प्रावर्तत। यतो हि रावणस्य कण्ठः विशालपाषाणः इव कठोरः आसीत् । कण्ठे विक्षिप्ते सुदर्शनचक्रे तस्मात् चक्रात् केवलम् अग्नेः स्फुलिङ्गाः एव निर्गताः।

**भावार्थः** – राक्षसराजस्य रावणस्य ग्रीवा महाशीला इव बृहती आसीत् । एकदा भगवता विष्णुना स्वकीयसुदर्शनचक्रं तस्य कठोरे कण्ठे निक्षिप्तम् । कण्ठच्छेदनाय गतसुदर्शनचक्रात् कण्ठघट्टनेन अग्नेः स्फुलिङ्गाः एव बहिर्निर्गताः। अपि च तत् चक्रं विष्णोः समीपं प्रतिगतम् । एवं रावणस्य ग्रीवाच्छेदने सुदर्शनचक्रस्य सामर्थ्यमपि विफलीजातम् । तात्पर्यं रावणस्य कण्ठः वज्रतुल्यः कठिनः आसीदिति भावः।

**विशेषः** – रावणे सुदर्शनचक्रस्यापि प्रभावः निष्फलः इत्यनेन वाक्येन रावणस्य अतुलनीयं सामर्थ्यं शरीरस्य च पाषाणत्वं सिध्यति। उपमालङ्कारः अत्रास्ति।

**समासः –** अधिकन्धरम् – कन्धरायाम् इति – अव्ययीभावसमासः।

अप्रसहिष्णु – न प्रसहिष्णु इति – नञ् तत्पुरुषसमासः।

बृहच्छिलानिष्ठुरकण्ठघट्टनात् – बृहती शीला इव निष्ठुरकण्ठः

– कर्मधारयसमासः।

निष्ठुरकण्ठस्य घट्टनात् – षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. वैष्णवं चक्र कुत्र नाक्रमत?

२. रावणस्य ग्रीवा कीदृशी आसीत् ?

३. कस्य घट्टनेन सुदर्शनचक्रात् अग्निकणाः निर्गताः?

## ९.४. उपसंहारः

अस्मिन् नवमे खण्डे शिशुपालः गतजन्मनि रावणः आसीदिति उपवर्णितम्। धरणीतले जन्म अवाप्य रावणेन आदौ शिवात् वरदानं सम्प्राप्तम्। ततः निर्भयस्सन् विश्वे सन्तापम् अजनयत् सः। आत्मनः खलस्वभावप्रदर्शनं तेन दुष्कृतिभिः कृतमिति इतः महाकविः प्रख्यापयति। तथैव रावणस्य उपद्रवकर्माणि अस्माभिः अस्मात् खण्डात् ज्ञायन्ते।

## ९.५. प्रश्नाः

१. इन्द्रस्य सुमेरुपर्वतशरणं प्रतिपादयत्।

२. रावणस्य स्वर्गलुण्ठनं वर्णयत्।

३. 'रावणोपद्रवम्' स्वकीयशब्दैः विवेचयत।

ꣳ

**दशमः खण्डः**

# *रावणस्य लोकोपद्रवः*

## संरचना

१०.०. प्रस्तावना
१०.१. लक्षिताधिगमांशाः
१०.२. रावणस्य लोकोपद्रवः
१०.२.१. कुबेरस्य क्षोभजननम्
१०.२.२. रावणात् वरुणपरजयः
१०.२.३. दक्षिणदिक्पालस्य धर्मराजस्य पराभवः
१०.२.४. रावणात् सूर्यभयवर्णनम्
१०.२.५. चन्द्रकृता रावणाराधना
१०.२.६. रावणकृतं गणेशदन्तोत्पाटनम्
१०.३.उपसंहारः
१०.४.प्रश्नाः

## १०.०.प्रस्तावना

'रावणस्य लोकोपद्रवः' इति पाठ्यांशः महाकविमाघस्य शिशुपालवधमहाकाव्यस्य प्रथमसर्गे समाविष्टोऽस्ति। अत्र हि पञ्चपञ्चाशत्तमश्लोकादारभ्य षष्टितमश्लोकपर्यन्तं विषयोऽयं समुपवर्णितः। कुबेरस्य क्षोभजननम्, वरुणपराजयः,दक्षिणदिक्पालपराभवः, सूर्यभयवर्णनं, चन्द्रस्य रावणाराधना तथा च गणेशस्य दन्तोत्पाटनमित्यादयः बिन्दवः अत्र विवेचिताः। तेषामेव स्पष्टीकरणमधुना अस्माभिः क्रियते।

## १०.१. लक्षिताधिगमांशाः

* रावणः त्रिलोकपीडक इति छात्रः जानाति।
* रावणस्य विजयसिद्धिमवगच्छति।

* रावणभयात् सूर्यचन्द्रादि तं सेवते स्म इति ज्ञातुं पारयति ।

* स्वसामर्थ्यस्य दुरुपयोगः नैव कर्तव्यः इत्यवगन्तुं प्रभवति ।

* बलमाहात्म्यम् अधिगच्छति ।

### १०.२. रावणस्य लोकोपद्रवः

मदोन्मत्तः रावणः स्वसामर्थ्यकारणात् लोके आतङ्कमुत्पाद्य सर्वान् अपीडयत् । तस्य लोकोपद्रवः कथमासीदिति अत्र सविस्तरं वर्ण्यते ।

### १०.२.१. कुबेरस्य क्षोभजननम्

रावणः कुबेरस्य उत्पीडनं विधाय तस्मिन् कथं क्षोभजननं कृतवान्? इति देवर्षिनारदः प्रस्तुतश्लोकेन अबोधयदिति महाकविः उल्लिखति।

**विभिन्नशङ्खः कलुषीभवन्मुहुर्मदेन दन्तीव मनुष्यधर्मणः।**

**निरस्तगाम्भीर्यमपास्तपुष्पकं प्रकम्पयामास न मानसं न सः।।५५।।**

**अन्वयः** – सः मदेन दन्ती इव विभिन्नशङ्खः कलुषीभवत् निरस्तगाम्भीर्यम् अपास्तपुष्पकं मनुष्यधर्मणः मानसं मुहुः न प्रकम्पयामास(इति)न।

**प्रतिपदार्थः** – सः = रावणः, मदेन = दर्पेण, दन्तीव = गजः इव, मानसं = चित्तम्, मानससरोवरम् , विभिन्नशङ्खः = विनाशितशङ्खनिधिः, कलुषीभवत् =क्षुभ्यत् , क्षोभं गच्छत् , निरस्तगाम्भीर्यम् = नष्टं गाम्भीर्यम् , त्यक्तम् अगाधत्वम् , अपास्तपुष्पकम् गतपुष्पकविमानम् , निरस्तकुसुमम् , मनुष्यधर्मणः =कुबेरस्य, मुहुः = पुनः पुनः, न प्रकम्पयामास = न क्षोभयामास, न अकम्पयत्।

**श्लोकार्थः** – सः रावणः अहङ्कारेण गज इव शङ्खनिधिं विच्छिन्नं कृत्वा क्षोभं गच्छत्, अविकारत्वं नाशयन् , पुष्पकविमानम् अपहृत्य च कुबेरस्य मानसं पुनः पुनः कम्पितम् नाकरोत् इति न। इत्युक्ते अकम्पयदेव।

**भावार्थः** – यथा मदोन्मत्तः गजः सरोवरं प्रविश्य तस्य जलं कलुषितं करोति। तत्रत्यान् शङ्खपुष्पमादीन् नाशयति। तथा कुबेरस्य मानसं प्रविश्य रावणः तत् विकारयुक्तम् इत्युक्ते क्षोभजनकम् अकरोत् । तस्य शङ्खनिधिं सः अनाशयत् । पुष्पकविमानम् अपहृत्य

तस्य मनः वारं वारम् अकम्पयत् सः। तात्पर्यं रावणः कुबेरं जित्वा तस्य सर्वस्वं हृतवान्।

**विशेषः** – श्लोकेऽस्मिन् रावणस्य कुबेरविजयः समुपवर्णितः। दन्तिरावणयोः साम्यं प्रदर्श्य श्लेषालङ्कारः महाकविना अत्र नियोजितः।

अत्र शङ्खनिधिः, पुष्पकं मानसं चेति द्वयार्थकाः। तस्मात् श्लेषोत्पत्तिः।

शङ्खनिधिः – कुबेरस्य नवनिधयः सन्ति। तेषु एकतमः शङ्खनिधिः। महापद्मः, पद्मः, शङ्खः, मकरः, कच्छपः, मुकुन्दः, कुन्दः, नीलः खर्वश्चेति नव निधयः। तथैव मदोन्मत्तगजानां ललाटस्य अस्थि अपि शङ्खः इत्युच्यते।

पुष्पकम् – पुष्पसमूहः पुष्पकविमानश्चेति अर्थद्वयम् ।

मानसम् – मनः मानससरोवरश्चेति।

समासः – विभिन्नशङ्खः – विभिन्नः शङ्खः येन सः – बहुव्रीहिसमासः।

निरस्तगाम्भीर्यम् – निरस्तं गाम्भीर्यं यस्मात् तत् – बहुव्रीहिसमासः।

अपास्तपुष्पकम् – अपास्तानि पुष्पाणि यस्मात् तत् – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. कः कुबेरस्य मानसम् अकम्पयत्?

२. अत्र गजस्य तुलना केन सह कृता?

३. विभिन्नशङ्खः इति कस्य विशेषणम्?

### १०.२.२. रावणात् वरुणपराजयः

'वरुणोऽपि रावणात् पराजितः' इति नारदमुनिः श्रीकृष्णम् अधोनिर्दिष्टेन श्लोकेन कथयति।

**रणेषु तस्य प्रहिताः प्रचेतसा सरोषहुङ्कारपराङ्मुखीकृताः।**
**प्रहर्तुरेवोरगराजरज्जवो जवेन कण्ठं सभयाः प्रपेदिरे।।५६।।**

**अन्वयः** – रणेषु प्रचेतसा प्रहिताः उरगराजरज्जवः यस्य सरोषहुङ्कारपराङ्मुखीकृताः (अत एव) सभयाः जवेन प्रहर्तुः एव कण्ठं प्रपेदिरे।।

**प्रतिपदार्थः** – रणेषु = युद्धेषु, प्रचेतसा = वरुणेन, प्रहिताः = प्रयुक्ताः, उरगराजरज्जवः = महासर्परज्जवः, नागपाशाः, तस्य = रावणस्य, सरोषहुङ्कारपराङ्मुखीकृताः = सरोषहुङ्कृतिपरावर्तिताः। सभयाः = भयेन सहिता, जवेन = वेगेन, सत्वरम् , प्रहर्तुः =प्रहारकर्तुः, कण्ठम् = गलम् , प्रपेदिरे = सम्प्राप्ताः।

**श्लोकार्थः** – युद्धे वरुणेन प्रक्षिप्ताः नागपाशाः रावणस्य क्रोधपूर्णेन हुङ्कारेण भयभीताः। ततः वेगेन परावर्त्य ते प्रहारकर्तुः वरुणस्य कण्ठे एव संलग्नाः।

**भावार्थः** – रावणवरुणयोः युद्धे वरुणेन रावणस्योपरि नागपाशास्त्रं प्रयुक्तम् । तदस्त्रं रावणस्य केवलं क्रोधपूर्णहुङ्कारेण भीत्या परावृत्तम् । अपि च प्रहर्तुः वरुणस्य एव बन्धनमकरोत् । परहिंसार्थम् इत्युक्ते रावणवधार्थं प्रयुक्तमायुधं वैपरीत्येन प्रहर्तुः नाशाय कारणीभूतं जातम् । एवं रावणस्य क्रोधपूर्णहुङ्कारेऽपि महत्सामर्थ्यं वर्तते चेत् तस्मिन् अतुलं बलं स्यादिति सिद्धं भवति। अपि च वरुणस्य कण्ठे शस्त्राघातः इति वाक्यं वरुणस्य पराजयं सूचयति।

**विशेषः** – वरुणः पश्चिम-दिक्पालः वर्तते। रावणः वरुणस्य पराजयं कृतवान् इत्युक्ते पश्चिमदिशि तेन स्वसाम्राज्याविस्तारः कृत इति। अस्मिन् पद्ये विषमालङ्कारः विद्यते।

समासः -सभयाः - भयेन सहिताः = तत्पुरुषसमासः।

सरोषहुङ्कारपराङ्मुखीकृताः- सरोषहुङ्कारेण पराङ्मुखीकृताः- तृतीयातत्पुरुषसमासः।

उरगराजरज्जवः - उरगराजा रज्जवः इव - कर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. नागपाशाः जवेन कस्य कण्ठं प्राप्ताः?

२. प्रहिताः उरगराजरज्जवः कस्मात् पराङ्मुखीजाताः?

### १०.२.३.दक्षिणदिक्पालस्य धर्मराजस्य पराभवः

रावणेन दक्षिणदिक्पालस्य यमराजस्यापि पराभवः कृतः इति नारदमुनिः भगवते निवेदयति। इदमेव निवेदनं महाकविना प्रस्तुते श्लोके उल्लिखितम् ।

**परेतभर्तुर्महिषोऽमुना धनुर्विधातुमुत्खातविषाणमण्डलः।**
**हृतेऽपि भारे महतस्त्रपाभरादुवाह दुःखेन भृशानतं शिरः।। ५७।।**

**अन्वयः** – अमुना धनुः विधातुम् उत्खातविषाणमण्डलः परेतभर्तुः महिषः भारे हृते अपि महतः त्रपाभरात् भृशानतं शिरः दुःखेन उवाह।

**प्रतिपदार्थः** – अमुना = रावणेन,धनुः = चापम् , शार्ङ्गम् , विधातुम् = निर्मातुम् , उत्खातविषाणमण्डलः =उत्पाटितशृङ्गवलयः, परेतभर्तुः = प्रेताधिपस्य यमस्य, महिषः = यमस्य वाहनम् सैरिभः, भारे = विषाणमण्डलरूपे भारे, हृतेऽपि = उत्सारितेऽपि, महतः = बृहतः, त्रपाभरात् = लज्जाभरात् , व्रीडाभारेण भृशानतम् = अतिनम्रम् , शिरः =मूर्धानम् , मस्तकम् , दुःखेन = क्लेशेन, उवाह = दधार, वहति स्म।

**श्लोकार्थः** – राक्षसराजेन रावणेन धनुः विधातुम् उत्पाटितशृङ्गयुगलः यमराजस्य वाहनं महिषः शृङ्गमण्डलरूपे भारे अपहृतेऽपि महता लज्जारूपभारेण अवनतं मस्तकं दुःखेन वहति स्म।

**भावार्थः** – रावणः धनुः निर्मातुं यमराजवाहनस्य महिषस्य शृङ्गयुगलम् उत्पाटितवान्। तेन तस्य भाराक्रान्तं मस्तकं भाररहितं सञ्जातम् । एवं सत्यपि लज्जारूपभारेण अतिनम्रं मस्तकं सः महता कष्टेन वहति स्म। यद्यपि शृङ्गभारापसारणं जातं तथापि लज्जारूपभारः महिषमस्तके आसीत् । तस्मात् अवनतमस्तकः सः अटति स्म।

तात्पर्यं रावणः यमराजस्य पराभवं कारयित्वा तस्य वाहनं महिषं स्वाधीनम् अकरोत् । स्वामिनः पराजयात् सः महिषः महद्दुःखम् अन्वभवत् । अतः अवनतमस्तकः सः इत्यभिप्रायः। अपि च यमराजभाररहितः महिषः इति सूचयितुं शृङ्गभाररहितः तथा च यमराजपराभवं ज्ञापयितुं शृङ्गोत्पादनमिति वर्णितम्।

**विशेषः** – रावणः दक्षिणदिशि स्वसाम्राज्यम् अतनोत् इति यमराजपराभवेन अवगम्यते।

यद्यपि महीयान् विषाणभारः अपाकृतः तथापि दुःसहः व्रीडाभारः तस्मिन् आरोपितः इत्यस्मात् उत्प्रेक्षा अलङ्कारोऽत्र।

समासः – उत्खातविषाणमण्डलः–उत्खातं विषाणयोः मण्डलं यस्य

सः–बहुव्रीहिसमासः।

भृशानतम् – भृशम् आनतम् – कर्मधारयसमासः।

परेतभर्तुः – परेतानां भर्ता तस्य – षष्ठीतत्पुरुषसमासः।

त्रपाभरात् – त्रपैव भरः तस्मात् – कर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. भृशानतं शिरः कः वहति स्म?

२. रावणेन महिषस्य विषाणमण्डलं किमर्थम् उत्पाटितम्?

## १०.२.४. रावणात् सूर्यभयवर्णनम्

रावणात् भीतः सूर्योऽपि स्वप्रखरतां न्यूनीकृतवान् इति देवर्षिनारदः भगवन्तं श्रीकृष्णं बोधयतीति महाकविना माघेन अधोनिर्दिष्टे श्लोके प्रतिपादितम् ।

**स्पृशन् सशङ्कः समये शुचावपि स्थितः कराग्रैरसमग्रपातिभिः।**
**अघर्मघर्मोदकबिन्दुमौक्तिकैरलञ्चकारास्य वधूरहस्करः।।५८।।**

**अन्वयः** – अहस्करः शुचौ समये स्थितः अपि असमग्रपातिभिः कराग्रैः सशङ्कः स्पृशन् अघर्मघर्मोदकबिन्दुमौक्तिकैः अस्य वधूः अलञ्चकार।

**प्रतिपदार्थः** – अहस्करः = दिनकरः, सूर्यः ,शुचौ समये = ग्रीष्मकाले, स्थितोऽपि =वर्तमानोऽपि, अवस्थितोऽपि , असमग्रपातिभिः = सङ्कुचितवृत्तिभिः, असकलपातितैः, कराग्रैः = किरणाग्रैः, मयूखपर्यन्तैः, सशङ्कः =सभयः, स्पृशन् = स्पर्शं कुर्वन् , आमृशन् , अस्य = रावणस्य, वधूः = अङ्गनाः,

अघर्मघर्मोदकबिन्दुमौक्तिकैः =अनुष्णस्वेदजबिन्दुमौक्तिकैः, अलञ्चकार=अभूषयत् ।

**श्लोकार्थः** – वर्तमानेऽपि ग्रीष्मकाले सूर्यः सङ्कुचितकिरणाग्रैः रावणस्य अङ्गनाः भयेन स्पृशन् अनुष्णस्वेदबिन्दुमौक्तिकैः अभूषयत् ।

**भावार्थः** – ग्रीष्मकाले सूर्यः प्रचण्डः तपति। परं रावणस्य भयात् तस्य प्रचण्डतापः न्यूनीजातः इति। यथा कश्चित् शुचिसम्पन्नः धर्मभीरुप्रसाधकः सङ्कुचितहस्तैः वधूः मौक्तिकैः अलङ्करोति तथा दिनकरः भीत्या असमस्तकिरणैः स्पृशन् शीतलधर्मबिन्दुमुक्ताफलैः रावणवधूः अलङ्करोति स्म। रावणस्य अङ्गणासु उत्पादिताः घर्मबिन्दवः मौक्तिकमिव रमणीयतां धृतवन्तः सूर्यस्य उष्णताभावात् इति भावः।

**विशेषः** – रावणाङ्गणानां भयेन अलङ्करणमिति सूर्यस्य पवित्राचरणसूचकम् । ग्रीष्मकाले सूर्यस्य प्रचण्डतापाभावे प्रधानकारणं रावणभयमेव नान्यदिति ज्ञापयति श्लोकोऽयम् । समासोक्तिरलङ्कार पद्येऽस्मिन् वर्तते।

समासः – सशङ्कः – शङ्कया सहितः यः सः – बहुव्रीहिसमासः।

असमग्रपातिभिः – न समग्रपातिभिः – नञ् तत्पुरुषसमासः।

अघर्मघर्मोदकबिन्दवः – अघर्माः घर्मोदकबिन्दवः – कर्मधारयसमासः।

अहस्करः– अहः करोति इति – उपपदतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. रावणवधूः कः अलञ्चकार?

२. रावणभयात् ग्रीष्मर्तौ सूर्यः कथं तपति?

### १०.२.५. चन्द्रकृता रावणाराधना

रावणस्य सेवायां चन्द्रः निरन्तरं तिष्ठति। केन प्रकारेण चन्द्रः सेवारतः इति देवर्षिनारदः अधोलिखितेन श्लोकेन श्रीकृष्णं ज्ञापयति।

**कलासमग्रेण गृहानमुञ्चता मनस्विनीरुत्कयितुं पटीयसा।**
**विलासिनस्तस्य वितन्वता रतिं न नर्मसचिव्यमकारि नेन्दुना।। ५९।।**

**अन्वयः** – कलासमग्रेण गृहान् अमुञ्चता मनस्विनीः उत्कयितुं पटीयसा रतिं वितन्वता इन्दुना विलासिनः तस्य नर्मसचिव्यं न अकारि (इति) न।

**प्रतिपदार्थः** – क लासमग्रेण =सम्पूर्णकलाभिः, सकलशिल्पकलाकुशलेन, गृहान् =रावणप्रासादान्, अमुञ्चता = अपरित्यजता, मनस्विनीः = मानिनीः, उत्कयितुम् = उत्कण्ठयितुं ,सोत्सुकाः कर्तुम् , पटीयसा = चतुरेण, रतिम् =सुरतानुरागम् , वितन्वता =वर्धयता, इन्दुना =चन्द्रेण, विलासिनः = शृङ्गारिणः, तस्य =रावणस्य, नर्मसाचिव्यम् = नर्मसचिवता, न अकारि = न कृतम्।

**श्लोकार्थः** – सम्पूर्णषोडशकलाभिः सह रावणस्य प्रासादान् अपरित्यजता, मानिनीः सर्वदा अत्यन्तचातुर्येण सोत्सुकाः कृत्वा विलसिनः तस्य (रावणस्य) रतिं वर्धयता चन्द्रेण नर्मसाचिव्यं नैव कृतमिति न।

**भावार्थः** – षोडशकलाभिः चन्द्रः सर्वदा रावणस्य प्रासादे तिष्ठति स्म। अर्थात् सः न केवलं शुक्लपक्षे अपि तु कृष्णपक्षे अपि रावणप्रासादं प्रकाशयति स्म। उपस्थिते चन्द्रे कामभावनाः वर्धन्ते इति प्रसिद्धम् । अतः मनस्विनीः स्वकीयचातुर्येण सोत्सुकाः करोतीति वर्णितम् । एवं रावणस्य विलासितां प्रवर्धयन् चन्द्रः तस्य नर्मसाचिव्यं विदधाति स्म। तात्पर्यं ,चन्द्रः सर्वाभिः कलाभिः तं निषेवते स्म।

**विशेषः** – प्राचीनकाले राज्ञां गृहेषु सम्पूर्णकलानिष्णाताः नर्मसचिवाः भवन्ति स्म। यस्य कार्यमासीत् मनस्विनीनां कामोद्दीपकवचनैः कामोत्साहवर्धनम् इति। एवं रतिवर्धकक्रीडासु सः राज्ञः साहाय्यकः भवति स्म। रावणस्य विलासवर्धने चन्द्रोऽपि एवमेव नर्मसचिवधर्मम् अनुतिष्ठति स्म इति महाकवेः अभिप्रायः। अत्र नञ्द्वयं निषेधनिवारणार्थम् । श्लेषालङ्कारः श्लोकमेतम् अलङ्करोति।

समासः – नर्मसाचिव्यम् – नर्मणि साचिव्यम् इति – सप्तमीतत्पुरुषसमासः।
विलासिनः – विलसितुं शीलमस्य इति तस्य – बहुव्रीहिसमासः।
कलासमग्रेण – कलाभिः समग्रः तेन – तृतीयतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. रावणस्य नर्मसाचिव्यं कः अकरोत्?

२. इन्दुः कस्य गृहं न मुञ्चति स्म?

## १०.२.६. रावणकृतं गणेशदन्तोत्पाटनम्

'एकदन्तः विनायकः' इति गणेशस्य ख्यातिः रावणस्य दुष्क्रियया अभवदिति नारदः श्रीकृष्णं विनिवेदयितुं कामयते प्रस्तुतेन श्लोकेन।

**विदग्धलीलोचितदन्तपत्रिकाविधित्सया नूनमनेन मानिना।**
**न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति।।६०।।**

**अन्वयः** – मानिना अनेन विदग्धलीलोचितदन्तपत्रिकाविधित्सया नूनं जातु उद्धृतं वैनायकम् एकं विषाणम् अद्यापि पुनः न प्ररोहति।

**प्रतिपदार्थः** – मानिना = अहङ्कारिणा, अनेन =रावणेन, नूनम् = निश्चितम् , जातु = कदाचित् , उद्धृतम् = उत्पाटितम् , वैनायकम् = विनायकसम्बन्धि, गाणपतम् , एकम् = अद्वितीयम् , विदग्धलीलोचितदन्तपत्रिकाविधित्सया = चतुरविलासिनीनां धारणोचितानि दन्तमयकर्णभूषणानि विधातुम् इच्छया, विषाणम् = दन्तः, अद्यापि = इदानीमपि, पुनः भूयः, न प्ररोहति = न प्रादुर्भवति।

**श्लोकार्थः** – अनेन अहङ्कारिणा रावणेन चतुरविलासिनीनां धारणोचितानि दन्तमयकर्णभूषणानि निर्माणेच्छया कदाचित् गणेशस्य एकः दन्तः उत्पाटितः, यः अद्यापि न प्रादुर्भवतीति निश्चितम् ।

**भावार्थः** – रावणः कदाचित् विलासिनीनां हस्तिदन्तकर्णभूषणानि निर्माणं कर्तुं गणेशस्य दन्तमेकम् उत्पाटितवान् । अद्य यावत् सः दन्तः पुनः न उत्पन्नः तस्मात् सः एकदन्तः इति प्रसिद्धिः। रावणेन एव विनायक एकदन्तः कृत इति भावार्थः ।

**विशेषः**– गणेशस्य एकदन्तत्वं रावणकारणादेव इति नारदः ज्ञापयितुमिच्छति। अत्र गणपतेः एकदन्त इत्यभिधानस्य सार्थकता सम्भाविता तस्मात् उत्प्रेक्षालङ्कारः।

समासः – मानिना – मानः अस्य अस्तीति मानी तेन – बहुव्रीहिसमासः।

विदग्धलीलोचितदन्ततपत्रिकाविधित्सया–विदग्धलीलानाम् उचिताः दन्तपत्रिकाः विधातुमिच्छया – तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. विनायकस्य एकदन्तः केन उत्पाटितः?

२. रावणः गणेशस्य दन्तं किमर्थम् उत्पाटितवान् ?

३. एकदन्तः इति कस्य अभिधानम्?

**१०.३. उपसंहारः**

अस्मिन् दशमे खण्डे रावणकारणात् लोकोपद्रवः समूद्भूत इति अवगम्यते। स्वबलप्रदर्शनं कृत्वा सः सूर्यचन्द्रादीन् जीतवान्। कुबेरः वरुणः यमराजश्च तेन पराभूताः। गणेशस्य दन्तोत्पादनं विधाय तमपि त्रस्मकरोत् सः। एवं रावणः लोकसन्तापं जनयित्वा जनमनस्सु आत्मनः दानवप्रतिमानिर्माणं कृतवानिति अस्मात् खण्डात् अवगन्तुं शक्नोति छात्रः।

**१०.४. प्रश्नाः**

१.रावणस्य वरुणविजयं वर्णयत।

२.रावणात् यमदेवपराभवः कविना कथं सूचितः?

३. चन्द्रः केन प्रकारेण रावणं निषेवते स्म?

## एकादशः खण्डः
## *भयभीतदेवानां दुःस्थितिः*

**संरचना**

११.०. प्रस्तावना

११.१.लक्षिताधिगमांशाः

११.२.भयभीतदेवतानां दुःस्थितिः

११.२.१ पवनकृता अनपराधदेवतानां बन्धनमुक्तता

११.२.२. रावणात् अग्नेः तेजोरहितता

११.२.३. सर्पकृता रावणाराधना

११.२.४. दिग्गजानां पराजयः

११.२.५. रावणस्य सुराङ्गनाविलासः

११.२.६. ऋतूनामपि रावणाराधनम्

११.३. रावणवधवर्णनम्

११.३.१. अभिमानी रावण

११.३.२. रावणवधः

११.४.उपसंहारः

११.५. प्रश्नाः

### ११.०. प्रस्तावना

महाकविमाघस्य शिशुपालवधमहाकाव्यस्य प्रथमसर्गे 'भयभीतदेवानां दुःस्थितिः'इतिपाठ्यांशःअन्तर्भूतोऽस्ति ।पाठ्यांशोऽयम् एकषष्टितमश्लोकादारभ्य षट्षष्टिश्लोकपर्यन्तं महाकविना प्रतिपादितः ।रावणस्य सन्तापेन त्रस्तानां देवानां दुःस्थितिवर्णनमेवास्यखण्डस्य प्रयोजनम् ।अत्र हि रावणभयात् अग्नेः तेजोरहितता, दिग्गजानां पराजयश्च विवेचितः। तथैव सर्पकृतां रावणाराधनां,ऋतूनां रावणसेवाञ्च निवेद्य तस्य सुराङ्गनाविलासःअत्र सूचितः। अनपराधदेवानां बन्धनमपि रावणेन

कृतमासीत्। इत्थं रावणस्य कुकर्माणि कथयित्वा तस्य वधवर्णनाय श्लाकद्वयं विरचितं दृश्यते। अधुना अस्माभिः उपर्निर्दिष्टविषयानां विवेचनं क्रियते।

## ११.१. लक्षिताधिगमांशाः

* रावणस्य आतङ्कात् लोके भयप्रदायकस्थितिः उद्भूतेति छात्रज्ञानं भवति।
* अहङ्कार एव खलानां विनाशकः इत्यवगन्तुं प्रभवति।
* रावणस्य उग्रस्वभावं सः ज्ञातुं शक्नोति।
* रावणवधाय रामरूपेण श्रीकृष्णः पृथिव्यामवतीर्ण इति अभिजानाति।
* दुष्टव्यवहारः कीदृशः भवतीति लेखितुं पारयति ।

## ११.२. भयभीतदेवानां दुःस्थितिः

अभिमानी रावणः देवान् अपीडयत्। त्रस्ताः देवाः भयग्रस्ताः अभवन्। केचन भीत्या तमाराधयितुम् आरभन्त। कतिचन तु कान्तिविहीनाः सञ्जाताः। एवं तेषां दयनीयस्थितेः अवगमनाय प्रस्तुतपाठ्याभागोऽत्र निवेद्यते।

### ११.२.१. पवनकृता अनपराधदेवानां बन्धनमुक्तता

रावणेन अनपराधदेवाः कस्मात् विमोचिताः इति देवर्षिनारदः पद्येऽस्मिन् सूचयति।

**निशान्तनारीपरिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः।**
**प्रियेण तस्यानपराधबाधिताः प्रकम्पनेनानुचकम्पिरे सुराः।।६१।।**

**अन्वयः** - निशान्तनारीपरिधानधूननस्फुटागसा अपि ऊरुषु लोलचक्षुषः तस्य प्रियेण प्रकम्पनेन अनपराधबाधिताः सुराः अनुचकम्पिरे।

**प्रतिपदार्थः**-निशान्तनारीपरिधानधूननस्फुटागसा= अन्तःपुरविलासिनीजनान्तरीयचालनस्पष्टापराधेन, ऊरुषु = विलासिनीकमनीयसक्थिषु, लोलचक्षुषः = सतृष्णनेत्रस्य, तस्य = रावणस्य , प्रियेण = कृपापात्रेण, प्रकम्पनेन =वायुना, अनपराधबाधिताः =अपराधाऽभावेऽपि पीडिताः, सुराः = देवाः, अनुचकम्पिरे = अनुकम्पिताः, स्फुटागसा = स्पष्टापराधेन, धूननम् = चालनम् , परिधानानि = वस्त्राणि।

**श्लोकार्थः** – अन्तःपुरनारीणाम् अधोवस्त्रम् अपसार्य कृतेन स्पष्टापराधेन अपि ऊरुषु कामुकदृष्टेः रावणस्य कृपापात्रेण वायुना अनपराधेन पीडिताः देवाः अनुगृहीताः।

**भावार्थः** – अन्तःपुरनिवसिनीभिः परिधृतानि अधोवस्त्राणि अपसार्य वायुना स्पष्टः अपराधः कृतः। किन्तु अनेन अपराधेन रावणः न क्रुद्धः प्रत्युत तस्मिन् कृपालुः सञ्जातः। यतो हि तासां नारीणां वस्त्ररहित-ऊरुदर्शनं कामुकाय रावणाय लीलया सम्प्राप्तम् । देवाः उपकारकर्तारः यतः तेषु एव एकेन (वायुदेवेन) मह्यं दृष्टिसौख्यं प्रदत्तमिति। एवं विचिन्त्य रावणेन अनपराधेन पीडिताः देवाः स्वकीयबन्धनात् उन्मोचिताः। तात्पर्य, वायोः चातुर्यं सर्वान् बन्धनरहितम् अकरोत् ।

**विशेषः** – जगति अपराधकर्तॄणां प्रियमित्राणि अपराधकर्तारः एव इत्येव बोधः अस्मात् श्लोकात् भवति। अत्र महापराधकर्ता वायुः अनपराधदेवानां बन्धनमोचकः सञ्जातः। एवमेकेन दुष्कार्येण बहवः रक्षिताः इत्यपि वैशिष्ट्यमत्र।

समासः – अनपराधबाधिताः – अनपराधे बाधिताः –सप्तमीतत्पुरुषसमासः।

लोलचक्षुषः – लोले चक्षुषी यस्य सः लोलचक्षुः तस्य-बहुव्रीहिसमासः।

निशान्तनारीपरिधानधूननस्फुटागसा- निशान्तनारीणां परिधानानां धूननेन स्फुटागाः यस्य तेन – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. अनपराधबाधिताः सुराः केन मोचिताः?

२. वायुः कस्य कृपापात्रम् अभवत्?

## ११.२.२. रावणात् अग्नेः तेजोरहितता

रावणस्य तेजसा अग्निरपि निष्प्रभीजातः इति नारदमुनिः अधोलिखिते श्लोके वर्णयति।

**तिरस्कृतस्तस्य जनाभिभाविना मुहुर्महिम्ना महसां महीयसाम् ।**
**बभार बाष्पैर्द्विगुणीकृतं तनुस्तनूनपाद्धूमवितानमाधिजैः।। ६२।।**

**अन्वयः** – तस्य जनाभिभाविना महीयसां महसां महिम्ना मुहुः तिरस्कृतः तनुः तनूनपात् आधिजैः बाष्पैः द्विगुणीकृतं धूमवितानं बभार।

**प्रतिपदार्थः** – तस्य = रावणस्य, जनाभिभाविना = लोकतिरस्कारिणा, महीयसां = अतिमहताम् , महतां = तेजसाम् , महिम्ना = माहात्म्येन, गौरवेण, मुहुः = पुनःपुनः भृशम् , तिरस्कृतः = अभिभूतः, पराभूतः, तनुः = कुशः, तनूनपात् = अग्निः, आधिजैः = मानसव्यथोत्पन्नैः, बाष्पैः = निःश्वासोष्माभिः, द्विगुणीकृतम् = द्विगुणतां नीतम् , धूमवितानं = धूममण्डलम् , धूमपुञ्जम् , बभार = धारणं कृतवान् , अधारयत् ।

**श्लोकार्थः** –तस्य रावणस्य लोकोत्तरेण अतिमहतां तेजसां माहात्म्येन पुनः पुनः पराभूतः कृशः अग्निः मानसव्यथोत्पन्नैः बाष्पैः द्विगुणीकृतं धूममण्डलम् अधारयत् ।

**भावार्थः** – रावणस्य तेजोमण्डलं लोकान् तिरस्कृतं करोति स्म। तेन महता तेजसा अग्निरपि वारं वारम् अपमानितः दुर्बलश्च अभवत् । ततः कृशकायः सः मानसिककष्टम् अनुभवन् निस्तेजस्कः सञ्जातः। अपि च निःश्वासबाष्पैः सदा धूमायमान एवासीत् न तु ज्वालावलयमण्डितः। तात्पर्यं पूर्वम् अग्निः सर्वाधिकं तेजस्वी आसीत् । किन्तु अधुना रावणस्य तेजसा पराभूतः अतः मानसिकपीडाग्रस्तः सन् बाष्परूपं नेत्रजलं तस्मात् निर्गतम् । तेन हि दुर्बलः सः अत्यधिकः धूमायमानः सञ्जातः।

**विशेषः** – रावणस्य तेजसः पुरतः अग्नेः तेजः क्षीणं जातम् । अतिशयोक्तिः अलङ्कारोऽस्ति अत्र।

समासः – तनूनपात् – तनूं न पातयति इति – उपपदतत्पुरुषसमासः।

आधिजैः – आधेः जातानि आधिजातानि तैः – तत्पुरुषसमासः।

धूमवितानम् – धूमस्य वितानम् – षष्ठीतत्पुरुषसमासः।

जनाभिभाविना–जनम् अभिभवतीति जनाभिभावी तेन–उपपदतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. द्विगुणीकृतं धूमवितानं कः अधारयत्?

२. अग्निः कस्य तेजसा तिरस्कृतः?

### ११.२.३.सर्पकृता रावणाराधना

रावणस्य उग्रस्वभावात् सर्पैरपि सः सेवितुमारब्धः। एवं नारदमुनिना रावणाराधना श्रीकृष्णाय श्राविता। अस्यैव वर्णनं प्रस्तुते श्लोके महाकविना माघेन कृतम् ।

**परस्य मर्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्मगामिभिः।**
**तमिद्धमाराधयितुं सकर्णकैः कुलैर्न भेजे फणिनां भुजङ्गता।। ६३।।**

**अन्वयः** – इद्धं तम् आराधयितुं परस्य मर्माविधं निजं द्विजिह्वतादोषम् उज्झतां फणिनाम् अजिह्मगामिभिः सकर्णकैः कुलैः भुजङ्गता न भेजे।

**प्रतिपदार्थः** – इद्धम् = दीप्तम्,उग्रम् तम् = रावणम् , आराधयितुम् =सेवितुम् , परस्य = अन्यस्य, मर्माविधम् = मर्मवेधकम् , हृदयादिकर्मस्थलपीडकम् , निजम् = स्वकीयम्, उज्झताम् = त्यजताम्, फणिनाम् = सर्पाणाम् , भुजङ्गता = सर्पत्वम् , कुलैः = समूहैः, द्विजिह्वतादोषम् = दशनात्मकं सर्पत्वदोषम् , अजिह्मगामिभिः = ऋजुगामिभिः, सकर्णकैः = चक्षुःश्रवस्त्वं विहाय आविष्कृतकारणैः, न भेजे = अत्यजत् ।

**श्लोकार्थः** – श्लोकेऽस्मिन् द्विविधः अर्थः विद्यते। तद्यथा – सर्पमधिकृत्य पिशुनमाश्रित्य च।

सर्पमधिकृत्य अर्थः – उग्रस्वभावयुक्तं रावणम् आराधयितुं सर्पैः अन्येषां मर्मस्थलभेदनकारकः द्विजिह्वतादोषः परित्यक्तः। आत्मनः वक्रगतिं त्यक्त्वा तैः सरलागतिः अङ्गीकृता। चक्षुःश्रवत्वत्यागं कृत्वा सकर्णाः ते अभवन् ।

पिशुनमाश्रित्य अर्थः – उग्रस्वभावयुक्तं रावणं प्रसन्नं कर्तुं खलैः कुलाचारघातकः

स्वद्विजिह्वादोषत्यागः नामपिशुनतात्यागः कृतः ।कपटाचारं परित्यज्य सन्मार्गः तैः स्वीकृतः। नियन्त्रिताः ते खलस्वभावत्यागं कृतवन्तः।

**भावार्थः** – सर्पैः दशनात्मकं सर्पत्वदोषत्यागं विधाय रावणं सेवितुम् आरब्धम् । खलैरपि पैशुन्यं परित्यज्य सन्मार्गगमनं समारब्धम् इति भावः।

**विशेषः** – रावणस्य शासनकाले खलैः खलत्वं सर्पैः सर्पत्वं च विहाय सौम्यत्वम् आश्रितम् । अत्र प्रस्तुतसर्पविशेषणसाम्यात् अप्रस्तुतखलव्यवहारप्रतीतिः सम्भवति। अतः समासोक्तिः अलङ्कारः।

द्विजिह्वतादोषः – द्वे विखण्डिते द्विविधे च जिह्वे यस्य सः द्विजिह्वः। सर्पस्य द्विविधा जिह्वा वर्तते अतः द्विजिह्वः इत्यपि तं सम्बोधयति। तेन हि द्विजिह्वतादोषः नाम दशनात्मकः सर्पत्वदोषः इति। खलपुरुषस्य पिशुनत्वमिति तस्य अपरः अर्थः। यतो हि खलपुरुषः एकमेव वाक्यं द्विधा कथयति। कस्यापि दुर्गुणकथने वा निन्दायां वा समानता न भवति। अयं पिशुनतादोषः।

सकर्णकाः – कर्णाभ्यां सह वर्तन्ते इति। सर्पाणां कर्णौ न स्तः इत्युच्यते। अतः 'चक्षुःश्रवसः' नाम नेत्ररूपकर्णयुक्तः सः नेत्राभ्यामेव शृणोति इति। परन्तु रावणशासने सर्पैरपि कर्णधारणं कृतमिति भावः। अतः सकर्णकाः इति उल्लेखः तेषाम् । तथैव रावणराज्ये जनाः कुटिलवाक्यश्रवणं परित्यज्य यथार्थतान्वेषणम् आरब्धवन्तः तस्मात् तेषां कृते सकर्णकाः इत्युल्लेखः श्लोकेऽस्ति।

समासः – मर्माविधम् – मर्माणइ विध्यतीति मर्माविध् तम् – उपपदतत्पुरुषसमासः।

अजिह्मगामिनः – न जिह्मगामिनः – नञ् तत्पुरुषसमासः।

भुजङ्गता – भुजं (कुटिलं) गच्छन्ति इति भुजङ्गाः अथवा

भुजैः गच्छन्ति इति – उपपदतत्पुरुषसमासः।

भुजङ्गानां भावः भुजङ्गता – षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. सर्पाः कम् आराधयितुं वाञ्छन्ति स्म?

२. फणिभिः किं त्यक्तम्?

### ११.२.४. दिग्गजानां पराजयः

रावणकारणात् अस्मिन् जगति दिग्गजानां नामसार्थक्यं कथं लब्धमिति नारदः श्रीकृष्णं समुद्धृतश्लोकेन सूचयति।

**तदीयमातङ्गघटाविघट्टितैः कटस्थलप्रोषितदानवारिभिः।**
**गृहीतदिक्कैरपुनर्निवर्तिभिश्चिराय याथार्थ्यमलम्भि दिग्गजैः।। ६४।।**

**अन्वयः** - तदीयमातङ्गघटाविघट्टितैः कटस्थलप्रोषितदानवारिभिः गृहीतदिक्कैः अपुनर्निवर्तिभिः दिग्गजैः चिराय याथार्थ्यम् अलम्भि।

**प्रतिपदार्थः** - तदीयमातङ्गघटाविघट्टितैः = रावणगजसमूहाभिहतैः, कटस्थलप्रोषितदानवारिभिः = गण्डस्थलापगतमदजलैः, गृहीतदिक्कैः = पलाय्य संश्रितदिग्भिः, चिराय = चिरेण, अपुनर्निवर्तिभिः = पुनरागमनरहितैः, दिग्गजैः = दिशामातङ्गैः, दिशाहस्तिभिः, याथार्थ्यम् =अन्वर्थत्वम् , अलम्भि = लब्धम् , अधिगतम् , प्राप्तम् ।

**श्लोकार्थः** – रावणगजसमूहाभिहतैः गण्डस्थलापगतमदजलैः पुनरागमनरहितैः दिग्गजैः पलाय्य दिशः आश्रिताः। अपि च चिरकालाय नामसार्थक्यं तैः अधिगतम् ।

**भावार्थः** – पुरा अष्टौ दिग्गजाः स्वैरं सर्वत्र भ्रमन्ति स्म। तेषां गण्डस्थलात् सदा मदजलं प्रवहति स्म। परन्तु रावणस्य गजसेनया यदा ते आहताः तदा ते भीत्या ततः पलाय्य स्वां स्वां दिशम् आश्रितवन्तः। रावणगजसमूहभयात् तेषां न केवलं मदजलप्रवाहः स्थगितः अपि तु पुनरागमनचिन्तनत्यागोऽपि अभवत् । यः गजः यं दिशम् आश्रितवान् सः तस्याः दिशः नाम्ना विख्यातः। तस्मात् दिग्गजाः इति तेषां

संज्ञा चिराय याथार्थ्यम् अभजत् । एवं रावणहस्तिसेनया दिग्गजाः पराजिताः इति भावः।

**विशेषः** – अष्टौ दिग्गजाः अष्टदिक्षु स्थिताः। तेषां नामानि यथा –' ऐरावतः पुण्डरीको वामनः कुमुदोञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः'। अत्र रावणगजकृतदिग्गजविजयेन रावणस्य सकलभुवनविजयः सूचितः।

समासः – गृहीतदिक्कैः – गृहीताः दिशः यैः तैः –बहुव्रीहिसमासः।

याथार्थ्यम् – अर्थम् अनतिक्रम्य यथार्थम् – अव्ययीभावसमासः।

यथार्थस्य भावः – तत्पुरुषसमासः।

अपुनर्निवर्तिभिः – न पुनः निवर्तन्ते तैः – नञ् तत्पुरुषसमासः।

दिग्गजैः – दिक्षु स्थिता गजाः दिग्गजाः तैः – मध्यमपदलोपीसमासः।

कटस्थलप्रोषितदानवारिभिः – कटस्थलेभ्यः प्रोषितानि दानवारीणि येषां तैः – बहुव्रीहिसमासः।

तदीयमातङ्गघटाविघट्टितैः – तदीयमातङ्गानां घटाभिः विघट्टिताः तैः – तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. चिराय याथार्थ्यं कैः लब्धम् ?

२. दिग्गजाः कैः आहताः?

### ११.२.५. रावणस्य सुराङ्गनाविलासः

रावणस्य विलासयुक्तजीवनविषये नारदमुनिः भगवन्तं श्रीकृष्णं सूचयितुं प्रस्तुतश्लोकस्य आधारं स्वीकरोति।

**अभीक्ष्णमुष्णैरपि तस्य सोष्मणः सुरेन्द्रबन्दीश्वसितानिलैर्यथा।**
**सचन्दनाम्भःकणकोमलैस्तथा वपुर्जलार्द्रापवनैर्न निर्ववौ।।६५।।**

**अन्वयः** – सोष्मणः तस्य वपुः अभीष्णम् उष्णैः अपि सुरेन्द्रबन्दीश्वसितानिलैः यथा निर्ववौ तथा सचन्दनाम्भःकणकोमलैः जलार्द्रापवनैः न निर्ववौ।

**प्रतिपदार्थः** – सोष्मणः = कामज्वरसहितस्य, तस्य = रावणस्य, वपुः = शरीरम् , अभीक्ष्णम् = अत्यन्तम् , उष्णैरपि = सन्तप्तैरपि, सुरेन्द्रबन्दीश्वसितानलैः = सुराधिपबन्दीभूतसुन्दरीणां निःश्वासपवनैः, यथा = यादृशम् , निर्ववौ = निर्वृत्तम् , शान्तिः प्राप्ता, तथा तादृशम्,सचन्दनाभ्यःकणकोमलैः = चन्दनसहितजलबिन्दुमृदुभिः, जलार्द्रापवनैः = जलोक्षिततालवृन्तवायुभिः, न निर्ववौ =नानन्दं प्राप्तवान्।

**श्लोकार्थः** – सुरेन्द्रस्य बन्दीकृतानां सुन्दरीणाम् अत्यन्तम् उष्णनिःश्वासवायुभिः कामज्वरेण सन्तप्तरावणस्य शरीरं यथा शीतलतां प्राप्नोति स्म न तथा चन्दनसहितजलबिन्दुभिः आर्द्रतालवृन्तस्य शीतलवायुभिः।

**भावार्थः** – राक्षसराजः रावणः देवराजस्य इन्द्रस्य कामिनीः बन्दीकृतवान् आसीत् । यदा सः कामज्वरेण सन्तप्तः भवति स्म तदा तासां कामिनीनाम् अत्यन्तम् उष्णनिःश्वासाः तस्मै शान्तिप्रदानं कुर्वन्ति स्म। तात्पर्यं ताः दृष्ट्वा सः मनःसन्तोषम् अनुभवति स्म। तस्य कामज्वरसन्तापनिवारणाय अन्यौषधस्य आवश्यकता न भवति स्म। कामिनीनाम् उष्णनिःश्वासस्य प्रभावः चन्दनमपि अतिशेते स्म इत्यर्थः।

**विशेषः** – रावणस्य विलासमयजीवनमत्र प्रतिपादितम् । तथैव देवाङ्गनानाम् उत्पीडनं सः राक्षसः कृतवानिति ज्ञायते। अत्र उष्णनिःश्वासरूपकारणेन सन्तापनिवृत्तिरूपस्य विरुद्धकार्यस्य उत्पत्तिवर्णनात् विषमालङ्कारः।

समासः – सोष्मणः – उष्मणा सहितः यः सः – सहबहुव्रीहिसमासः।

जलार्द्रापवनैः – जलार्द्रायाः पवनाः तैः तत्पुरषसमासः।

सचन्दनाम्भःकणकोमलैः – चन्दनस्य अम्भांसि चन्दनाम्भांसि,

तेषां कणाः चन्दनाम्भःकणाः, ते च कोमलाः,

सचन्दनाम्भःकणकोमलाः तैः – तत्पुरुषसमासः।

सुरेन्द्रबन्दीश्वसितानिलैः – सुरेन्द्रस्य बन्दीनां श्वसितानि तेषाम् अनिलाः

तैः –तत्पुरुषसमासः

**स्वावलोकनप्रश्नाः**

१. रावणस्य कामज्वरसन्तापः कैः अशमत?

२. रावणस्य राज्ये काः बन्द्यः आसन्?

### ११.२.६. ऋतूनामपि रावणाराधनम्

रावणेन षड्ऋतवः अपि स्वाधीनाः कृताः आसन् । एवं रावणस्य ऋतोः वशीकरणं नारदमुनिना श्लोकेऽस्मिन् प्रस्तुतम् ।

**तपेन वर्षाः शरदा हिमागमो वसन्तलक्ष्म्या शिशिरः समेत्य च।**
**प्रसूनक्लृप्तिं दधतः सदर्तवः पुरेऽस्य वास्तव्यकुटुम्बितां ययुः।।६६।।**

**अन्वयः** – सदा प्रसूनक्लृप्तिं दधतः ऋतवः वर्षाः तपेन, हिमागमः शरदा, शिशिरः वसन्तलक्ष्म्या च समेत्य अस्य पुरे वास्तव्यकुटुम्बितां ययुः।

**प्रतिपदार्थः** – सदा = सर्वकाले, नित्यम् , प्रसूनक्लृप्तिम् = कुसुमसम्पत्तिम् , दधतः =धारयन्तः, वर्षाः= प्रावृट्कालः, वृष्टिकालः, तपेन = ग्रीष्मेण, ऋतवः =वसन्तादयः षड्ऋतवः, हिमागमः = हेमन्तर्तुः, शरदा = शरदृतुना नार्या सह, वसन्तलक्ष्म्या = वसन्तर्तुशोभया, पुरे = नगरे, लङ्कायामिति, वास्तव्यकुटुम्बिताम् = नागरिकताम् , ययुः =प्रापुः।

**श्लोकार्थः** – ग्रीष्मेण सह वर्षा, हेमन्तेन सह शरदा, शिशिरश्च वसन्तलक्ष्म्या सह सदा पुष्पसम्पत्तिं धारयन्तः रावणस्य पुरे लङ्कायां दाम्पत्यभावं भजन्तः निवासम् अकुर्वन्।

**भावार्थः** – जगति निश्चितऋतौ वृक्षेषु पुष्पसमृद्धिः फलप्राप्तिश्च सम्भवति। परमत्र नियतिकृतनियमान् उल्लङ्घ्य षड्ऋतवः अपि परस्परं मिलित्वा रावणस्य नगरे सर्वकालेषु पुष्पफलसमृद्धिं च यच्छन्ति स्म। तत्रापि तपेन वर्षा, हेमन्तेन शरद्, शिशिरेण च वसन्तलक्ष्मीः इति दाम्पत्यभावम् आदधानाः सर्वे ऋतवः पारिवारिकसदस्यरूपेण लङ्कायां निवसन्तः अहर्निशं रावणं सेवन्ते स्म इति। सर्वान् ऋतून् रावणः वशीकृतवान्

तस्मादेव भयभीताः ते तं सदा आराधयन्ति स्म इति भावः। तात्पर्यं लङ्कायाम् ऋतुत्रयमेव आसीत् ।

**विशेषः** –सर्वकालं पुष्पोत्पादनं फलोत्पादनञ्च रावणस्य नगरे आसीत् । अत्र अतिशयोक्तिः अलङ्कारोऽस्ति।

महाकविमाघेन श्लोकेऽस्मिन् ऋतुद्वयं मिलित्वा एकऋतुः इति वर्णितम् । तत्रापि कोमलऋतोः वाचकशब्दः स्त्रीलिङ्गे प्रयुक्तः वर्षा, शरद् वसन्तश्चेति। द्वितीयः ऋतुवाचकशब्दः पुल्लिङ्गे दृश्यते। ग्रीष्मः, हेमन्तः शिशिरश्चेति। अनेन दाम्पत्यभावप्रकटनं लीलया सम्भूतम् । तथैव वर्षा, शरद् वसन्तश्चेत्यादिषु स्वभावतः पुष्पसमृद्धिः निश्चिता। एते त्रयः ऋतवः क्रमशः ग्रीष्म–हेमन्त–शिशिरेण सह सम्मिलिताः चेत् सर्वर्तवः कुसुमसमृद्धिम् आदधानाः भवन्तीति विशेषः।

समासः – हिमागमः – हिमस्य आगमः यस्मिन् सः हिमागमः – बहुव्रीहिसमासः.

प्रसूनक्लृप्तिम् – प्रसूनानां क्लृप्तिः तान् – तत्पुरुषसमासः।

वसन्तलक्ष्म्या – वसन्तस्य लक्ष्मीः तया – तत्पुरुषसमासः।

वास्तव्यकुटुम्बिनः – वास्तव्याः कुटुम्बिनः – कर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. रावणस्य पुरे के वास्तव्यकुटुम्बितां प्राप्तवन्तः?

२. शिशिरेण सह कः ऋतुः दाम्पत्यभावं भजते स्म?

## ११.३. रावणवधवर्णनम्

लोकप्रपीडकः रावणः जगतः कृते भूभारः सञ्जातः। सीतामपहृत्य सः स्वयम् आत्मवधं न्यमन्त्रयत। महाकविना माघेन 'रावणवधवर्णनम्' इत्यत्र रामावतारसाफल्यप्रयोजनं सूचितम्। एतदेव श्लोकद्वये वर्णितमस्ति।?

### ११.३.१. अभिमानी रावणः

रावणस्य अभिमानत्वं नारदमुनिः श्लोकेऽस्मिन् अभिव्यनक्ति। महाकविमाघेन 'अपहृतसीतायाः अमोचनम्' इति सोदाहरणपूर्वकं रावणस्वभावः कथितः।

**अमानवं जातमजं कुले मनोः प्रभाविनं भाविनमन्तमात्मनः।**

**मुमोच जानन्नपि जानकीं न यः सदाभिमानैकधना हि मानिनः ।।६७।।**

**अन्वयः** – अमानवम् अजं मनोः कुले जातं प्रभाविनम् आत्मनः भाविनम् अन्तं जानन् अपि यः जानकीं न मुमोच, हि मानिनः सदा अभिमानैकधनाः भवन्ति।

**प्रतिपदार्थः** – अमानवम् = अमानुषम् , अजम् = नित्यम् , मनोः = एतन्नाम राजा, जातम् = उत्पन्नम् , रामचन्द्ररूपेण अवतीर्णम् , प्रभाविनम् = प्रभावशालिनम् , आत्मनः = स्वस्य रावणस्य, अन्तम् = विनाशकम्, भाविनम् = भविष्यन्तम् , जानन्नपि = ज्ञात्वा अपि, अवगम्य अपि, यः = रावणः, जानकीम् = सीताम् , जनककन्याम् , न मुमोच = न अमुञ्चत् , मुक्तं नाकरोत् । हि = यतः, मानिनः = मानवन्तः, साहङ्काराः, सदा = नित्यम् , अभिमानैकधनाः = अभिमानसर्वस्वाः।

**श्लोकार्थः** – मानवेतरम् , अजन्मा तथा च मनोः वंशे प्रादुर्भूतं प्रभावयुक्तम् आत्मनः भाविनं विनाशकं ज्ञात्वा अपि सः रावणः जानकीं न अमुञ्चत् । यतो हि मानिनः सदा अभिमानैकधनाः भवन्ति।

**भावार्थः** – यद्यपि श्रीरामः अमानवः अजन्मा तथापि आसुरप्रवृत्तिं संहर्तुं मनुवंशे मानवावतारं स्व्यकरोत् । तस्मात् अयं मम भाविविनाशकः इति रावणः जानाति स्म। एवं सत्यपि अभिमानेन सः अपहृतां सीतां नैव अत्यजत् । यतः अभिमानिनः मानमेव एकं धनं मन्वते। प्राणान् परित्यज्यापि आत्मनः अभिमानम् अहङ्कारं वा ते रक्षन्तीति भावः।

**विशेषः** – अत्र रावणः अभिमानी आसीदिति प्रतिपादितम् । अभिमानरक्षणाय सः स्वकीयप्राणान् अपि परित्यक्तवान् । अहङ्कारपूर्णपुरुषस्य स्वभावोऽयम् । यतो हि मानं हि महतां धनम् । मृत्यावपि प्राप्ते मानं न त्यजन्ति अभिमानिनः।

समासः – अमानवम् – न मानवः तम् – नञ् तत्पुरुषसमासः।

अभिमानैकधनाः – अभिमान एव एकं धनं येषां ते – बहुव्रीहिसमासः।

प्रभाविनम् – प्रभावः अस्य अस्तीति तम् – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. जानकीं कः न मुमोच?

२. मनोः कुले कस्य जन्म अभवत् ?

३. मानिनः किं धनम्?

### ११.३.२. रावणवधः

रामावतारे भवता रावणवधः कृतः इति नारदः श्रीकृष्णं संस्मारयति। इदमेव वर्णनम् अधोलिखिते श्लोके अस्माभिः अवलोक्यते।

**स्मरत्यदो दाशरथिर्भवन् भवानमुं वनान्ताद् वनितापहारिणम् ।**
**पयोधिमाबद्धचलज्जलाविलं विलङ्घ्य लङ्कां निकषा हनिष्यति।। ६८।।**

**अन्वयः** – भवान् दाशरथिः भवन् वनान्तात् वनितापहारिणम् अमुम् आबद्धचलज्जलाविलं पयोधिं विलङ्घ्य लङ्कां निकषा हनिष्यति अदः स्मरति किम्?

**प्रतिपदार्थः** – भवान् = त्वम्, दाशरथिः = दशरथस्य अपत्यं रामः, भवन् =भूत्वा वनान्तात् = दण्डकारण्यात् , वनितापहारिणम् = सीतापहर्तारम् , अमुम् = रावणम्, आबद्धचलज्जलाविलम् = बद्धसेतुत्वात् चञ्चलजलकलुषम् , पयोधिम् = सागरम्, विलङ्घ्य = उल्लङ्घ्य, समुत्तीर्य, लङ्कां निकषा = लङ्कायाः समीपे, हनिष्यति = अवधीत्, अदः= एतत्, रावणहननम् , स्मरति = अभिजानाति।

**श्लोकार्थः** – भवान् दशरथपुत्ररामः भूत्वा दण्डकारण्यात् सीतापहरणकर्तारम् एतं रावणं सेतुबन्धनात् चञ्चलं तथा च कलुषितं जलयुक्तसमुद्रम् उल्लङ्घ्य लङ्कायाः समीपे हतवान् इति स्मरति किम्?

भावार्थः – श्रीरामेण दुर्दान्तः रावणः हतः इति भावार्थः।

**विशेषः** – विवाहोत्तरं महाराजः दशरथः रामचन्द्रस्य राज्याभिषेकं कर्तुमिष्टवान् । किन्तु कैकेय्याः इच्छया चतुर्दशवर्षयावत् वनवासार्थं श्रीरामेण गतम् । वनवासे एव रावणः सीतायाः अपहरणम् अकरोत् । ततः सुग्रीवमैत्रत्वं प्राप्य वानरसेनासाहाय्येन रामः समुद्रे सेतुनिर्माणं कृतवान् । तेन सेतुमार्गेण सः समुद्रपारं कर्तुं समर्थः जातः। समुद्रम् उत्तीर्य लङ्कां प्राप्य दाशरथिना लङ्काधिपतिः रावणः हतः। इत्थं वाल्मीकिरामायणे उल्लिखितमस्ति।

समासः – वनितापहारिणम् – वनिताम् अपहरति इति वनितापहारी,

तम् – उपपदतत्पुरुषसमासः।

पयोधिम् – पयांसि धीयन्ते अस्मिन्निति पयोधिः तम् – उपपदतत्पुरुषसमासः।

वनान्तात् – वनस्य अन्तात् – षष्ठीतत्पुरुषसमासः।

**स्वावोलकनप्रश्नाः**

१. रावणं कः हतवान्?

२. सीता कुतः अपहृता?

३. रावणवधः कुत्र अभवत्?

## ११.४. उपसंहारः

भयभीतदेवानां दुरावस्था अस्माभिः अस्मिन् एकादशखण्डे ज्ञायते। रावणपीडनात् देवैः निष्प्रभत्वमापादितम् ।स्वकर्तव्यात् च्युताः सन्तः ते रावणसेवाम् आरब्धवन्तः ।इत्थं देवानां दयनीयस्थितिः अभवदिति अस्मात् खण्डात् अवगन्तुं शक्यते। श्रीरामः मदीयहननकर्तेति ज्ञात्वा अपि रावणः सीतामपहरति इत्यनेन तस्य शौर्यप्रियता अनुभूयते। अहङ्काररक्षणाय स्वकीयप्राणान् परित्यक्तुमपि उद्युक्तः रावणः

कश्चित् वीरएव प्रतिभाति। तस्य दुर्व्यवहारातिरेकत्वादेव रामावतारस्य आवश्यकतां देवर्षिनारदः अत्र प्रबोधयति। अनेन खण्डप्रतिपादनेन ज्ञायते यत् दुर्जननाशस्तु ध्रुवः एव इति। तस्मात् खलत्वं त्यक्त्वा सज्जनत्वं प्रति छात्राः प्रेरिताः भवन्ति।

**११.५. प्रश्नाः**

१. भयभीतदेवानां दुःस्थितिं वर्णयत।

२. रामावतारप्रयोजनं कथयत।

३. दिग्गजानां नामसार्थक्यं महाकविना कथं प्रतिपादितम्?

**द्वादशः खण्डः**

# *शिशुपालस्वरूपम्*

**संरचना**

१२.०. प्रस्तावना

१२.१. लक्षिताधिगमांशाः

१२.२. शिशुपालस्वरूपम्

१२.२.१. शिशुपालरूपेण रावणस्य पुनर्जन्म

१२.२.२. शिशुपालस्य सर्वदेवमयत्वम्

१२.२.३. शिशुपालस्य देवताप्रसादाभावेऽपि अद्वितीयपराक्रमः

१२.२.४. शिशुपालस्य संसारपीडकत्वम्

१२.३. उपसंहारः

१२.४. प्रश्नाः

## १२.०. प्रस्तावना

शिशुपालवधमहाकाव्यस्य प्रथमसर्गे महाकविमाघेन 'शिशुपालस्वरूपम्' उद्बोधितम्। पाठ्यांशरूपेण निर्धारितोऽयमंशः नवषष्टिश्लोकतः द्विसप्ततिश्लोकयावत् समुपवर्णितः। तत्र हि शिशुपालरूपेण रावणस्य पुनर्जन्म, तस्य सर्वदेवमयत्वम्, देवताप्रसादाभावेऽपि अद्वितीयपराक्रमत्वम् तथा च संसारपीडकत्वमित्यादयः विषयाः प्रकथिताः। इमे विषयाः सम्प्रत्यस्माभिः अत्र सविस्तरं निरूप्यन्ते।

## १२.१. लक्षिताधिगमांशाः

* छात्रः शिशुपालस्वरूपमवगन्तुं प्रभवति।
* जगत्पीडनार्थं दुष्टाः वारं वारं जन्म प्राप्नुवन्तीति अवगच्छति।
* पूर्वजन्मनः गुणानां वा दुर्गुणां वा प्रभावः पुनर्जन्मनि अपि सन्दृश्यते इत्यभिजानाति।
* दुर्जनाः सदा बलशालिनः एव भवन्तीति ज्ञातुं छात्रः समर्थः भवति।
* देवर्षिः प्रधानविषयोपस्थापमत्र कृतवानिति बोधमाप्नोति।
* दुष्टाः आत्मस्वरूपं गोपयित्वा संसारेऽस्मिन् तिष्ठन्तीति जानाति।

## १२.२. शिशुपालस्वरूपम्

देवर्षिनारदः शिशुपालस्य दौर्जन्यं प्रतिपादयितुं मूलस्वरूपं कथयति। यतो हि शिशुपालस्यविषये श्रीकृष्णस्य मनसि क्रोधः समुत्पन्नःभवेदित्येव नारदस्य उद्दिष्टम्। स्वकीयहेतुपरिपूरणाय शिशुपालस्वरूपनिवेदनं प्रस्तुतश्लोकैः अकरोत् सः।

### १२.२.१. शिशुपालरूपेण रावणस्य पुनर्जन्म

रावणशरीरत्यागानन्तरम् तस्य नूतनजन्म अभवत्। अद्य सः शिशुपालनाम्ना धरणीतले जीवति इति नारदमुनिः प्रस्तुतपद्येन श्रीकृष्णं प्रतिपादयति।

**अथोपपत्तिं छलनापरोऽपरामवाप्य शैलूष इवैष भूमिकाम् ।**
**तिरोहितात्मा शिशुपालसंज्ञया प्रतीयते सम्प्रति सोऽप्यसः परैः।।६९।।**

**अन्वयः** – अथ सम्प्रति छलनापरः एषः शैलूषः भूमिकाम् इव अपराम् उपपत्तिम् अवाप्य शिशुपालसंज्ञया तिरोहितात्मा (सन्) सः अपि परैः असः प्रतीयते।

**प्रतिपदार्थः** – अथ = रावणदेहत्यागानन्तरम्, सम्प्रति = इदानीम्, छलनापरः = वञ्चनाप्रधानः, एषः = रावणः, शैलूषः = नटः, भूमिकामिव = रूपान्तरमिव, पात्रान्तरमिव, अपराम् = अन्याम्, उपपत्तिम् = जन्म, रूपम्, अवाप्य = गृहीत्वा, शिशुपालसंज्ञया = शिशुपालनाम्ना, तिरोहितात्मा= प्रच्छादितात्मा, आत्मस्वरूपगोपनम्, स एव =रावणः एव, सन्नपि, परैः = अन्यैः लोकैः, असः = तद्भिन्नः एव, प्रतीयते = ज्ञायते।

**श्लोकार्थः** – रावणदेहत्यागानन्तरं परवञ्चनाप्रधानः एषः रावणः नटः इव अपरं जन्म प्राप्य शिशुपालनाम्ना प्रच्छादितात्मा सः एव रावणः सन्नपि सम्प्रति परैः तद्भिन्नः एव प्रतीयते।

**भावार्थः** – यथा नटः एकां भूमिकां परित्यज्य अन्यां भूमिकां समाश्रयन् वास्तविकम् आत्मस्वरूपं गोपयति। तथैव अयं रावणोऽपि रावणजन्म त्यक्त्वा अपरं जन्म अवाप्य शिशुपालनाम्ना अस्मिन् पृथिवीतले वर्तते। यद्यपि सः एव रावणः तथापि जन्मातरेण

जनाः तद्भिन्नः एव चिन्तयन्ति। रावणः एव शिशुपालरूपेण अवतीर्ण इति। केवलं देहपरिवर्तनात् अन्यः भाति। परं दौर्जन्यं तु तथैव तिष्ठतीति भावः।

**विशेषः** – शिशुपालः – रावणस्यैव पुनर्जन्म इति नटदृष्टान्तेन अत्र प्रोक्तम् । उपमालङ्कारः पद्येऽस्मिन् वर्तते।

समासः – तिरोहितात्मा – तिरोहितः आत्मा यस्य – कर्मधारयसमासः।

छलनापरः – छलनायां परः – तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. नटः इव भूमिकापरिवर्तनं कः अकरोत्?

२. पुनर्जन्मनि रावणः केन नाम्ना आत्मस्वरूपं गोपयति?

## १२.२.२.शिशुपालस्य सर्वदेवमयत्वम्

देवर्षिनारदः श्रीकृष्णं शिशुपालस्वरूपं बोधयितुं प्रस्तुतपद्यम् उपस्थापयति।

**स बाल आसीद् वपुसा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः।**
**युवा कराक्रान्तमहीभृदुच्चकैरसंशयं सम्प्रति तेजसा रविः।।७०।।**

**अन्वयः** – सः बालः सन् वपुषा चतुर्भुज आसीत् , मुखेन पूर्णेन्दुनिभः (आसीत्) त्रिलोचनः (आसीत्) सम्प्रति युवा सः कराक्रान्तमहीभृत् उच्चकैः तेजसा असंशयं रविः (अस्ति)।

**प्रतिपदार्थः** – सः = शिशुपालः, बालः सन् = शिशुरेव, बाल्यावस्थायाम् , वपुषा = शरीरेण, चतुर्भुजः = भुजचतुष्टयवान् , मुखेन = आननेन, पूर्णेन्दुनिभः = पूर्णचन्द्रसदृशः, त्रिलोचनः = त्रिनेत्रः, सम्प्रति = इदानीम् , युवा =तरुणःसन् , सः =शिशुपालः, कराक्रान्तमहीभृत् = करदीकृतभूपालः, उच्चकैः =अतिमहता, तेजसा =प्रतापेन, असंशयम् = निश्चितम् ,ध्रुवम् , रविः =सूर्य एव।

**श्लोकार्थः** – सः शिशुपालः बाल्यावस्थायां शरीरेण चतुर्भुजः (विष्णुसदृशः) मुखेन

पूर्णचन्द्रसदृशः त्रिनेत्रः (शिवसदृशः) आसीत् । इदानीं तारुण्यावस्थायां सः करग्रहणद्वारा अन्यमहाराजान् वशीकुर्वन् स्वकीयेन अत्यधिकेन तेजसा निःसन्देहं सूर्यः अस्ति।

**भावार्थः** – शिशुपालः बाल्ये वयसि विष्णुसदृशः चतुर्भुजः, शिवसदृशः पूर्णचन्द्रः इव कान्तिसम्पन्नः त्रिलोचनश्चासीत् । तथैव अधुना युवा सः निजतेजसा सूर्यः एव। यतो हि सूर्यः यथा किरणैः पर्वतान् आक्रामते तथा अयमपि करग्रहणैः महाराजान् वशीकुर्वन् अस्ति। तात्पर्यं बाल्ये विष्णुः, शिवश्चाधुना तेजसा सूर्यः प्रतीयते शिशुपालः। एवं हरिहरादितुल्यमहिमत्वात् अतीव दुर्धर्षः सः इति भावः।

विशेषः – अत्र शिशुपालस्य सर्वदेवमयत्वम् उक्तम् । तथैव तेजसा इत्यनेन तस्य रविस्वरूपेण उत्प्रेक्षालङ्कारः तथा च कराक्रान्तः इत्यादिना श्लेषालङ्कारः प्रदर्शितः। अपि च 'पूर्णेन्दुनिभः' इति उपमालङ्कारः। अतः तिलतण्डुलन्यायेन संसृष्टिः अलङ्कारः अत्र।

शिशुपालस्य जन्मविषयिकी कथा महाभारते समुपलभ्यते। तदनुसारं शिशुपालस्य माता कुन्तिभोजपुत्री सात्वती इति श्रीकृष्णस्य पितृभगिनी आसीत् । जन्मसमये सः चतुर्भुजः त्रिनेत्रश्चेति। एतादृशं पुत्रं दृष्ट्वा भयभीता सात्वती तस्य त्यागं कर्तुमिष्टवती। परं त्यागार्थं गच्छन्त्या तया आकाशवाणी श्रुता। 'अयं बालः बलवान् राजा भविष्यति। यस्य अङ्के अयम् उपविष्टस्सन् भुजद्वयं तृतीयनेत्रञ्च अदृश्यं भवेत् सः एव अस्य संहारकर्ता' इति। ताम् आकाशवाणीम् आकर्ण्य यः कोऽपि शिशुं द्रष्टुम् आगच्छति तस्य अङ्के सा शिशुपालं स्थापयति स्म। कदाचित् श्रीकृष्णे आगते सति तं बालकं सात्वती तस्य अङ्के अस्थापयत् । तस्मात् शिशोः भुजद्वयं तृतीयनेत्रं च अदृश्यतां गते। अयमेव अस्य विनाशकः इति सात्वत्या अवगतम् । तस्मात् 'अयं भवतः भ्राता अतः अस्य अपराधाः क्षन्तव्याः' इति सा श्रीकृष्णं न्यवेदयत् । तस्याः प्रार्थनाम् अङ्गीकृत्य श्रीकृष्णः शतम् अपराधाः क्षम्याः अस्येति निश्चितवान् ।

समासः – चतुर्भुजः – चत्वारः भुजा यस्य सः – बहुव्रीहिसमासः।

कराक्रान्तमहिभृत् – करैः आक्रान्ता महीभृतः येन सः – बहुव्रीहिसमासः।

असंशयम् – अविद्यामानः संशयः यस्मिन् तत् – बहुव्रीहिसमासः।

त्रिलोचनः – त्रीणि लोचनानि यस्य सः – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. कः चतुर्भुजः त्रिनेत्रश्चासीत्?

२. कः निश्चयेन तेजसा रविः विद्यते?

## १२.२.३.शिशुपालस्य देवताप्रसादाभावेऽपि अद्वितीयपराक्रमः

शिशुपालः जन्मतः एव अद्वितीयपराक्रमशीलः इति नारदमुखात् श्रीकृष्णः शृणोति। प्रस्तुतश्लोकेन महाकविमाघः नारदवचनं ज्ञापयति।

**स्वयं विधाता सुरदैत्यरक्षसामनुग्रहावग्रहयोर्यदृच्छया।**
**दशाननादीनभिराद्धदेवतावितीर्णवीर्यातिशयान् हसत्यसौ।। ७१।।**

**अन्वयः** – यदृच्छया स्वयं सुरदैत्यरक्षसाम् अनुग्रहावग्रहयोः विधाता असौ अभिराद्धदेवतावितीर्णवीर्यातिशयान् दशाननादीन् हसति।

**प्रतिपदार्थः** – यदृच्छया = स्वेच्छया, स्वयम् = आत्मना एव, सुरदैत्यरक्षसाम् = देवदानवराक्षसानाम्, अनुग्रहावग्रहयोः = प्रसाददण्डयोः, विधाता = विधायकः, कर्ता, असौ = शिशुपालः, अभिराद्धदेवतावितीर्णवीर्यातिशयान् = अर्चितदेवतादत्तपराक्रमातिशयान् , दशाननादीन् = रावणहिरण्यकशिप्वादीन् , हसति = उपहसति।

**श्लोकार्थः** – स्वेच्छया स्वयं देवदानवराक्षसानां प्रसाददण्डयोः कर्ता अयं शिशुपालः देवतानाम् अर्चनया प्राप्तप्रसादान् पराक्रमातिशयान् रावणहिरण्यकशिप्वादीन् उपहसति ।

**भावार्थः** – रावणः हिरण्यकशिपुश्च देवताराधनया वरदानं प्राप्य पराक्रमातिशायिनः सञ्जाताः। अतः शिशुपालः तान् उपहसति स्म। यतो हि सः तु देवताप्रसादाभावेऽपि अद्वितीयपराक्रमशीलः आसीत् । तस्मात् स्वेच्छया निजसामर्थ्येन एव

देवदानवराक्षसानां कृपावकृपयोः विधाता अभवत् । अनन्यप्रसादात् लब्धपराक्रमैश्वर्ये मयि तैः याचकैः सह कथं साम्यमिति सः अमन्यत। तेन हि मदोन्मत्तः शिशुपालः तान् उपहसति स्म इति भावः।

**विशेषः** –शिशुपालस्य पराक्रमातिशायित्वं स्वयमेव आसीत् न तु देवताप्रसादबलात् इति ज्ञायते।

अत्र सुरदैत्यराक्षसाः इति योनित्रयमित्युल्लिखितम् । तत्र यद्यपि त्रयः कश्यपमुनेः एव अपत्यानि तथापि मातृभिन्नत्वं तेषु विद्यते। दक्षस्य पुत्रीत्रयम् – अदितिः दितिः खशा चेति। एताः तिस्रः एव तेषां मातृत्वं निर्वहन्ति।

सुराः – अदितिकश्यपयोः अपत्यानि।

दैत्याः – दितिकश्यपयोः पुत्राः।

राक्षसाः – खशाकश्यपयोः सुताः।

समासः – सुरदैत्यरक्षसाम् – सुराश्च दैत्याश्च रक्षांसि चेति सुरदैत्यरक्षांसि तेषाम् – द्वन्द्वसमासः।

अभिराद्धदेवतावितीर्णवीर्यातिशयान् – अभिराद्धाभिः देवताभिः वितीर्णः वीर्यातिशयः येषां येभ्यः वा तान् – बहुव्रीहिसमासः।

अनुग्रहावग्रहयोः – अनुग्रहश्च अवग्रहश्च अनुग्रहावग्रहौ तयोः – द्वन्द्वसमासः।

**स्वावलोकनप्रश्नाः**

१. शिशुपालः केषां विधाता?

२. शिशुपालः कान् उपहसति?

## १२.२.४. शिशुपालस्य संसारपीडकत्वम्

शिशुपालः अत्याचारं कुर्वन् जगत् – उत्पीडयन् अस्तीति देवर्षिनारदः श्रीकृष्णं प्रस्तुतश्लोकेन सूचयति।

**बलाबलेपादधुनाऽपि पूर्ववत् प्रबाध्यते तेन जगज्जिगीषुणा।**
**सतीव योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि।।७२।।**

**अन्वयः** – जिगीषुणा तेन बलावलेपात् अधुना अपि पूर्ववत् जगत् प्रबाध्यते। सती योषित् इव सुनिश्चला प्रकृतिः भवान्तरेषु अपि पुमांसम् अभ्येति।

**प्रतिपदार्थः** – जिगीषुणा = विजयेच्छुना, जयशीलेन, तेन = शिशुपालेन, अधुना = इदानीम् , बलावलेपात् = बलदर्पात् , जगत् = भुवनम् , प्रबाध्यते =प्रपीड्यते, सती = पतिव्रता, योषिदिव = नारीव, सुनिश्चला = ध्रुवा, स्थिरतरा, प्रकृतिः = स्वभावः, भवान्तरेषु =जन्मान्तरेषु, पुमांसम् = पुरुषम् , अभ्येति = प्राप्नोति।

**श्लोकार्थः** – विजयेच्छुना तेन बलदर्पात् इदानीमपि पूर्ववत् जगत् पीड्यते। यथा पतिव्रता नारी इव सुनिश्चला प्रकृतिः जन्मान्तरेऽपि तमेव पुरुषं प्राप्नोति।

**भावार्थः** – रावणः पुनर्जन्म अवाप्य शिशुपालरूपेण अधुना जगति तिष्ठति। तस्य बलगर्वात् जगत् विजयेच्छुकः सः इहलोकम् उत्पीडयन् अस्ति। पूर्वजन्मनि अपि रावणरूपेण तेन एवमेव जगत् त्रस्तं कृतम् । अस्मिन् जन्मनि अपि पूर्वतनं लोकप्रपीडकस्वभावं सः न अत्यजत् । यथा पतिव्रता नारी जन्मान्तरेऽपि तमेव पुरुषं भर्तारूपेण प्राप्नोति। पतिपरायणा स्त्री मनसा वचसा शरीरेण च परपुरुषं स्वप्नेऽपि नैव इच्छति। पातिव्रत्यधर्मं पालयन्ती सा अग्रिमे जन्मनि तस्य पत्युः अनुगमनं करोति। अपि च पूर्वसंस्कारवशात् तमेव पुरुषं पुनः आप्नोति। तस्याः स्थिरः स्वभावः तत्र पत्युः पुनर्प्राप्त्यर्थं हेतुः वर्तते। तथैव शिशुपालस्य पूर्वतनीया प्रकृतिः वा पूर्वतनः स्वभावः तथैव स्थिररूपेण तिष्ठति। अस्मिन् जन्मनि अपि सा सुनिश्चला प्रकृतिः तं नैव पर्यत्यजत्। पतिव्रता इव सा अपि पुनः भर्तारूपेण शिशुपालम् अवृणोत् ।

**विशेषः** –‘ स्वभावो दुरतिक्रमः ’इति भणितिः शिशुपालस्य विषये सत्यम् अभवत् । पद्येऽस्मिन् अर्थान्तरन्यासः अलङ्कारोऽस्ति।

समासः – बलावलेपात् – बलस्य अवलेपात् –षष्ठीतत्पुरुषसमासः।

भवान्तरेषु – अन्येषु भवेषु – कर्मधारयसमासः।

सुनिश्चला – सुष्ठु निश्चला – तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. जगत् पूर्ववत् केन प्रबाध्यते?

२. का भवान्तरेषु अपि पुमांसम् अभ्येति?

## १२.३. उपसंहारः

'शिशुपालस्वरूपावगमनम्' अनेन द्वादशतमेन खण्डेन सम्भवति। शिशुपालः एव गतजन्मनि रावण आसीदिति इतः अवगम्यते। देवतानां कृपाप्रसादाभावेऽपि तस्य अद्वितीयपराक्रमः सर्वान् विस्मितं करोति। बाल्यकाले तस्य विकृतं रूपमासीदिति भविष्यत्कालस्य अस्वाभाविकव्यवहारसूचकम् । अयं संसारपीडकः शिशुपालः निश्चयेन हननयोग्य इति छात्रः अवगच्छति। तथैवदुर्जनस्वरूपमवगन्तुं सामर्थ्यम् अस्मात् खण्डात् प्राप्यते।

## १२.४. प्रश्नाः

१.शिशुपालस्य सर्वदेवमयत्वंमहाकविमाघेन कथं विवेचितम्?

२.शिशुपालस्वरूपं स्वशब्दैः प्रतिपादयत।

## त्रयोदशः खण्डः
## *इन्द्रसन्देशकथनम्*

**संरचना**

१३.०. प्रस्तावना

१३.१. लक्षिताधिगमांशाः

१३.२. इन्द्रसन्देशकथनम्

१३.२.१. शिशुपालवधसूचना

१३.२.२. दुष्टनिग्रहे शिष्टानुग्रहोऽपि स्यात्

१३.२.३. शिशुपालवधनिश्चयः

१३.३. उपसंहारः

१३.४. प्रश्नाः

### १३.०. प्रस्तावना

अस्मिन् त्रयोदशे खण्डे 'इन्द्रसन्देशकथनम्' इति पाठ्यांशः समुपवर्णितः। त्रिसप्ततितमश्लोकतः पञ्चसप्ततिश्लोकं यावत् अंशोऽयं महाकविना शिशुपालवधमहाकाव्यस्य प्रथमसर्गे उल्लेखितः। अत्र हि शिशुपालवधसूचना, दुष्टनिग्रहे शिष्टानुग्रहः तथा च श्रीकृष्णस्य शिशुपालवधनिश्चय इत्यादयः विषयाः बोध्यन्ते। अनेन खण्डेन प्रथमसर्गस्य समाप्तिः सूचिता। प्रथमसर्गस्य मुख्यमुद्दिष्टं पूर्णतां गतमत्र।

### १३.१. लक्षिताधिगमांशाः

* नारदागमनप्रयोजनपूर्तता अभवदिति छात्रः अवगच्छति।
* महाकाव्यस्य मुख्यांद्देशस्य ज्ञानं प्राप्नोति।
* दुष्टनिग्रहेण शिष्टानुग्रहः सम्भवति  इत्यवगच्छति।
* नारदमाध्यमेन इन्द्रप्रार्थना श्रीकृष्णेन अङ्गीकृतेति ज्ञातुं प्रभवति।
* सर्गान्ते वृत्तभिन्नत्वंमहाकाव्यलक्षणं प्रदर्शयतीति तस्य बोधः भवति।

## १३.२. इन्द्रसन्देशकथनम्

'श्रीकृष्णेन शिशुपालवधः विधातव्यः' इति इन्द्रसन्देश आसीत्। यतो हि शिशुपालस्य संसारपीडनत्वम् इन्द्रस्य अस्वास्थ्यम् अजनयत्। सः स्वयं तस्य प्रतिकारं कर्तुमक्षमः इत्यस्मात् नारदमाध्येन श्रीकृष्णं सः न्यवेदयत्। अपि च श्रीकृष्णोऽपि तदर्थं सिद्ध इत्यत्र विविच्यते। तस्य प्रार्थनाम् अङ्गीकृतवान्।

### १३.२.१. शिशुपालवधसूचना

लोकपीडकः शिशुपालः यमसदनं प्रेषयितुं नारदमुनिः श्रीकृष्णं सूचयति। प्रस्तुतश्लोकः शिशुपालवधसूचकः वर्तते।

**तदेनमुल्लङ्घितशासनं विधेर्विधेहि कीनाशनिकेतनातिथिम् ।**
**शुभेतराचारविपक्त्रिमापदो निपातनीया हि सतामसाधवः।।७३।।**

**अन्वयः** – तत् विधेः उल्लङ्घितशासनम् एनं कीनाशनिकेतनातिथिं विधेहि, हि शुभेतराचारविपक्त्रिमापदः असाधवः सतां निपातनीयाः।

**प्रतिपदार्थः** – तत् = तस्मात् कारणात् , विधेः = विधातुः, ब्रह्मणः, उल्लङ्घितशासनम् =अतिक्रान्ताज्ञम् , एनम् = शिशुपालम् , कीनाशनिकेतनातिथिं = यमगृहस्य अतिथिम्, विधेहि =कुरु, शुभेतराचारविपक्त्रिमापदः = दुराचारेण परिपाकेन निवृत्ताः विपदः, असाधवः = दुर्जनाः, दुष्टाः, सतां = सज्जनानाम् , निपातनीयाः = मारणीयाः, वध्याः, तम् = शिशुपालम् ,कीनाशः = यमदेवः, निकेतनम् = गृहम् , शुभेतरः = अमङ्गलः, पापम् ।

**श्लोकार्थः** – तस्मात् कारणात् ब्रह्मणः आज्ञायाः उल्लङ्घनकर्तारम् एनं शिशुपालं यमगृहस्य अतिथिं करोतु। अर्थात् तस्य वधं कृत्वा यमसदनं प्रेषयतु। यतो हि निरन्तरं दुराचारं कृत्वा कृत्वा परिप्राप्तविपत्तयः दुर्जनाः, सज्जनैः वध्याः भवन्ति।

**भावार्थः** – शिशुपालः ब्रह्मसृष्टेः नियमानाम् इत्युक्ते ब्रह्मदेवस्य आज्ञायाः उल्लङ्घनं करोति। निजसामर्थ्येन सुरदैत्यराक्षसां प्रसाददण्डयोः स्वेच्छया निर्णयं विधाय स्वयं भाग्यविधाता अभवत् सः। एवं लोकसन्तापकारकं शिशुपालं भवान् यमसदनस्य

अतिथिं करोतु। अर्थात् तस्य वधं विदधातु। यतो हि निरन्तरं दुराचारं कृत्वा कृत्वा प्राप्तविपदः दुष्टाः सज्जनैः मारणीयाः। तात्पर्यं पापाचरणकर्तॄणां पापकर्मभिः ते स्वयमेव विपद्ग्रस्ताः तस्मात् तेषां वधस्तु दुष्कृत्यसमूहैः एव निर्धारितः। सज्जनाः केवलं तत्र निमित्तकारणं भवन्ति। दुष्टहननं न कदापि पापाय अपि तु लोकरक्षणाय। अतः सा क्रिया सत्क्रियारूपेण परिवर्तते। शिशुपालवधकर्ता न भवान् प्रत्युत तस्य पापकर्माणि तेन हि तस्य हननं भवता एव कर्तव्यमिति भावः।

**विशेषः** – 'शिशुपालवधः श्रीकृष्णेन कर्तव्यः' इति प्रार्थना नारदेन श्लोकेऽस्मिन् कृता। अपि च दुष्टानां संहारकर्तारः ते स्वयमेव, नान्ये इत्यपि अत्र सूचितम् । अर्थान्तरन्यासः अलङ्कारः पद्येऽस्मिन् दृश्यते। अन्तिमचरणं सुभाषितरूपेण गहनार्थं ज्ञापयति।

समासः – उल्लङ्घितशासनम् – उल्लङ्घितं शासनं येन सः उल्लङ्घितशासनः तम् – बहुव्रीहिसमासः।

असाधवः – न साधवः – नञ् तत्पुरुषसमासः।

कीनाशनिकेतनातिथिम् – कीनाशस्य निकेतनस्य अतिथिम् – तत्पुरुषसमासः।

शुभेतराचारविपक्त्रिमापदः – शुभात् इतर शुभेतरः, शुभेतरश्चासौ आचारः शुभेतराचारः – तत्पुरुषसमासः। विपाकेन निवृत्ताः विपक्त्रिमाः मध्यमपदलोपीसमासः। शुभेतराचारेण विपक्त्रिमाः आपदः येषां ते – बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. असाधवः कैः मारणीयाः?

२. यमसदनस्य अतिथिः कः भविष्यति?

### १३.२.२. दुष्टनिग्रहे शिष्टानुग्रहोऽपि स्यात्

शिशुपालवधाय श्रीकृष्णं प्रार्थयित्वा दुष्टनिग्रहे शिष्टानुग्रहोऽपि भवेदिति नारदमुनिः श्लोकेऽस्मिन् कथयति।

**हृदयमरिवधोदयादुदूढद्रढिम दधातु पुनः पुरन्दरस्य।**
**घनपुलकपुलोमजाकुचाग्रद्रुतपरिरम्भनिपीडनक्षमत्वम् ।। ७४।।**

**अन्वयः** - अरिवधोदयात् उदूढद्रढिम पुरन्दरस्य हृदयं पुनः घनपुलकपुलोमजाकुचाग्रद्रुतपरिरम्भनिपीडनक्षमत्वं दधातु।

**प्रतिपदार्थः** - अरिवधोदयात् =शत्रुविनाशलाभात् , उदूढद्रढिम =धृतदार्ढ्यम् , प्राप्तस्वास्थ्यम् , पुरन्दरस्य = इन्द्रस्य, हृदयं =वक्षस्थलम्, दधातु =धारयतु, घनपुलकपुलोमजाकुचाग्रद्रुतपरिरम्भनिपीडनक्षमत्वम् = निबिडरोमाञ्चयोः शचिकुचाग्रयोः औत्सुक्यात् शीघ्रालिङ्गनेन यत्पीडनं तस्य सामर्थ्यम् । घनः = सान्द्रः, निबिडः, पुलकः = रोमाञ्चः, पुलोमजा = इन्द्रपत्नी शची, द्रुतम् = शीघ्रम् , परिरम्भः = आलिङ्गनम् , कुचाग्रः = स्तनाग्रभागः। क्षमत्वम् = सहनत्वम् , सामर्थ्यम् ।

**श्लोकार्थः** – शत्रोः शिशुपालस्य वधात् प्राप्तदृढत्वम् इन्द्रहृदयम् अत्यन्तरोमाञ्चपूर्णयोः इन्द्राण्याः स्तनाग्रयोः शीघ्रालिङ्गनेन पीडनार्थं पुनः सामर्थ्यं प्राप्नोतु।

**भावार्थः** – शिशुपालकृतेन उत्पीडनेन इन्द्रः भयभीतः आसीत् । तस्मात् अशान्तहृदयः सः राज्यसुखोपभोगत्यागम् अकरोत् । शिशुपालवधेन इन्द्रस्य हृदयस्वास्थ्यं भवेत्। श्रीकृष्णस्य कृपाप्रसादात् सः निष्कण्टकं स्वकीयं राज्यम् अनुभोक्तुं समर्थः भवेदिति भावः। तथैव शिशुपालनिग्रहेण दुष्टनाशः, इन्द्रस्योपरि अनुग्रहेण शिष्टानुग्रह च सम्भवेदित्यर्थः।

**विशेषः** - दुष्टनिग्रहेण शिष्टानुग्रहं विधाय सज्जनकर्तव्यं परिपालनीयम् इति बोधः अस्मात् श्लोकात् प्राप्यते। अत्र अतिशयोक्तिः अलङ्कारः पुष्पिताग्रा वृत्तञ्च परिलक्ष्यते।

समासः - अरिवधोदयात् - अरिवधस्य उदयात् - षष्ठीतत्पुरुषसमासः।

उदूढद्रढिम - उदूढः द्रढिमा येन तत् - बहुव्रीहिसमासः।

पुरन्दरः – पुराणि दारयतीति – उपपदतत्पुरुषसमासः।

घनपुलकपुलोमजाकुचाग्रद्रुतपरिनिपीडनक्षमत्वम् – घनपुलकौ पुलोमजायाः कुचाग्रौ तयोः द्रुतं यः परिरम्भः तेन यन्निपीडनं तस्य क्षमत्वम् – षष्ठीतत्पुरुषसमासः।

| |
|---|
| **स्वावलोकनप्रश्नाः** |
| १. इन्द्रस्य हृदयं कस्मात् द्रढीभवेत्? |
| २. पुरन्दरः इति कस्य सम्बोधनम्? |

**१३.२.३. शिशुपालवधनिश्चयः**

नारदमुनिः इन्द्रसन्देशम् उक्त्वा स्वर्गं प्रति प्रस्थितः।ततः श्रीकृष्णः शिशुपालवृत्तान्तं श्रुत्वा क्रोधान्वितः। तस्य क्रोधजन्यमुखेन शिशुपालवधनिश्चयः बोधितः इति प्रस्तुते श्लोके महाकविमाघः वर्णयति।

**ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभ-**
**स्तस्मिन्नुत्पतिते पुरः सुरमुनाविन्दोः श्रियं बिभ्रति।**
**शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैद्यं प्रति,**
**व्योम्नीव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदम् ।।७५।।**

**अन्वयः** – तस्मिन् सुरमुनौ इति वाचं व्याहृत्य नभः उत्पतिते पुरः इन्दोः श्रियं बिभ्रति (सति) अथ ओम् इति उक्तवतः चैद्यं प्रति क्रुद्धस्य शार्ङ्गिणः वदने व्योम्नीव अनिशं शत्रूणां विनाशपिशुनः केतुः भ्रुकुटिच्छलेन आस्पदं चकार।

**प्रतिपदार्थः** – तस्मिन् = पूर्वोक्ते, सुरमुनौ = देवर्षौ, नारदे, वाचं = वाणीम् , वचनम्, व्याहृत्य =अभिधाय, उक्त्वा, नभः = आकाशम् , उत्पतिते = समुद्गते, पुरः = अग्रे, इन्दोः = चन्द्रस्य , श्रियम्= शोभाम्, बिभ्रति = धारयति, अथ= इन्द्रसन्देशश्रवणानन्तरम्, ओम्= तथाऽस्तु, इति = इत्थम् , उक्तवतः = कथितवतः, चैद्यं प्रति= चेदिदेशाधिपतिं प्रति, शिशुपालं प्रति, क्रुद्धस्य =कुपितस्य, मतिं कर्तुम् =इच्छां विधातुम् , शार्ङ्गिणः = श्रीकृष्णस्य, वदने = मुखे, व्योम्नि = आकाशे, इव =

यथा, अनिशं = सर्वदा, शत्रूणाम् = रिपूणाम् , विनाशपिशुनः = उच्छेदसूचकः, भ्रुकुटिच्छलेन = भ्रूभङ्गव्याजेन, आस्पदं = स्थितिम् , प्रतिष्ठाम् , चकार = कृतवान् ।

**श्लोकार्थः** – एवं वाक्यम् उक्त्वा नारदे आकाशं समुद्गते पुरतः सः चन्द्रस्य शोभाम् अधारयत् । अथ इन्द्रसन्देशश्रवणानन्तरम् 'ओम्' इति उक्तवतः शिशुपालं प्रति क्रुद्धस्य श्रीकृष्णस्य वदने ,आकाशे इव सर्वदा शत्रूणां विनाशसूचकः केतुः भ्रूभङ्गव्याजेन स्थानं प्राप्तवान् ।

**भावार्थः** – यदा नारदमुनिः इन्द्रसन्देशं श्रावयित्वा आकाशं गतवान् तदा सः चन्द्रः इव शोभते स्म। अत्र ओम् इत्युक्त्वा श्रीकृष्णेन शिशुपालवधस्य कार्यम् अङ्गीकृतम्। शिशुपालवृत्तम् आकर्ण्य श्रीकृष्णस्य मुखं क्रोधेन आरक्तम् अभवत् । क्रोधेन तस्य भ्रुकुटिः वक्रीजाता। तद् दृष्ट्वा एवं प्रतीयते स्म यत् शत्रुविनाशसूचकः धूमकेतुः आकाशे उदितः इति। आकाशे चन्द्रस्य समीपे धूमकेतोः उदयः राज्ञां भाविनं विनाशं सूचयतीति शास्त्रम् । श्रीकृष्णस्य मुखमण्डलम् आकाशः तत्र जातः भ्रुकुटिभङ्गः इत्युक्ते धूमकेतुः। पुरतः चन्द्रः इव नारदः एवं स्थितिः शिशुपालस्य वधमेव सूचयतीति भावः।

**विशेषः** – इन्द्रसन्देशम् आकर्ण्य श्रीकृष्णस्य क्रोधान्विता स्थितिः अत्र महाकविना समुपवर्णिता। अपि च शिशुपालवधनिश्चयः बोधितः।

अत्र श्रीशब्दप्रयोगः विद्यते। प्रतिसर्गान्तम् एवं श्रीशब्दप्रयोगः महाकविमाघस्य वैशिष्ट्यम् । शार्दूलविक्रीडितं वृत्तम् अस्मिन् श्लोके अस्ति। निदर्शना – उपमा – अपह्नवः इति सम्मिश्रालङ्कारेण सङ्करालङ्कारोऽपि अत्र। अयं प्रथमसर्गस्य अन्तिमश्लोकः इत्यस्मात् वृत्तपरिवर्तनं मङ्गलवाचकशब्दाः अपि अत्र दृश्यन्ते।

समासः – शार्ङ्गिणः – शार्ङ्गम् अस्य अस्तीति शार्ङ्गी तस्य – बहुव्रीहिसमासः।

अनिशम् – अविद्यमाना निशा यस्मिन् तत् – बहुव्रीहिसमासः।

सुरमुनौ – सुराणां मुनिः सुरमुनिः तस्मिन् – षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. सुरमुनिः कस्य श्रियं बिभ्रति स्म?

२. भ्रुकुटिच्छलवदनं कस्य आसीत्?

## १३.३. उपसंहारः

खण्डोऽयं प्रथमसर्गस्य समाप्तिसूचकोऽस्ति। 'इन्द्रसन्देशकथनम्' इति खण्डस्यास्य मुख्यमुद्दिष्टम्। अत्र शिशुपालवधं सूचयित्वा दुष्टनिग्रहेण सज्जनकर्तव्यपालनं प्रतिपादितम्। 'शिशुपालवधः करणीयः' इति निर्णयः भगवता स्वीकृत इत्यपि इतः अवगतम्। प्रतिसर्गान्तं श्रीशब्दप्रयोगः इति महाकवेः वैशिष्ट्यज्ञानम् अभवत्।

## १३.४. प्रश्नाः

१. 'शिशुपालवधनिर्णयः जातः' इति महाकविना कथं प्रतिपादितम्?

२. शिशुपालवधसूचकश्लोकं वर्णयत।

# चतुर्दशखण्डः
# सन्दर्भवाक्यानि

## संरचना

१४.०. प्रस्तावना
१४.१. लक्षिताधिगमविषयाः
१४.२. सन्दर्भवाक्यानि
१४.२.१. गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः
१४.२.२. ग्रहीतुमार्यान् परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः।
१४.२.३. अथ वा श्रेयसि केन तृष्यते?
१४.२.४. ऋते रवेः चालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः।
१४.२.५. सदाभिमानैकधना हि मानिनः।
१४.२.६. सतीव योषित्प्रकृतिः सुनिश्चला। पुमांसमभ्येति भवान्तेरष्वपि।
१४.२.७. शुभेतराचारविप्रक्त्रिमापदो निपातनीया हि सतामसाधवः।
१४.३. उपसंहारः
१४.४. प्रश्नाः

## १४.०. प्रस्तावना

साहित्ये गद्यकाव्यं वा पद्यकाव्यं वा भवतु नाम तत्र सुभाषितानि लोकोक्तयः वा प्रयुज्यन्ते। तत्र हि कानिचन वाक्यानि काव्यदृष्ट्या प्रधानानि, कतिचन तु त्रिकालाबाधितानि व्यावहारिकानि भवन्ति। येषाम् उपयोगेन वयं सम्भाषणशैलीम् अलङ्कृतां कर्तु पारयामः। अतः तानि कथं व्याख्यातुं शक्यानि इत्येव अस्मिन् खण्डे विविच्यते।

अत्र व्याख्यासमये कश्चन क्रमः विधीयते। यथा हि –

१. वाक्यसन्दर्भः

२. वाक्यार्थः

३. वाक्यस्पष्टीकरणम्

४. वाक्यवैशिष्ट्यं चेति।

एतं क्रममधिकृत्य अस्माभिः व्याख्या कर्तव्या भवति। कथमिति अत्र अधुना प्रस्तूयते।

## १४.१. लक्षिताधिगमविषयाः

१. छात्राः सन्दर्भवाक्यानि व्याख्यातुं पारयन्ति।

२. एतादृशां विशेषवाक्यानां प्रयोगज्ञानम् अवगच्छन्ति।

३. सम्भाषणशैलीं वा लेखनशैलीं वा अलङ्कर्तुं प्रभवन्ति।

४. विशेषवाक्यानाम् अन्वेषणार्थं प्रयतन्ते।

५. एतदर्थं गहनाध्ययनम् आवश्यकमिति छात्रैः अवगम्यते।

## १४.२.सन्दर्भवाक्यानि

महाकविमाघप्रणीतं महाकाव्यं शिशुपालवधम् इति। अस्य महाकाव्यस्य प्रथमसर्गः पाठ्यांशरूपेण अध्ययनार्थं योजितः। तेन ह्यत्र प्रथमसर्गान्तर्गतानि विशेषवाक्यानि व्याख्यानार्थं स्वीकृतानि।

### १४.२.१. गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः।

**सन्दर्भः** – प्रस्तुतं वाक्यं महाकविमाघप्रणीतं 'शिशुपालवधम्' इत्यस्मात् महाकाव्यात् समुद्धृतं वर्तते। महाकाव्यस्य प्रथमसर्गान्तर्गतमिदं वाक्यम् । समागते देवर्षिनारदे श्रीकृष्णः तस्य यथोचितं स्वागतं कृतवान् । तस्मिन् सन्दर्भे प्रस्तुतवाक्येन महाकविना स्वाभिप्रायः प्रकटितः।

**वाक्यार्थः**– मनीषिणः अपुण्यकृतां गृहाणि प्रीत्या गन्तुम् इच्छुकान् भवन्ति ।

**स्पष्टीकरणम्**– सदसद्विवेकशालिनः मनीषिणः पुण्यात्मनां गृहेष्वेव पदार्पणं कुर्वन्ति। अपुण्यवतां गृहं गच्छन्ति चेदपि प्रीत्या न। यतो हि तेषां गृहेषु अनाचारप्रभावः मनस्तापं

जनयति प्रत्युत पुण्यात्मनः गृहं शान्तिप्रदायकम् आह्लाददायकञ्च भवति। भगवतः श्रीकृष्णस्य प्रासादस्तु तीर्थस्थानमेव। तत्र कोऽपि प्रीत्या मनसा च गन्तुम् इच्छेदेव।

देवर्षिनारदः कश्चित् पुण्यात्मा। सः प्रणयात् श्रीकृष्णप्रासादं समागतः। 'अतिथिः देवो भव' इति भारतीयसंस्कृतेरनुसारं श्रीकृष्णःअर्घ्यादिषोडशोपचारविधिना तस्य यथोचितं पूजनं कृतवान् । यद्यपि सः पुराणपुरुषः तथापि देवर्षिनारदः तस्य कृते पूजनीयः एवासीत् । अपि च नारदसदृशाः जनाः सर्वत्र न गच्छन्ति इत्यपि सर्वज्ञः श्रीकृष्णः जानाति स्म। किन्तु सामान्यजनाः स्वगृहं प्रति महताम् आगमनम् इच्छन्ति चेत् तैः पुण्यकार्यं विधातव्यम् इत्येव महाकविः प्रस्तुतवाक्येन ज्ञापयति।

**वैशिष्ट्यम्** – अस्मात् वाक्यात् सतां स्वभावः परिलक्षितः भवति।

### १४.२.२. ग्रहीतुमार्यान् परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः।

**सन्दर्भः** – महाकविमाघविरचितात् शिशुपालवधम् इत्यस्मात् महाकाव्यात् वाक्यमिदं स्वीकृतमस्ति। एतत् विंशतिसर्गात्मकमिदं महाकाव्यम् । इयं पङ्क्तिः प्रथमसर्गान्तर्गता विद्यते। श्रीकृष्णस्य प्रासादं प्रति देवर्षिनारदस्य आगमनं सञ्जातम् । ततः श्रीकृष्णेन प्रीत्या नारदपूजनं विहितम् । मुनिपूजने श्रीकृष्णस्य प्रीतिहेतुः कः?इति प्रतिपादयितुं महाकविना प्रस्तुतवाक्यं समुद्धृतम् ।

**वाक्यार्थः** – महानुभावाः पूज्यान् जनान् सेवया वारंवारं वशीकर्तुं नितान्तम् अभिलाषवन्तः भवन्ति।

**स्पष्टीकरणम्** – पूज्यलोकानां पूजनं सेवा च मनःकामनापूर्ततायै कारणं भवति। पूज्यानां सन्तोषः आनन्दश्च सेवाकर्तुः कार्यसफलतायाः प्रमाणं वर्तते। ते ईश्वरतुल्याः। अतः तेषां सेवा नाम ईश्वरसेवा एव। प्रसन्ने ईश्वरे समस्यानिवारणं तु सहजमेव। महानुभावाः पूज्यानां प्रभावं जानन्ति एव। तेन हि पूजनादिसेवां विधाय तान् वशीकर्तुमिच्छति। तदर्थं सदा अवसरान्वेषणं तेषां प्रचलति।

नारदमुनिरपि पूज्यपुरुषः। श्रीकृष्णः पूज्यानां सेवामहत्त्वं निश्चयेन जानाति। तस्मादेव प्रसन्नमनसा भगवता नारदपूजनं कृतम्। वस्तुतः भगवान् श्रीकृष्णः सर्वसमर्थः। तेन नारदस्य पूजा विधातव्या इति नैव युज्यते। परं लोकदृष्ट्या पूज्यानां यथोचितपूजनं

मानवकर्तव्यम् । अपि च महतां सेवां कर्तुं भगवान्नपि प्रयतते इति सूचयितुमेव कविवर्यः इच्छति। वारं वारम् अवसरं प्राप्य पूज्यानां सेवा कृता चेत् तेषां सान्निध्यलाभः महते लाभाय सम्भवति। अतः तादृशः अवसरः न त्याज्यः इत्यभिप्रायः

**वैशिष्ट्यम्** – आर्यजनानां परिचर्यार्थं न केवलं मानवः अपि तु भगवान् अपि यतते इति बोधः अस्मात् वाक्यात् भवति। सुभाषिततुल्यमिदं वाक्यम् अस्मान् पूज्यजनैः सह कथं व्यवहृतव्यमिति बोधयति।

## १४.२.३. अथवा श्रेयसि केन तृप्यते?

**सन्दर्भः** – महाकविमाघविरचिते शिशुपालवधम् इत्यस्मिन् महाकाव्ये प्रस्तुतं वाक्यम् अस्माभिः अवलोक्यते। प्रथमसर्गान्तर्गतमिदं वाक्यं श्रीकृष्णस्य मुखात् निस्सृतम् । भगवतः भवनं प्रति नारदागमनम् अभूत् । तस्य यथोचितं स्वागतं विधाय सः भगवान् देवर्षेः दर्शनमाहात्म्यं कथयन् तं प्रशंसितवान् । ततः आगमनप्रयोजनं ज्ञातुमिच्छुकः सः नारदस्य पुरतः प्रस्तुतं वाक्यम् उदाजहार।

**वाक्यार्थः** – आत्मकल्याणविषये कः सन्तुष्टः भवति?

**स्पष्टीकरणम्** – मानवस्य सर्वसामान्यस्वभावं कथयन् श्रीकृष्णः आत्मकल्याणविषये मार्गदर्शनं प्राप्तुम् इच्छति। यद्यपि जीवने मानवः कियदपि सुखमनुभवेत् तथापि इतोऽप्यधिकाधिकं मम कल्याणं हितञ्च कथं सम्भवेत् इत्येव चिन्तयति। 'अधुना अहं सुखी' इति भावना तस्मिन् नैव उदेति। अधिकं श्रेयस्करं मदीयजीवनं स्यादिति सर्वदा सः कामयते। तदर्थं मार्गान्वेषणमपि तस्य सर्वदा प्रचलति। मनसि सन्तोषः कदापि न। जगति सर्वमिदं सामान्यम् ।

अत्र हि भगवान् श्रीकृष्णः नारदागमनप्रयोजनं प्रष्टुकामोऽस्ति। परं साक्षात् कथं पृच्छेत्? इत्यतः अर्थपूर्णां वाणीं श्रोतुमिच्छुकोऽस्मि इति अवदत् सः। अर्थपूर्णा नाम कल्याणकारिणी हितकारिणी वा वाणी। एवं हितकारि वचः सर्वेषां प्रियमेव। इत्थं मधुरवाक्यम् उक्त्वा श्रीकृष्णः नारदं मुख्यविषयम् उपस्थापयितुं प्रेरयति।

सर्वविदितमेव यत् श्रीकृष्णः पूर्णसन्तुष्टः सर्वज्ञश्चेति। एवं सत्यमपि नारदस्य मुखात् आगमनहेतुं श्रोतुकामोऽयम् इति चित्रं खलु। वस्तुतः आत्मानं सामान्यपुरुषरूपेण

चिन्तयन् सः तेषां मनोभावान् प्रकटयितुमेव ईदृशं वाक्यमुच्चारयति। अपि च सम्भाषणशैलीं ज्ञापयति।

**वैशिष्ट्यम्** – मनुष्यस्य अतृप्तस्वभावः अस्मात् वाक्यात् दृग्गोचरः भवति। तथैव आत्मकल्याणाय सः सदा प्रवर्तते इति ज्ञायते।

**१४.२.४. ऋतेः रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः।**

**सन्दर्भः** – प्रस्तुतपद्यांशः महाकविमाघविरचिते 'शिशुपालवधम्'इत्यस्मिन् महाकाव्ये समुल्लिखितः वर्तते। प्रथमे सर्गे भगवान् श्रीकृष्णः देवर्षिनारदम् आगमनप्रयोजनं पृष्टम्। तस्मिन् समये प्रत्युत्तरे नारदेन भवद्दर्शनमेव मदीयम् आगमनप्रयोजनम् इति प्रतिपादितम्। स्वकीयवाक्यं समर्थयन् सः श्रीकृष्णस्य जगत्पालनसामर्थ्यं विवेचयन् प्रस्तुतविधानम् उदाहरणरूपेण उपस्थापयति।

**वाक्यार्थः** – निशाजनित–अन्धकारसमूहैः व्याप्तम् आकाशं सूर्येण विना कः निर्मलीकर्तुं समर्थोऽस्ति।

**स्पष्टीकरणम्** – रात्रिकालस्य गाढान्धकारः सम्पूर्णमाकाशं व्याप्नोति। सूर्योदये जाते आकाशः प्रकाशते। तात्पर्यं सूर्योदयात् अन्धकारनाशः भूत्वा आकाशः स्वच्छः भवति। सूर्यतेजसा गहनान्धकारस्य निर्मूलनमिति प्रसिद्धम् । लोके सूर्यं विना नान्यः कश्चित् तमोनाशे समर्थः।

श्रीकृष्णोऽपि सूर्य इव न केवलं मानवस्य अज्ञानान्धकारनाशे शक्तः अपि तु जगतः विपद्विवारणे अपि क्षमः। अखिलं विश्वं यदा दुष्टजनैः पीड्यते तदा न कोऽपि सामान्यमानवः तस्य प्रतिकारं कर्तुं पारयति। यतो हि दुर्जनानां शक्तिः अपरिमिता भवति। कश्चित् असामान्यपुरुष एव तादृशं खलपुरुषं हन्तुं नाशयितुं वा शक्नोति। अलौकिकसामर्थ्यवशात् दुष्करः दुष्टजननाशः शक्यः।

तत्काले शिशुपालरूपेण कश्चित् दुर्जनः लोकं पीडयन्नासीत् । सर्वे जनाः तस्य सन्तापेन त्रस्ताः आसन् । तस्य विरोधं कर्तुं कोऽपि नोत्सहते स्म। पृथिवी अपि तस्य दुष्कृत्यैः भाराक्रान्ता सञ्जाता। तस्मादेव भगवन्तं श्रीकृष्णं शिशुपालवधार्थं निवेदयितुं नारदमुनिः समागतः। श्रीकृष्णेन विना तस्य नाशः अशक्यः इति सर्वदेवताः जानन्ति

स्म। अतः सूर्यस्य दृष्टान्तं दत्त्वा श्रीकृष्णसामर्थ्यं प्रतिपादितम् अत्र। अपि च शिशुपालवधं कृत्वा जगत् पीडारहितं कर्तुं नारदमुनिना श्रीकृष्णः प्रार्थितः।

**वैशिष्ट्यम्** – प्रस्तुतवाक्यं जगतः सामान्यनियमं प्रतिपाद्य भगवतः श्रीकृष्णस्य अलौकिकसामर्थ्यं द्योतयति। अपि च शिशुपालवधे श्रीकृष्ण एव समर्थः इति ज्ञापयति।

### १४.२.५. सदाभिमानैकधना हि मानिनः।

**सन्दर्भः** – पद्यांशोऽयं महाकविमाघप्रणीतस्य 'शिशुपालवधम्' इत्यस्य महाकाव्यस्य प्रथमसर्गे अवलोक्यते। देवेन्द्रसन्देशं श्रावयितुं समागतः देवर्षिनारदः श्रीकृष्णं शिशुपालस्य पूर्वजन्मवृत्तान्तम् अकथयत् । तस्मिन् प्रसङ्गे रामावतारहेतुं ब्रुवन् राक्षसराजरावणस्य लोकप्रपीडनदुष्कृत्यं श्रीकृष्णं सः संस्मारयति।तदा रावणस्वभावं सूचयन् नारदमुनिः प्रस्तुतवाक्यम् उच्चारयति।

**वाक्यार्थः** – मानिनः सदा अभिमान एव एकं धनं मन्यन्ते।

**स्पष्टीकरणम्** – अस्मिन् जगति अहङ्कारपूर्णाः मानिनः अभिमान एव एकं धनमिति चिन्तयन्ति। अभिमानं वर्जयित्वा नान्यत्किमपि तेषां कृते महत्त्वपूर्णम्। प्राणात्ययेऽपि ते मानं न मुञ्चन्ति। अभिमानरक्षणाय यत्किमपि साहसं विधातुं सदैव प्रवर्तन्ते ते। अभिमानिनः स्वभावोऽयम् ।

रावणोऽपि एवमेव अभिमानी आसीत् । अभिमानरक्षणाय सः स्वकीयप्राणान् अपि परित्यक्तवान् । श्रीरामः अमानवः अजन्मा चेति रावणः जानाति स्म। आसुरप्रवृत्तिं संहर्तुं श्रीरामः मनुवंशे मानवावतारं स्व्यकरोत् । तस्मात् अयमेव मम भावी विनाशकः इति रावणः ज्ञातवान् आसीत् । एवं सत्यपि अभिमानेन सः सीताम् अपहृतवान् । 'रामः आगत्य सीतां मोचयतु' इति सः कामयते स्म अतः सीतां न अमुञ्चत् । स्वयं वीरः, पराक्रमशीलः बलवान् च सः रामेण सह योद्धुम् अयमेव अवसरः इति अचिन्तयत्। यतो हि रामेण सह युद्धमिति अभिमानविषयः आसीत् । मरणात् न बिभेति स्म सः। तस्मादेव आत्मरक्षणाय सीतायाः मोचनं तस्मै कदापि नारोचत। अतः प्राणान् परित्यज्यापि आत्मनः अभिमानः तेन रक्षितः।

**वैशिष्ट्यम्** – प्रस्तुते वाक्ये अभिमानपूर्णपुरुषाणां स्वभावः समुपवर्णितः। सुभाषितरूपेण वाक्यमिदं सामान्यतः व्यवहारे प्रयुङ्क्ते।

### १४.२.६. सतीव योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि।

**सन्दर्भः** – प्रस्तुतेयं श्लोकपङ्क्तिः महाकविमाघविरचिते शिशुपालवधम् इत्यस्मिन् महाकाव्ये समुपवर्णिता। प्रथमसर्गान्तर्भूतोऽयं पद्यांशः। इन्द्रसन्देशश्रावणाय श्रीकृष्णं प्रति गतः नारदमुनिः सन्देशकथनात् पूर्वं प्रस्तावनां वदति। प्रस्तावनायां शिशुपालस्य पूर्वजन्मवृत्तान्तं विवेच्य वर्तमानेऽपि तस्य जगत्पीडनं प्रचलतीति निवेदयति। पुनर्जन्म अवाप्य अपि गतजन्मनः प्रभावः तस्मिन् विद्यते इति स्पष्टयन् नारदः प्रस्तुतवाक्यम् उद्धरति।

**वाक्यार्थः** – पतिव्रता नारी इव स्थिरतरा प्रकृतिः जन्मान्तरेषु अपि तमेव पुरुषम् आप्नोति।

**स्पष्टीकरणम्** – पतिपरायणा नारी मनसा वचसा शरीरेण च एकमेव पुरुषं वाञ्छति। परपुरुषं तु स्वप्नेऽपि नैव इच्छति। पातिव्रत्यधर्मं परिपालयन्ती सा अग्रिमे जन्मनि पत्युः एव अनुगमनं करोति। पूर्वसंस्कारवशात् तमेव पुरुषं पुनः प्राप्नोति सा। तस्याः अत्यन्तं स्थिरः स्वभावः तत्र पत्युः पुनर्प्राप्त्यर्थं हेतुः वर्तते।

शिशुपालोऽपि अतीव बलवान् इत्यतः मदोन्मत्तः आसीत् । विजयेच्छुकः सः निजसामर्थ्येन जगत् उत्पीडयति स्म। पूर्वजन्मनि अपि रावणरूपेण एवमेव जगत् त्रस्तं कृतम् । रावणवधानन्तरं शिशुपालरूपेण तस्य पुनर्जन्मप्राप्तिः अभवत् । परमस्मिन् जन्मनि अपि पूर्वतनं लोकप्रपीडकस्वभावं सः न अत्यजत् । पतिव्रता नारी इव तस्य पूर्वतनीया दुष्प्रवृत्तिः वा पूर्वतनः दुर्जनस्वभावो वा तथैव सुस्थिरः। पूर्वसंस्कारवशात् तस्य दुष्टप्रवृत्तिः यथावत् लोके उपद्रवं जनयति स्म। अतः अस्मिन् जन्मनि अपि पतिपरायणा इव तस्य दुष्टा प्रकृतिः तं नैव पर्यत्यजत् ।'स्वभावो दुरतिक्रमः' इति प्रसिद्धं खलु। तद्वत् शिशुपालस्य दुष्टा प्रवृत्तिः दुष्टक्रिया वा न परिवर्तिता अपि तु तथैव स्थिरतरा। तस्मादेव तस्य अचला दुष्टप्रकृतिः तम् अस्मिन् जन्मनि अपि अवृणोत् इति महाकवेः माघस्य अभिप्रायः।

**वैशिष्ट्यम्** – पतिव्रतामहिलायाः स्वभाववर्णनमत्र विधाय शिशुपालस्य पूर्वजन्मनः दुर्जनत्वं तथैव स्थिरताम् आप्नोतीति अनेन वाक्येन ज्ञायते।

**१४.२.७. शुभेतराचारविपक्त्रिमापदो निपातनीया हि सतामसाधवः।**

**सन्दर्भः** – महाकविमाघचरिते 'शिशुपालवधम्' इत्यस्मिन् महाकाव्ये पद्यांशोऽयम् उपलभ्यते। प्रथमसर्गे उद्धृतोऽयं पद्यांशः। इन्द्रसन्देशकथनाय देवर्षिनारदः भगवतः श्रीकृष्णप्रासादं समागतः। आदौ विषयोपस्थापनं विधाय प्रधानविषयं स्पृशति सः। नारदः तत्र शिशुपालस्य पूर्वजन्मवृत्तान्तं श्रावयित्वा तस्य औद्धत्यं विवेचयति। ततः तस्य वधाय प्रार्थनां विदधाति। प्रार्थनावसरे प्रस्तुतं वाक्यं नारदमुनिना प्रोक्तम् ।

**वाक्यार्थः** – निरन्तरं दुराचारं कृत्वा कृत्वा परिप्राप्तविपत्तयः दुर्जनाः, सज्जनैः वध्याः भवन्ति।

**स्पष्टीकरणम्** – अस्मिन् जगति सज्जनाः दुर्जनाश्चेति निवसन्ति। सत्कार्ये रताः सज्जनाः दुष्कार्यसम्पादने च रताः दुर्जनाः। लोकसन्तापकारकाः दुर्जनाः स्वकीयदुष्टकर्मभिः जगत् पीडयन्ति। आत्मानं श्रेष्ठं मन्यमानाः ते कस्यापि नियन्त्रणे भवितुं नेच्छन्ति। ते स्वेच्छया व्यवहरन्तः परपीडनेन प्रमोदम् अनुभवन्ति। तस्मात् विश्वरक्षणाय एतादृशः निरन्तरं दुराचारं कृत्वा कृत्वा प्राप्तविपदः दुष्टाः सज्जनैः मारणीयाः।

परपीडाजनकः शिशुपालोऽपि दुष्टः। निजबलेन मदोन्मत्तः सः ब्रह्मदेवस्य नियमानपि उल्लङ्घयति। सुरदैत्यराक्षसानां यदृच्छया अनुग्रहावग्रहनिर्णयं कृत्वा स्वयं भाग्यविधाता जातः सः। स्वतेजसा सर्वान् तिरस्करोति स्म सः। अतः सः हन्तव्यः इति नारदमुनिः श्रीकृष्णम् असूचयत् । परं सज्जनेन दुर्जनघातं विधाय पापकर्म किमर्थं विधातव्यमिति आशङ्कानिवारणाय नारदमुनिः स्पष्टयति यत् पापाचरणकर्तॄणां पापकर्मभिः ते स्वयमेव विपद्ग्रस्ताः अतः तेषां वधस्तु दुष्कृत्यसमूहैः एव निर्धारितः भवति नान्येन केनचित् । सज्जनाः केवलं तत्र निमित्तकारणम् । दुष्टहननं न कदापि पापाय अपि तु लोकरक्षणाय। तस्मात् सा यद्यपि दुष्क्रिया तथापि सत्क्रियारूपेण परिवर्तते। अतः शिशुपालवधकर्ता न श्रीकृष्णः प्रत्युत शिशुपालस्य पापकर्माणि। अतः निमित्तभूतेन श्रीकृष्णेन शिशुपालः हन्यतव्यः इति प्रस्तुतवाक्येन महाकविः माघः प्रतिपादयति।

**वैशिष्ट्यम्** – दुर्जनानां स्वदोषेण एव विनाशः सम्भवतीत्येव अस्मात् वाक्यात् ज्ञायते। व्यवहारिकजीवने लोकोक्तिरूपेण वाक्यमिदं प्रयुज्यते।

## १४.३. उपसंहारः

खण्डेऽस्मिन् शिशुपालवधम् इत्यस्य महाकाव्यस्य प्रथमसर्गे अन्तर्भूतानि सप्तवाक्यानि व्याख्यातानि। वाक्यसन्दर्भः, वाक्यार्थः, वाक्यस्पष्टीकरणं तथा च वाक्यवैशिष्ट्यम् अनया दिशा सर्वाणि वाक्यानि विवेचितानि।

## १४.४. प्रश्नाः

वाक्यद्वयं व्याख्यात –

१. अथ वा श्रेयसि केन तृप्यते?

२. सदाभिमानैकधना हि मानिनः।